अथ राज्ञी-स्पर्श-वैकल्यादितस्ततो विलुठन् कुतोऽप्यागतेन शय्या-पालकव्यन्तरेण दृष्टः । तेन "रे रे मरणाभिलाषिन् ! महापराधिन् ! काम-शय्याक्रमणाऽपराधात् मत्प्रहारा-भिहतः शीघ्रं यमसदनाऽतिथिर्भव" इत्युक्त्वा लोहशृङ्खलाभिर्दृढं बद्ध्वा बहुधा विडम्ब्य-मानो बहिर्नीत्वा सर्वजनसमक्षं लोहमुद्गरेण प्रहर्त्तुमारब्धस्तावता तत्रस्थेन मध्यमबुद्धिना दृष्टस्तेन च बहुधा विनय-प्रतिपत्त्या मधुरवाक्यैश्च तस्य व्यन्तरस्य कोपोपशमं कृत्वा मोचितो बालः क्रमेण गृहमानीतः पृष्टश्च "भ्रातः ! तव कुत्र कुत्राऽङ्गे प्रहारजा व्यथा-ऽस्ति" इति तदा बालः प्राह- "भ्रातः ! मम हृदये मदनकन्दल्या विप्रयोगजा महाव्यथा-ऽस्ति, नाऽन्यत्र क्वाऽपि काऽपि व्यथाऽस्ति" तदाकर्ण्य मध्यमबुद्धिराह- "अहो ! एषा राज्ञः पट्टदेवी, यस्यां या तव रमणेच्छा सा तु महानर्थाय, अतोऽतः परं नैतदभिल-षणीयमिति" तद्वाक्येन रुष्टो बालः सक्रोधं प्राह- "कृतं तव नैपुण्येन यदि मे शक्तिरस्ति तत् तामवश्यां रंस्येऽत्र किं तेऽपराध्यतीति" श्रुत्वा मध्यमबुद्धिर्मौनमास्थितः ।

अथ रात्रौ राज्ञी-सङ्गेच्छया बालो गृहाद् बहिर्निर्गतस्तं चाऽवलोक्य मध्यमबुद्धिरपि भ्रातृ-स्नेहेन तस्याऽनुपदं चलितः । तदा कश्चिदेको विद्याधरो बालं गृहीत्वा व्योम्नि

समुत्पतितः बालस्याऽऽक्रन्दारवेण दुःखितमना मध्यमबद्धिः खेचरेऽकिञ्चित्-करोऽपि तत्पृष्ठे चलितः । विद्याधरस्तु क्षणाद् दृष्टिपथमतीतः, तथापि अग्रतः प्रचलतोऽस्य महाटवी आयाता । तत्र भ्रमता क्वाऽपि बालशुद्धिर्न लब्धा, परं क्षुत्-तृड्-बाधितेन तेनैकः कूपोऽदर्शि, तस्मिन् कूपे यावद् दुःखार्दितो झम्पां दातुं प्रवृत्तस्तावत् तत्राऽऽयातेनैकेन नन्दन-नाम्ना नरेणाऽऽगत्य निषिद्धः पृष्टं च दुःखकारणम् । मध्यमबुद्धिना बालहरणादि-सर्वं कथितम् नन्दनेनोक्तं "अत्र निकटवर्त्तिनगरे हरिश्चन्द्रो राजाऽस्ति, तस्य रतिकेलि-नामा विद्याभृद् वयस्योऽस्ति, तेन राज्ञः शत्रुविध्वंसिन्येका क्रूरविद्या दत्ताऽस्ति तां च षण्मासान् यावत् साधयित्वा, इदानीं तेन विद्याभृता एकं पुमांसमानाय्य तन्मांसशोणितैर्नृपः प्रेतवने स्थितो देव्यग्रे आहुतीर्दत्ते । एवं कुर्वतोऽस्य सप्त-दिनानि जातानि, एकं दिनमवशिष्यते, स पुमान् राज्ञा मम समर्पितोऽस्ति । किं ज्ञायते तवैव भ्राता भविष्यति इत्युक्त्वा नन्दनेनाऽग्रे गत्वा मृतप्रायः पुमान् मध्यमबुद्धये दर्शितः, दृष्ट्वोपलक्षितो बालोऽयमिति तेन याचितश्च नन्दनस्तन्मुक्तिं, नन्दनेनोक्तं अद्याऽप्येकदिनाऽवधि अस्य प्रयोजनं विद्यते, परं किं कुर्वे तव दाक्षिण्याद् दत्तोऽयं, ततो गृहीत्वैनं याहि शीघ्रं, नृपो द्रक्ष्यति चेत् तदा तव मम चाऽनिष्टं भविष्यतीति" तद्वाक्यं प्रमाणीकृत्य बालं स्कन्धे कृत्वा वेगाद् वलितो मध्यमबुद्धिः । क्रमेण स्वपुरं स्वगृहं चाऽऽयातः ।

## मध्यमबुद्धिना बालस्य त्यजनम्

तत्र च भेषजाद्यनेकोपायान् कृत्वा सज्जीकृतो बालः, पुनरपि भाषितोऽनेन "भ्रातः! त्वया महाकष्टमनुभूतं, ततोऽद्य प्रभृति महानर्थभूमिः परस्त्रीसङ्गेच्छा कदापि न कार्या, तच्छ्रुत्वा क्रोधाऽरुणो भूत्वा बालः प्राह- "अहो! मूर्ख ! त्वमपि मनीषिणः पक्षपाती असि । कस्त्वां शिक्षां पृच्छति ? मया कष्टनिवारणार्थं कदा त्वमाकारितः ? अहं तु मदनकन्दलीं विना जीवितं विषतुल्यं गणयामी" त्यादि-वाक्यैर्भर्त्सितो मध्यमबुद्धिर्दध्यौ-स्पर्शनकुमित्र-प्रेरितोऽयं बालो दुरात्मा जातोऽतो न सङ्गति-करणार्ह इति बालं मुक्त्वा मनीषिसमीपं गतः, बालस्य वृत्तान्तस्तस्मै कथितः । तदा मनीषिणोक्तं - सर्वमेतदहमपि वेद्मि, यतो यदा विद्याभृता बालो हृतो, बालेन त्वया च पूत्कारः कृतस्तदा पौराः सर्वे जागरिताः परस्परं कथयामासु र्यदुत 'येन बालो हृतस्तेन लोकोपकारकारिणा समीचीनं कृतं, यदि पुनरसौ दुरात्मानं बालं हन्ति, तदा तु अतीव भव्यं भवति ।' केचिच्च 'मध्यम-बुद्धिस्तु निर्दोषोऽस्ति, परं दुरात्मना बालेन सङ्गतो वृथा कष्टं भुनक्ति' इत्याहुः, केऽपि तु 'सङ्गत्यागेन सत्सङ्गतिर्विधेयेति लोकोक्तिं विदन्नपि बालसङ्गं विहाय मनीषिणं कथं

न सेवते ?' इत्यूचुः । इति तेषां परस्परालापैर्मया ज्ञातो भवतोर्वृत्तान्तस्ततो मया पितुः कर्मविलासराजस्य पुरः कथितश्च, पित्राऽप्युक्तं कियन्मात्रमेतद् बालस्य कष्टम्? एनं स्पर्शन-सङ्गापराधात् कष्टकोटिभिरहं विडम्बयिष्यामि इत्यादि-मनीषिवार्त्ताऽऽ-कर्णनात् प्रबुद्धो मध्यमबुद्धिः, सर्वथा बालस्य सङ्गं तत्याज ।

## स्पर्शासक्तस्य बालस्य कदर्थना

अथैवं कियद् दिनाऽतिक्रमे मदनकन्दलीवियोगाऽऽतुरो बालः प्रथमनिशायां केनचिदप्यदृष्टप्रचारो राजमन्दिरान्तः प्रविश्य राज्ञः पल्यङ्के निविष्टः, मदनकन्दली तु विभूषा-करणार्थं गर्भगृहान्तः प्रविष्टाऽस्ति । अत्राऽन्तरे शत्रुमर्दननृपः सभां विसृज्य तत्राऽऽयातः, स च तथाविधाऽपराधिनं बालं वीक्ष्य प्रोद्भूत-चण्डकोपः कीनाशकिङ्करप्रायेण विभीषणाख्य-स्वसेवकेन तं लोहयन्त्रैर्बन्धयित्वा नारकवत् समग्रां रात्रिं यावत् व्यडम्बयत् । प्रभाते खरपृष्ठमारोप्य नगरमध्ये चुतरशीतिचतुष्पथेषु परिभ्राम्य गलपाशं दत्त्वा कुत्रचिद् वृक्षशाखायां बद्धः, तस्य तथाविधाऽवस्थां दृष्ट्वा पौराः सर्वे हृष्टाः, "अहो! दुरात्मनोऽस्य बालस्येयमेवावस्था समुचितेति" ।

## चतुष्प्रकारमनुष्यवर्णनम् ।

अथ स्व-स्व-स्थानं गतेषु सर्वलोकेषु भवितव्यता-वशात् पाशस्त्रुटितः, भुवि पतितो बालः क्षणेन लब्ध-चेतनः प्रच्छन्नवृत्त्या गृहमायातो राजभयाद् गृहान्तर्निलीय तिष्ठति। अथ कियद्दिनातिक्रमे तत्र पुरे चित्तविलासोद्याने प्रबोधरतिनामाऽऽचार्यः समवासार्षीत्। तद्-वन्दनार्थं राजा पौरजनसहितः समागतः । शुभश्रीप्रेरणात् मनीषि-मध्यमबुद्धि अपि तत्राऽऽगतौ । बालोऽपि नैकस्त्रीणां विलासादि-प्रेक्षा-लालसस्त-त्राऽऽयातः । अथाऽऽचार्येण देशनाऽऽरब्धा-"अहो भव्या ! अनादि संसारे दुःष्प्रापं नरत्वं प्राप्य निःशेष-दुःख-समुत्पत्तिस्थानानि स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्रेन्द्रियाणि निर्जित्य एकान्त-हिते धर्मे यतध्वम् । यत इन्द्रियजय एव परमो धर्मः" इत्यादि श्रुत्वा राज्ञा पृष्टं "भगवन्! दुर्जयेन्द्रियजेतारो जगति भविष्यन्ति केऽपि ?" गुरुरूचे- "सन्ति केऽपि । यतो जगति चतुर्विधा मनुष्या जघन्य-मध्यमोत्कृष्टोत्कृष्टतमभेदात् । तत्र ये उत्कृष्टतमास्ते सदागम-प्रसङ्गात् सन्तोषेण समं मैत्रीं कृत्वा स्पर्शनादीनि कटुकविपाकानि विज्ञायेन्द्रियाणि विजेतुं प्रक्रमन्ते ।" एतदाकर्ण्य मनीषिणा विमृष्टं 'स भवजन्तुरुत्कृष्टतमः। येन सदागम-सन्तोषाभ्यां सह मिलित्वा स्पर्शनं दूरे निरस्य स्वार्थसाधित इति ।' पुनर्गुरुभिरुक्तं- "ये तु स्पर्शनादीनां मूलशुद्धिं विज्ञाय महामोहसैनिकान् मत्वा,

तान्यवगणय्येन्द्रिय-पोषं न विदधते, ते चोत्तमाः ।'' अत्र मनीषी दध्यौ-'ईदृग् विधस्त्वहं, यन्मया स्पर्शनस्य मूलशुद्धिरानायिता, महोमोह-सैनिको मत्वा परिहृतश्चेति' । पुनर्गुरुराह- ''ये तु गुर्वादि-वाक्यात् स्पर्शनादीन्यधमानि श्रुत्वाऽपि सन्दिग्ध-मनसो लोकेषु च स्पर्शनादि-सङ्गजनित-दुर्विपाकान् दृष्ट्वा, पश्चात् प्रतीत्य तत्-सङ्गत्यागेनेन्द्रियजयाय यतन्ते ते तु मध्यमाः'' ।

अत्र मनीषिविमर्श 'एवंविधस्तु मद्भ्राता मध्यमबुद्धिः, यत् स पूर्वं मद्वाक्ये सन्दिग्धमनाः, पश्चाद् बालस्य स्पर्शनसङ्गजाः कदर्थनाः संवीक्ष्य स्वयं चाऽनुभूय प्रबुद्धः तत्सङ्गं परिजहारेति ।'

## बालस्य कुचेष्टा

पुनगुरुरूचे- ''यस्तु हीनसत्त्वः स्पर्शनादीनां दुर्विपाकान् विलोकयन्ननुभवन्नपि तत्सङ्गं इन्द्रिय-पोषं च न जहाति, स जघन्यः,'' इति श्रुत्वा मनीषिणा ध्यातं, 'यदेवंविधस्तु मद्भ्राता बालो यदित्थं कदर्थनानुभवेऽपि स्पर्शन-सङ्गेच्छा न जातु जायतेऽस्येति ।' अथ तदवसरे धर्मश्रवणैकचित्ते नृपादिसकलसभाजने कौतुकाऽऽयातो बालो मदनकन्दली-रूपाक्षिप्तो नखशिखाऽवधि-तदङ्ग समालोकन-परश्चिरं तस्थौ । तेन देशनाया अक्षरमात्रमपि न स विवेद। अत्राऽन्तरे शत्रुमर्दननृपस्य सुबुद्धिर्नामाऽमात्योऽतिधर्मात्मा गुरुं पप्रच्छ- ''भगवन् ! किमेषां चतुर्णां पुरुषाणां भेदकारणम् ?'' गुरुराह- ''य उत्कृष्टतमः स तु सर्वेन्द्रिय-जयं कृत्वा केवलं मोक्ष-पदे प्रवृत्तस्ततोऽयं भिन्न एव, परं जघन्यमध्यमोत्कृष्टानां तु कर्मवैचित्र्यं भेदकारणम् । तद्यथा-त्रयाणामप्येषां कर्मविलासो राजा जनकः कर्मणश्च या शुभपरिणतिः सा शुभसुन्दरीत्युच्यते, सा च उत्कृष्ट-मनुष्यस्य जननी, तथा या शुभाऽशुभमिश्र-कर्मपरिणतिः सा सामान्यरूपा राज्ञी मध्यम-पुरुषस्य जननी उच्यते । इति गुरु वाक्यमाकर्ण्य मनीषी- 'अहो ! गुरुभिरेतदस्म-च्चरितमेवो-क्तमिति' यावद् विमृशति, तावत् स्पर्शनाऽकुशलमालयोः प्रेरणा परवशो बालो राजभय-मविमृश्य सर्वलोकलज्जामवगणय्य कामान्धो मदनकन्दलीमभिधावितः, तं दृष्ट्वा लोकैः कोलाहलः कृतः, राज्ञा च कोपकलुषदृशावलोकितः समुपलक्षितश्च 'अरे ! सोऽयं दुरात्मेति' ध्यात्वा सक्रोधं हुङ्कारः कृतः, तदाकर्णनात् जातोत्कम्पः प्रणष्टो बालः कतिचित् पदानि गत्वा गतिभङ्गवशाद् गन्तुमक्षमो भुवि पपात । तस्याऽधमचरित्रं दृष्ट्वा मनीषि-मध्यमबुद्धि लज्जितौ । अथ तदा बालस्य देहात् निःसृत्यैकः पुमान् समीपे स्थितः, राज्ञा गुरुः पृष्टः- ''भगवन् ! सर्वलोकसमक्षं किमनेनेत्थं दुराचरितं ?'' गुरुराह- ''राजन् ! अयं बालस्तु स्वभावेन शुभात्मा, परं अस्य शरीरात् निर्गतोऽयं पुमान् स्पर्शन-नामा-

तद्वशाद् दुष्टो जातः । तथा अकुशलमालाऽस्य माता, तस्याः प्रेरणात् मूढोऽयं साक्षाद् वैरिभूतं स्पर्शनमेनं मित्रीयति । पुनः राज्ञा पृष्टं- "स्वामिन् ! भवद् देशनयाऽपि नाऽयं प्रबुद्धस्तत्कथम् ?" गुरुराह- "राजन् ! त्रिलोकीपूज्यानां तीर्थकृतां समवसरणे नित्यविरोधिजीवानामपि वैराण्युपशाम्यन्ति, परं निरुपक्रमनिबिड-कर्माणो ये जीवास्ते तु देशना-शतैरपि न प्रतिबुद्ध्यन्ते, तदत्र किं चित्रं ?" तदा सुबुद्धिमन्त्रिणोक्तं- "भगवन्! सत्यमेतत्, यस्य सिद्धान्तवचसि निश्चयः स्यात्, स तु ईदृग्विध-बालप्रमुख-वृन्तान्तं विलोक्य नाऽऽश्चर्यं लभते" । पुनः राज्ञा पृष्टं-"भगवन् ! भवदग्रे स्थित्वा धर्मसभायां कथमेनं हन्मि ? अतोऽधुना तु मया मुक्तः परम् अग्रे किमस्य भावीति ?" तदा गुरुर्बभाषे- "राजन् ! इतः प्रणष्टो भ्रमन् कोल्लाक-सन्निवेशान्तिके एकस्मिन् सरसि स्नान्तीं श्वपाकस्त्रियं वीक्ष्य, तद्भोग-वाञ्छया विकलीभूतः तस्यां बलात्कारं करिष्यति, वृक्षाद्यन्तरितस्तत्पतिः तदाकर्ण्य तत्राऽऽगत्य चैनं हनिष्यति, ततो मृत्वा बालोऽयं नरकादिषु चिरं कष्टकदर्थनाः सहिष्यतीति" श्रुत्वा पुनर्नृपो जगौ-भगवन् ! बाल-सम्बन्धिनौ एतौ अकुशलमाला-स्पर्शनौ क्व यास्यतः ?" गुरुराह- "पुनस्तथाविध-संसारिजीवानाश्रित्य स्थास्यत इति" ।

## अप्रमादयन्त्रम्

राजोचे- "स्वामिन् ! कथमेतौ सर्वथा दूरं व्रजेताम् ?" गुरुभिरुक्तं- "यदा अप्रमादयन्त्रे निक्षिप्य पील्यते तदा वियुज्येतां," राजाऽऽह- "किं तदप्रमादयन्त्रं ?" गुरुराह- "श्रृणु तत्स्वरूपम्, हिंसा-मृषावाद-स्तेयाऽ ब्रह्म-परिग्रहाणां सर्वथा वर्जनं, धर्मोपकरण-देहादावपि ममत्वत्यागः, रात्रिभोजनवर्जनं, संयम-यात्रार्थं विशुद्धोञ्छादानं, समितिपञ्चक-गुप्तित्रया-ऽवहितत्वं, नानाभिग्रहधारित्वं, कुमित्र-सङ्गत्यागः, औचित्याऽनतिक्रमः, लोकप्रवाहानपेक्षा, गुरुजनबहुमानः, गुरुनिर्देशपारतन्त्र्यं, सिद्धान्तश्रवणं, द्रव्यादिपदार्थेषु धैर्यावलम्बनं, सद्यश्चित्तविस्रोतसिका-निवृत्तिर्निःसङ्गता, परमात्मध्यानं, योगाभ्यासः देहात्मनोर्भेदविज्ञानं इत्याद्यनेकावयवोपलक्षितं अप्रमादयन्त्रमभिधीयते ।"

अथैतदाकर्ण्य मनीषी गुरुं प्रत्याह- "स्वामिन् ! तदप्रमादयन्त्रं मह्यं प्रसादी-क्रियताम्," इत्याकर्ण्य नृपो मनीषिमुखं विलोक्य गुरुं प्रपच्छ- "भगवन् ! कोऽसौ ?" गुरुराह- "यथा त्वमत्र नगरे बाह्यो राजाऽसि, तथा त्वत्तोऽप्यधिकबलवत्तमः क्षणार्द्धेन त्वद्राज्यमपहर्त्तुं क्षमः, कर्मविलास-नामाऽन्तरङ्गनृपोऽस्ति, तत्पट्टराज्ञी शुभसुन्दरी, तयोः पुत्रोऽयं मनीषी दीक्षां याचते ।" अत्राऽन्तरे मध्यमबुद्धिर्जगाद- "भगवन् ! अप्रमादयन्त्रं

संयमाऽपरं नाम, तत् तु मद्विधैर्दुर्वहं, ततः श्रावकधर्म उपदिश्यतां मह्यं," तदा राज्ञाऽपि श्रावकधर्मः पृष्ट, गुरुणा च सविस्तरं सम्यक्त्वमूल-द्वादशव्रतरूपः श्रावकधर्म उक्तः, राज्ञा मध्यमबुद्धिना च गुरुमुखेनाऽङ्गीकृतः ।

## साधूनां द्रव्यस्तवे आदेशाभावः, अनुमोदनैव ।

अथ यावद् गुरवो मनीषिणे दीक्षां ददति तावद् राज्ञोक्तं-"स्वमिन्नस्य महात्मनो दीक्षा-महोत्सव-करणे मम मनोरथो महानस्ति, अतो भवदाज्ञा भवति चेत् तदाऽहं महोत्सवं कुर्वे, इति तद् वचसा गुरवो मौनमाधाय तस्थुः, तदा सुबुद्धिमन्त्रिणोक्तं- राजन्! महोत्सवस्तु द्रव्यस्तवस्वरूपस्ततः साधवस्तदादेशं न ददति, केवलं तदनुमोदनमेव कुर्वन्त्यतो नाऽत्र विलम्बः कार्यः । अत्राऽर्थे मनीषी एवाऽभ्यर्थनीयो, राज्ञा प्रणम्य मनीषिणे स्वभिलाषः कथितः, मनीषिणा महोत्सवमनिच्छताऽपि अस्य महाभागस्येच्छा-भङ्गो मा भूदिति विचिन्त्य प्रतिपन्नं तद्वचनम् ।

अथ राज्ञा महाडम्बरेण देवार्चा कारिता, ततो मनीषिणं स्कन्धे निवेश्य स्वयं छत्रधारको जातः । ततो दीयमाने महादाने, वाद्यमानेषु सर्वाऽऽतोद्येषु महानन्दविस्मय-स्मेरलोचनेषु पौरेषु पश्यत्सु महाडम्बरेण स्वगृहमानीतो मनीषी, तदाऽऽगमने च मुक्ता-श्चिरनिगड-बद्धा जनाः, कृताश्चाऽनृणा नगरनिवासिजनाः, सम्मानिताश्च साधर्मिकाः ।

अथ मदनकन्दल्या यथाविधि स्नापितो धृतमहार्घ्यवस्त्रालङ्कारमाल्यो विविधभोज्य-ताम्बूलादिभिः सत्कृतो मनीषी यावत् तत्राऽऽस्ते, अत्राऽन्तरे राजा सुबुद्धिं प्रत्याह-"मन्त्रिन् ! धन्योऽयं मनीषी महानुभावः, यो गुरुवचसा संसारासारत्वं विज्ञाय चारित्रमाद्रियते ।" सुबुद्धिराह- "स्वामिन् ! ये तथाविध-लघुकर्माणो भवन्ति तेषामियं सामग्री सम्पद्यते"। नृपेणोक्तं- "यद्येनं स्त्री-धन-राज्यादिना येन केनोपायेन प्रलोभ्य कियन्ति दिनानि गार्हस्थ्ये स्थापयामः तदाऽहमपि राज्यादि-चिन्तां विधायाऽनेन साकं दीक्षां गृह्णीयाम्" । इति श्रुत्वा पुनर्मन्त्री जगाद- "राजन् ! अयं उत्तमपुरुषः कामभोगादिनिष्पिपासः संसारं तृणीयति, कथमसौ प्रलोभ्यते ? अयं तु त्वत्-प्रार्थना-भङ्गभयादेवेयन्तं कालं प्रतीक्षितः, ततो न युक्तमस्य महात्मनो दीक्षान्तरायकरणम्, इति मन्त्रि-वचोऽङ्गीकृत्य राज्ञा सिद्धार्थनामा नैमित्तिक आकारितः पृष्टश्च दीक्षा-मुहूर्त्तम् । नैमित्तिक आह- "राजन् ! इतो दिनात् नवमे दिने शुक्लत्रयोदश्यां शुक्रवारे उत्तरा-भाद्रपदनक्षत्रे शिवयोगे वृषभलग्नोदये निरवद्यं मुहूर्त्तमस्ति" । इति तद्वचः प्रमाणीकृत्य हृष्टेन राज्ञा महादानपूजादिभिः सत्कारयित्वा विसृष्टः स नैमित्तिकः ।

## मनीषिदीक्षामहोत्सवः, राजादीनां व्रतस्वीकारः ।

अथ द्वितीयेऽहनि पुरान्तश्चैत्येषु महापूजादिभिः अष्टाह्निका-महोत्सवः प्रारब्धः, एवं च क्रमागते मुहूर्त्तदिवसे हस्तिस्कन्धाधिरूढो राज्ञा स्वयं ध्रियमाणेनाऽऽतपत्रेण, वीज्यमानैश्च श्वेतवरचामरैः वाद्यमानै र्नानाऽऽतोद्यैः, परिपतद्भिः समन्ततश्चतुरङ्ग-चमूचक्रैः, ध्वज-तोरण-पुष्प-प्रकरादि-पुर-सुषमया च महर्द्ध्या विस्मय-स्तिमितेषु पश्यत्सु निखिल नागरिकनिकरेषु परमोन्नतिं नीयमाने च श्रीजिनशासने, उप्यमाने चाऽनेक-भद्रक-मनःस्सु बोधिबीजे, निर्मलीक्रियमाणे च सकलार्हत्-सम्यक्त्वे, आनन्दाश्रुप्लुतलोचनैर्भव्य-जनैरभिनन्द्यमानो मनीषी प्राप्तः प्रमोदशेखराभिधानचैत्यं, कृत्वा च तत्र देवार्चां सर्वर्द्ध्या समागतो गुर्वन्तिके, तत्रोन्मुच्य सर्वालङ्कारं व्युत्सृज्य च सर्व-संसार-ममत्वं गुरुमुखेन पञ्चमहाव्रतलक्षणं यतिधर्मं समाददे ।

अथोपविष्टे नृपादि-सकल-सभा-जने तस्य संयम-दृढीकरणाय गुरुभिर्हितशिक्षा ददे । तद्यथा- "अहो भव्या ! अनन्तसुखास्पदं चारित्रमार्गं प्राप्य कः संसारपङ्के निमज्जति यथा साम्राज्य-लाभे कः किङ्करत्वमभिलषति ? ततः सर्वार्थ-संसाधकं चारित्रधर्ममवाप्य सर्वशक्त्या तत्र यतनीयम्" इत्यादि-शिक्षां श्रुत्वा सुबुद्धिमन्त्री नृपं प्रत्याह- "राजन् ! अहो दुर्लभसङ्गोऽयं यत् प्रबोधरति-सदृशा ज्ञाननिधयो गुरवः मनीषिसदृशाः सहायाः, आवयोरपि धर्मकरणोचित-वयः, सुदुर्लभं हि पुनः पुनर्नरत्व-धर्मश्रुति-श्रद्धा-सामर्थ्यलक्षणं धर्माङ्ग-चतुष्टयं, ततो यदि संवेग-निर्वेदौ किमपि भुजालम्बं कुरुतस्तदा आवां अपि संयम-मार्गमाश्रयाव इति मन्त्रि-वचसा प्रवर्द्धितोत्साहो नृपः सुलोचन-कुमारं स्वराज्ये विन्यस्य सप्तक्षेत्र्यां धनं व्ययीकृत्य मदनकन्दली-देव्या सुबुद्धिमन्त्रिणा च सह श्रीगुरुणां पार्श्वे व्रतं जग्राह ।"

अथ एतद्-वृत्तान्त-दर्शनात्-प्रवृद्ध-संवेग-निर्वेदो मध्यमबुद्धिरपि व्रतमाददे । अथ तेषां चतुर्णामपि शिक्षामाह गुरुः- "अहो महाभागा ! यः कुमित्रसङ्गं कुरुते, स बालवद् दुःखपरम्परां लभते, यश्च पण्डितवचसि प्रवर्त्तते स मध्यमबुद्धिवत् कालविलम्बेना-ऽपि धर्मं लभते, ये च मनीषि-प्रायाः उत्तम-पुमांसः ते तु स्वाभाविक-स्वबुद्ध्यैवा-ऽनर्थकारणं मत्वा दुर्जनसङ्गं परिहृत्य जगतः प्रशंसास्पदं भवन्ति, ततो हितैषिभिर्युष्माभिः कुसङ्गत्यागेन सत्सङ्गतिः कार्या, येनेह-परत्र च कल्याणभाजो भवेत्" इत्यादि, ततो बहुकालं यावत् सदागम-विधिना चारित्रं प्रपाल्य केवलमुपार्ज्य मुक्तिं प्राप्तो मनीषी, अन्ये चत्वारोऽपि देवलोकं गताः । बालस्तु पापमित्रसङ्गाच्चिरं कुयोनिषु दुःखपरम्परां प्राप्तः इति स्पर्शन-कथानकं समाप्तम्।

## नन्दिवर्धनस्य वैश्वनरत्यागे अरुचि ।

संसारि जीवो वक्ति-हे अगृहीतसङ्केते ! इमां वार्त्तां कथयित्वा विदुरेण पृष्टं- "हे नन्दिवर्धन ! कीदृशी वार्त्तेयं ?" मयोक्तं- "हे विदुर ! समीचीना इयं वार्त्ता ।" विदुरः प्राह- भो मित्र ! अस्याः कथायाः श्रवणस्य साफल्यं तर्हि यदा कुमित्रसङ्गः परिह्रियते तदा ।" मयोक्तं वरम्, अतः परं कुमित्रसङ्गो मया न करिष्यते" इति वाक्यात् प्रहृष्टो विदुरः प्रस्तावं विज्ञाय मां प्रत्याह- "हे मित्र ! लोकमुखात् मया एवं श्रूयते- यत् नन्दिवर्धनो वैश्वानराख्य-पापमित्रेण सहाऽनिशं मिलति ततस्तस्य दुरात्मनः सङ्गस्त्वया हेय इति ।" अथैवं शिक्षां ददानं विदुरं विज्ञाय वैश्वानरेण क्रूरचित्ताभिधं योगवटकं मम प्रदत्तं, तदनुभावात् प्रचण्डीभूतेन मया सक्रोधं विदुरं प्रति "अरे दुरात्मन् ! त्वं किं मां बालसदृशं मम परममित्रं वैश्वानरं च स्पर्शनतुल्य मन्यसे इत्युक्त्वा रोषातुरेण चपेटा दत्ता । विदुरस्तु ततः पलाय्य पद्मनृपान्तिकमागत्य तथाविधं सर्वं मम दुष्टाचरितं कथयति स्म । राजाऽपि तदाकर्ण्य विलक्ष्यचित्तस्तस्थौ ।

## कनकशेखरवृत्तान्तः ।

अथ कियन्ति दिनानि कलाचार्यगृहे कलाभ्यासं कृत्वा गृहमायातोऽहं समुद्भिन्ननवयौवनः पुण्योदय-साहाय्यात् मनोभिलषित-सुखानि व्यलसम् । अथैकदा कुशावर्त्तात् मम मातुलस्य कनकचूडस्य पुत्रः कनकशेखरः पितुः सकाशाद् नष्ट्वा अत्रायातीति लोकमुखाद् विज्ञाय तदभिमुखं गतोऽहं, बहुधा प्रवेशोत्सवाडम्बरेण समानीतश्चाऽसौ स्व-सद्मनि समालिङ्गितश्च नन्दा-राज्ञी-पद्मनृपाभ्यां प्रमुदिश्च सर्वः स्वजनवर्गः, पृष्टं चाऽन्योऽन्यं स्वागतं "वत्स ! त्वदागमनेनाऽतिसन्तुष्टा वयं, ततोऽत्र स्थीयतां सुखेनेति" मत्पितुः पद्मराज्ञो वचसा स्थितस्तत्र कनकशेखरः ।

अथैकदा मया कनकशेखरः पृष्टः "भ्रातः ! किं तव पित्रा सह रोषकारणमिति ? तदा कनकशेखरः प्राह- "एकदाऽहं मित्रगणवृतः क्रीडार्थमुद्यानं गतस्तत्रैकस्य तरोस्तले वीरासीनमेकं मुनिं विलोक्य तत्-पादौ प्रणम्य सवयस्यो निविष्टस्तत्र, मुनिना च धर्मलाभेति आशीर्वचो दत्त्वा मदनुग्रहबुद्ध्या साधु-धर्मः श्रावकधर्मश्च कथितः, तद्-वचसा प्रबुद्धेन मया साधु-धर्मं दुष्करं मत्वा श्रावकधर्मस्तन्मुखेनाङ्गीकृतः । पुनः साधुं नत्वा स्वं धन्यं मन्यमानो गृहमायातः ।

अथ तदनन्तरं पुरनिवासि-श्राद्धजनानां सर्वं राजदेयं करादि मया मुक्तं, यं यं धर्मिणं जानामि तं तं स्वबन्धुवद् गणयामि, इत्थं च बुहुधा शासनोन्नतौ मया क्रियमाणायां

अनेके जनाः श्रावकत्वं प्रपेदिरे, ते च मयाऽकरदाश्चक्रिरे । अथ मत्-पितुः पुर एको दुर्मुखनामा सचिवोऽस्ति, मद्-वृत्तान्तादतिखिन्नेनाऽसहिष्णुना तेन राज्ञः पुरः प्रोक्तं- 'राजन् ! सर्वं राज्याधिकारं पुत्रे निवेश्य त्वं तु निश्चिन्तस्तिष्ठसि, परं त्वत्-पुत्रेण तु सर्वोऽपि पौरजनः कररहितः कृतः, इत्थं च कोशाभावे कथं राज्यस्थितिश्चलिष्यति ?' इत्याद्याकर्ण्य राज्ञा दुर्मुखं प्रत्युक्तं- 'रहसि गत्वा त्वया कुमारं प्रति शिक्षा वाच्येति ।' अथ तेनागत्य मां प्रत्युक्तं- 'यत् न युज्यते लोकानां करनिवारणमित्यादि । तदाकर्ण्य मयोक्तं- 'मन्त्रिन् ! किमेवं वदसि ? करदण्डगृहणादि तु अन्यायिजनेभ्य एव राज्ञा कर्त्तुं युक्तं, न पुनर्धर्मिन्यायिजनेभ्यः । यतो 'दुष्टस्य दण्डः सुजनस्य पूजेति' राज्ञां धर्मः, इत्यादि-मद्वाक्यै-र्निरुत्तरीभूतो दुर्मुखो विलक्षः सन् 'कुमार ! मया तु तव धर्मस्थैर्याव-लोकनार्थमित्थमुक्तं परं साधुः ते धैर्यमित्यादि'-कपटस्तुतिं कृत्वा यथागतं गतः।

अथ ये मया करमुक्ताः कृताः सन्ति तान् स्वगृहे समाकार्य बहुधा भयं दर्शयित्वा स दुर्मुखो दुरात्मा तेभ्यो दण्डादिकं गृहीत्वा पुनस्तान् वारयति 'रे रे ! यः कश्चन कुमारस्याऽग्रे पूत्करिष्यति तमहं बहुधा विडम्बयिष्यामीति' तद्-वाक्याद् भीतास्ते तुष्णीमेव तिष्ठन्ति । अथ तद्दुर्मुखस्य दुश्चरितं चतुर-नाम-दूत-द्वारा मया ज्ञातं चिन्तितं च यदुताऽसौ दुर्मुखो मदुपरि भूय मत् सम्मानितानपि श्राद्धान् दण्डयति तन्नूनमसौ पित्राऽप्यस्य कार्येऽनुमतो दृश्यते, तदस्मै कर्मकराय दुर्मुखाय किं क्रुध्यामि ? परं चेत् पिता मत्तोऽपि द्रव्यं बहु मन्यते, तत्-किमत्र स्थितेन मेऽकिञ्चित्करस्येति रोषं मनस्याधाय स्वपरिच्छदपरिवृत्तस्तातमनापृच्छ्य निर्गतोऽहं क्रमेणेहाऽगतं इदं मे रोष कारणम्," इति तत् सम्बन्धं श्रुत्वा मयोक्तं- "भ्रातः ! युक्तं कृतमेतत्, यतो मानिनां सर्वतोऽपि मानरक्ष-णमेव श्रेयः ।"

## कनकशेखरस्य पितुः पार्श्वे गमनम्, मार्गे युद्धः विजयः ।

अथाऽन्यदा कनकचूडनृपस्य सुमति-वराङ्ग-केशरि-नामानस्त्रयोऽमात्याः सभायामागत्य नृपं कनकशेखरं च नत्वा नृपादिष्टासने उपविश्य कनकशेखरं प्रति इति व्यजिज्ञपन् "भो कुमारशेखर ! भवतः प्रस्थानानन्तरं भवद्-वियोग-शोकाग्नि-दग्धेन कनकचूडनृपेण सखेदं त्वत्-कोपकारणं जिज्ञासता सर्वमेतद्-दुर्मुखस्य दुर्विलसितमिति कस्यचित् मुखादवगत्य सञ्जात-महानुशयेन दुर्मुखः सपरिजनः स्वदेशात् निष्कासितः, पश्चात् चतुरदूतवाक्यात् त्वामत्रागतं ज्ञात्वा, त्वद्-विरहासहेन पित्रा त्वद्दर्शनावधि भोजनस्य नियमो गृहीतः । पुनः अत्राऽन्तरे विशालानगर्यां नन्दननृपस्य द्वे पट्टराज्यौ

प्रभावती-पद्मावत्यौ, तयोः कुक्षिजाते क्रमेण विमलानना-रत्नवत्यभिधे द्वे कन्यके स्तः, तयोर्मध्ये या विमलानना सा स्वमातुः प्रभावत्या भ्रातृव्याय कनकपुरेश-प्रभाकर-नृपाङ्गजविभाकरनाम्ने बाल्ये दत्ताऽभूत्, ततः कदाचिद् विमलाननया कनकशेखरस्य गुणाः श्रुतास्तेन सा कनकशेखरे जातानुरागा सती पितरौ प्रति तद्विषयं स्वाभिप्रायं ज्ञापयति स्म । तस्यास्तं निश्चयं मत्वा पितृभ्यामपि तथा प्रतिपन्नं, तदा रत्नवत्यपि विमलानना-स्नेहेन अहं कनकशेखरस्याऽभीष्ट-मित्रं कञ्चन वृणोमीति प्रतिज्ञातवती।

अथ नन्दननृपेण ते द्वे अपि कन्ये बहुपरिच्छदेन सार्धं विवाहार्थं प्रेषिते क्रमेण कुशावर्त्तं समागच्छत् इत्यादि तयोरागमन-वार्त्तां श्रुत्वा हर्ष-विषादाक्रान्तचित्तेन पित्रा कनकचूडनृपेण त्वदाकारणाय वयं प्रेषितास्ततः पितुः प्राणधारणार्थं विमलानना-विवाहार्थं च शीघ्रं तत्राऽऽगन्तव्यं त्वया, न युज्यतेऽधुना क्षणमपि विलम्बितुमिति तद्वाक्यात् समुत्साहितः कनकशेखरः पितरं पद्मनृपमापृच्छ्य निबिडप्रेम-सक्ततया मामपि सहाऽऽकार्य बहुपरिकरः कुशावर्त्तं प्रति प्रस्थितः, कानिचित् प्रयाणान्यतिक्रान्तानि ।

अथ संसारि-जीवो वक्ति-हे अगृहीतसङ्केते ! अत्रान्तराले यत् ममाऽभूत्तदाकर्णय अस्त्यान्तरङ्गं रौद्रचित्तनगरं, तत्र दुष्टाभिसन्धिः नृपस्तस्य निःष्करुणताख्यदेवी, तयोः सुता हिंसानाम्नी कन्या । अथ पूर्वं तामसचित्त पुराधीशस्य महामोहाङ्गज-द्वेष-गजेन्द्रराजस्य पुत्री अविवेकिताख्या सगर्भा, केनचित् प्रयोजनेन रौद्रचित्तपुरमायाता सती दुष्टाभिसन्धि-नृपगृहे एव वैश्वानराभिधं पुत्रं सुषुवे । स वैश्वानरस्तद्गृह एव पुष्टीभूतः क्रमेणाऽविवेकि-ताप्रेरणादागत्य मां मिलित इति तत् परिचयाद् वैश्वानरेण दुष्टाभिसन्धि-पार्श्वे हिंसानाम्नी तत्-कन्या मदर्थं याचिता ।

## हिंसा-क्रोधप्रभावेण जीवस्य कुचेष्टा

अथैकदा गुप्तवृत्त्या रौद्रचित्तनगरे मां समानीय परिणायिता मे हिंसा, वैश्वानरेण शिक्षितं चाऽस्याः 'प्रमोदोत्पादनार्थं त्वयाऽऽखेटकोऽनिशं सेवनीय' इति । तदङ्गीकृत्य प्रमुदितोऽहं हिंसा-वैश्वानरयोः प्रशंसां कुर्वन् नित्यं पापर्द्धिरसिको जातः । अथैवं मार्गे प्रचलतां अस्माकं विषमकूटः पर्वतः समासन्नः समजनि, तत्र पर्वतेऽम्बरीष-नामानो लुण्टाका वसन्ति, ते च पूर्वं कनकचूडनृपेण बहुशः पराभूताः सन्ति तद्वैरात् कनक-शेखरमायान्तं विज्ञाय ते सर्वेऽपि सम्भूयाऽग्रे मार्गं रुद्ध्वा स्थिताः । अथ तै सह युध्यतः कनकशेखरस्य बलं भग्नं, तदवसरे वैश्वानरेण मम क्रूरचित्ताख्यं योगवटकं प्रदत्तं, तदनु-भावेन हिंसया चोत्कर्षमारोपितोऽहं प्रवरसेननाम्ना लुण्टाकनायकेन सह योद्धुं लग्नः।

पुण्योदयसाहाय्यात् तत्-मुक्तान्यनेकप्रहरणानि वञ्चयित्वा क्षणमात्रेण निपातितो मया स लुण्टाकनायकः हते च तस्मिन् सर्वेऽपि ते चौराः निःस्वामिका मामेव स्वामित्वेन प्रपन्नाः जातश्च जयजयारवः, पुनर्मिलितं सर्वसैन्यम् ।

## विमलाननाऽपहरणं, युद्धे कनकशेखरस्य विजयः

अथाऽविच्छिन्न-प्रयाणैः कतिचिद् दिनान्ते प्राप्ता वयं कुशावर्त्तपुरं कुशलेन ज्ञाताऽस्मदागमनवृत्तान्तप्रमुदितः कनकचूडनृपः सपरिजनोऽभिमुखमागतः, कृतश्च महीयान् प्रवेशोत्सवः, प्रमुदिते च विमलानना-रत्नवत्यौ । अथ महामहपूर्वं कनकशेखरेण विमलानना परिणिन्ये, तदा रत्नवती कनकशेखरस्याऽभीष्टमित्रं मां विज्ञाय मयि कृतोद्वाहनिश्चया मया परिणिन्ये । अथ विवाहानन्तरं द्वितीये दिने विमलानना-रत्नवत्यौ द्वे अपि पुराद् बहिः क्रीडार्थं यावत् उद्याने गते स्तः तावत् पुरमध्ये किञ्चित् परचक्रं विमलानना-रत्नवत्यौ हृत्वा यातीति महान् कोलाहलोऽजनि । तच्छ्रुत्वा कनकचूड-नृपप्रभृतयः सर्वेऽपि वयं प्रबलसैन्यं लात्वा तमनुधाविताः श्रुतं च लोकमुखात्- यत् पूर्वं विमलानना यस्मै दत्ताऽभूत् स विभाकरनृपोऽतुलबलमानीय हरणं कृत्वा यातीति। अथोभयसैन्ययोः सञ्जातः सङ्गमः, प्रारब्धं रणम्, अथ तावत् विभाकरस्य मित्रं कलिङ्गाधिपतिः समरसेनाख्यः शस्त्रनिपातैः अस्मत्सैन्यं शतधाविभजन् ममाभिमुखं योद्धुमागतः । स च मया हिंसा-वैश्वानरो-त्साहितेन खड्गघातेन निपातितः । अत्राऽन्तरे विभाकरस्य मातुलो बङ्गाधिपति र्द्रुमराट् कनकचूडनृपेण सह युद्धन् मयाऽन्तराले निपत्य सोऽपि कृतान्ततिथीकृतः । अथ विभाकरः कनकशेखरेण युद्धं कुर्वन् कनकशेखर-कृतप्रहारार्दितो मूर्च्छामवाप्य भूमौ पपात, तत् सैन्यं तु सर्वं कान्दिशीकमितस्ततः पलायितम् अथ विभाकरं शीतोपचारैः सज्जीकृत्य कनकशेखरः प्राह- "अहो वीर ! साधु साधु ते शौर्यम् " ततः प्रगुणीभव पुनर्युद्धाय सम्यगद्य दोर्दण्डकण्डूमपनयाव इत्यादि, तत् निशम्य विभाकरः कनकशेखरस्य पादयोर्निपत्य आह- अहो महाभाग ! त्वयाऽहं रणे जितः, परं च मृतावस्थोऽपि सज्जीकृतस्ततस्त्वं प्राणदाता मे स्वामी, अहं त्वद्यप्रभृति तव सेवकोऽस्मीति ।"

अथ निवृत्तः समरः, प्रहर्षिताः सर्वे कनकचूडादयो मङ्गलनिःस्वनानि वादयित्वा विमलाननां कनकचूडनृपरथे रत्नवतीयुतो रथादिरूढः स्वसौधं प्रति यावद् वलितस्तावत् कनकचूडनृपाङ्गजा मलयमञ्जरी-कुक्ष्युद्भवा कनकमञ्जरीति नाम्नी स्वसौधाग्रगवाक्षस्था मया दृष्टा, तयाऽप्यहं दृष्टः अथ परस्परालोकनादावयोर्मिथो मनसी स्नेहरसाविद्धे अभूतां,

तथापि विज्ञातमच्चित्ताकूतेन तेतलिसारथिनाऽन्योक्तिभिः प्रबोधितोऽहं गृहमायातः, परं सा रात्रिः कनकमञ्जरीविरहार्दितस्य मम नारकस्येव युगप्रमाणा जाता । अथ कथञ्चित् प्रभाते जाते प्रमुदितस्तेतली समागत्य मामित्युवाच "कुमार ! मा कुरु शोकं फलितं ते मनोरथैः, यतः कपिञ्जलानाम्नी गणिका कनकमञ्जर्याः धात्री आस्ते, तन्मुखात् मया ज्ञातं यत् त्वदालोकनप्रभृति नितान्त-शोकपीडितां कनकमञ्जरीं म्लानपद्मिनीमिवालोक्य सखीमुखेन त्वय्यभिलाषिणीं च विज्ञाय पितृभ्यामपि नन्दिवर्धनायेयं देयेति निश्चितमस्तीति ।" अथ तदैव विमलनामाऽमात्यः समागत्य मां प्रणम्य च प्राह- "भो कुमार ! कनकचूडनृपो मन्मुखेनेति भाषयति यत् प्रथमं मणिमञ्जरी भवतो मित्रेण शीलवर्धनेन परिणीताऽस्ति परं सम्प्रति तस्या भगिनी कनकमञ्जरी भवते प्रदत्ता, तदङ्गीकरोतु पाणिग्रहणेन भवान्" इत्युक्त्वा शीघ्रं विवाह-सामग्रीं कृत्वा परिणायिता मे कनकमञ्जरी । अथाऽहं रत्नवती-कनकमञ्जरीभ्यां सहेप्सितभोगान् भुञ्जानः कियन्ति दिनानि तत्रात्यवाहयम् ।

## नन्दिवर्धनः हिंसा-वैश्वानरौ न त्यजति ।

अथ विभाकरोऽपि घातजर्जराङ्गः कनकचूडनृपेणोपचारार्थं रक्षितोऽस्ति । तत्र तिष्ठताऽनेन सार्धं मम मैत्री बभूव । कियद्दिनातिक्रमे सज्जीभूतोऽसौ कनकचूडनृपेणातिसन्मानितः स्वदेशं ययौ । अथैकदा मां मृगयासक्तं विज्ञाय कनकशेखरो मदुपदेशाय पर्षदि कनकचूडनृपमुखेन हिंसा-वैश्वनरदोषानकथयत्, तदाकर्णनमात्रात् प्रवृद्धकोपेन मया छुरीमाकृष्य प्रोक्तं- 'रे ! रे ! कनकचूड! रे रे ! दुरात्मन्! कनकशेखर ! युवां मम परमोपकारिणोर्हिंसा-वैश्वानरयोर्निन्दां कुरुथः परं यदि हिंसा-वैश्वानरौ नाऽभविष्यतां तदा युवामपि अद्य यावत् कुतोऽभविष्यतं ? आगम्यतामद्याऽपि बलावलेपश्चेद् दर्शयामि भवतोः पाण्डित्यम्" इति कोपकरालं मां वीक्ष्य सभाजनो भीतः सर्वोऽपि पलायितः प्रबलपुण्योदयं नृपं कुमारं च प्रत्यकिञ्चित्करोऽहं सरोषः स्वगृहमायातः । ततः प्रभृत्ययोग्योऽयमिति नृपादिभिरुपेक्षितः स्वगृह एव स्थितः, एवं कियत्सु वासरेषु गतेषु अन्यदा जयस्थलपुरादायातो दूतो मां नत्वा उवाच- "देव ! वङ्गाधिपतिर्यवनो नृपः प्रबलसैन्यमादायागतो जयस्थलं वेष्टयित्वा स्थितोऽस्ति, लोकस्तु दैवशरणो भूत्वा सर्वोऽपि दुर्गरोधे स्थितोऽस्ति, ततो मतिधन-बुद्धिविलासमन्त्रिभ्यां पितरमनापृच्छ्यैवाऽहं भवदाकारणार्थं प्रहितोऽस्मि । ततोऽतिसत्वरमेवाऽऽगन्तव्यं भवता क्षणार्धमपि नोचितो विलम्ब इति" तत् वाक्याज्जातामर्षः कनकमञ्जरी-रत्नवत्यादि सर्वं स्वपरिजनमादाय कनकचूड-नृपादीनापृच्छ्यैव प्रस्थितः स्वपुरं प्रति, क्रमेण पुरोपान्तमागत्य रणाङ्गणे

पुण्योदय-साहाय्यात् यवननृपं निहत्य च जयलक्ष्मी लभे स्म । क्रमेण महोत्सवैः सार्धं कृतपुरप्रवेशो मातृ-पितृ-प्रभृति-स्वजनवर्गं प्रति मिलितः, प्रवर्धितश्च पुरमध्ये प्रमोदः, प्रसृतश्च मम विजयकीर्त्तिवादः सर्वासु दिक्षु । शृणु अगृहीतसङ्केते ! संसारिजीवो वक्ति -तदा यत् मया प्रवरसेन-समरसेन-द्रुम-यवन-प्रभृतयो महाप्रत्यर्थिनो निहताः यत् च रत्नवती-कनकमञ्जर्यौ परिणीते, यद् दिगन्तप्रसर्पिविजयवादश्चाऽभवत् तत् सर्वमपि पुण्योदय-सान्निध्यात् जातं, परं मया पुण्योदयं विस्मार्य हिंसा-वैश्वानर-प्रसादात् सर्वमेतत् मयाऽभूदिति ध्यातं तेन दिने दिने हिंसा-वैश्वानरयोरत्यासक्तोऽभूवम् ।

अथैकदाऽहं सभावसरे मृगयां गतस्तदा पित्रा पद्मनृपेण विदुरं प्रत्युक्तं- "हे विदुर! याहि विलोकय अद्य नन्दिवर्धनः सभावसरे कथं नाऽऽयातः ?" इति नृपादेशाद् विदुरेण बहिर्गत्वा समाचारं प्राप्य पुनरागत्य नृपं बभाषे- "देव! अयं नन्दिवर्धनस्तु नित्यमाखेट-कार्थं याति । अद्य तु सभावसर एव गतोऽस्तीति श्रुत्वा जातखेदेन नृपेणाऽन्येद्यु र्बहुधा वारितोऽपि नाऽहं मृगयामत्यजं, पुनः पित्रा जिनमतज्ञमाकार्य पृष्टं- "यत् नन्दिवर्धनो हिंसां कदा त्यक्ष्यति ?" तेनोक्तं-चित्तसुन्दरपुराधीश-शुभपरिणामराजस्य चारुतादेवी, तयोः पुत्रीं दयां परिणेष्यति तदा हिंसा दूरीकरिष्यति, परं ता तु क्षमामिव कालादि-सामग्रीमवाप्य लप्स्यते नाऽधुना इत्यलं त्वत्खेदेन" इत्याकर्ण्य पिताऽपि शिक्षाविधौ मामुपक्षते स्म ।

### नन्दिवर्धनेन कृता पित्रादीनां हिंसा, कारागृहे पूरणम् ।

अथैकदा पित्रा महामहेनाऽहं युवराजपदेऽभिषिक्तस्तदवसरे च शार्दूलपुरेश-स्याऽरिदमननृपस्य स्फुटवचननामाऽमात्यः सभायामागत्य नृपं व्यजिज्ञपत्- "स्वामिन्! मद्राज्ञा त्वत्पुत्र नन्दिवर्धनगुणाकर्णनात् जातस्पृहेण स्वपुत्र्या मदनमञ्जुषाया नन्दिवर्धनेन सह विवाहं कर्त्तुमहं प्रेषितोस्मीत्याकर्ण्य प्रमुदिताः पित्रादयो यावत् तत् प्रमाणीकुर्वन्ति, तावता मया पृष्टोऽसौ स्फुटवचनो यत्- "इतः कियन्ति योजनानि भविष्यति शार्दूलपुरम् ?" तेनोक्तं- "योजनानां सार्धे द्वे शते ।" तदा मयोक्तं- "क्रोशोने सार्धे द्वे शते," पुनस्तेनोक्तं- "पूर्णे सार्धे द्वे योजनशते" इत्यादि-विवाद-वचनैः प्रादुर्भूत-वैश्वानर-प्रेरणया हिंसाप्रोत्साहितेन मया क्रोधान्धीभूय खड्गमाकृष्टं, तदा पुण्योदयस्तु मामयोग्यं निर्गुणं विज्ञाय दूरं ययौ, खड्गप्रहारेण हतस्तदा स्फुटवचनः, तद् दृष्ट्वा सहसा सिंहासनादुत्थाय पिता मा मेति जल्पन् मत्पार्श्वमागतस्ततो मया ध्यातं अहो पिताऽपि मद्वैरिणः पक्षपातं करोति, तदेनमपि हन्मीति क्रोधात् मारितस्तातोऽपि । अत्रान्तरे कोलाहलश्रवणात् हा हेति जल्पन्ती नन्दा माता समागत्य मम हस्ते विलग्ना, साऽपि कृपाणघातेन विदारिता, तावता मत्परममित्रं शीलवर्धनस्तत्पत्नी मणिमञ्जरी,

मत्प्रिया रत्नवती चाऽऽगताः, ते त्रयोऽपि मारिताः, अथ मत्प्राणप्रिया कनकमञ्जरी मां वारयितुमागता, साऽपि निपातिता, इत्थं च ये केचन बान्धव-प्रधानादयस्तत्राऽऽयातास्ते सर्वेऽपि पञ्चत्वं प्रापिताः । एवं क्रोधान्धोन्मत्तीभूतः चलितोऽहं गलितशिरोवेष्टनः पतितोत्तरीयकः, श्च्युतपरीधानो, विगतवसनो, विकीर्णमूर्धजः, पिशाच इव निर्गतः पुरमध्ये । तथाविधं मां वीक्ष्य जहसुः पौरडिम्भाः, पुनः खड्गमुद्गम्य तान् हन्तुं धावितोऽहम् तदा बहुर्भिर्योधैः सम्भूय यष्ट्यादिभिर्निहत्य भूमौ पापितः, खड्गं गृहीतं, निबिडबन्ध-नैर्बद्ध्वा अन्ध-कारायां क्षिप्तः, तत्रैकमासं यावत् क्षुधा-तृषाबाधितो भृशं दुःखार्त्तः कपाटयोः शीर्षमास्फोटयन्नपि न केनाऽपि निष्काशितः ।

## नन्दिवर्धनस्य कारागृहात् पलायनम्, विविधकदर्थनाः

एकदाऽतिश्रान्तस्य मे रात्रौ निद्राऽऽयाता, अत्राऽन्तरे दैवयोगात् मूषकैः पाशरज्जु कल्पिता, ततः प्रबुद्धोऽहं विगतबन्धनः सहसोत्थाय कपाटमुद्घाट्य निर्गतो बहिर्दृष्टा[१] च भूयसी पाश्चात्य रात्रिः, तदा प्रसुप्तेषु पौरेषु क्रोधात् स्थाने स्थाने वह्निं दत्त्वा समस्त-नगरदाहोपायं कृत्वा पलायितः । ततो गतः क्वाऽप्यटव्यां पतितः । तत्र चौरधाट्यां तैर्बद्ध्वा नीतोऽहं पल्लीपतिपार्श्वं, तेन मां दृष्ट्वा प्रोक्तं- "महाक्रूरोऽयं दृश्यते, ततो निबिडं बद्ध्वा रक्षणीयः, समये बब्बरकूले विक्रेष्यते" इति नियन्त्र्य रक्षितस्तैः ।

अत्राऽन्तरे विभाकरनृपसैन्येन सा पल्ली भग्ना, गृहीतश्च लुण्टाकैस्सहाहमपि, लुण्टितं तेषां धन-गोधनादिकं, क्रमेण स्वपुरमागत्य दर्शितं सर्वमपि प्रत्याहृतधनादिकं सैनिकैर्विभाकरनृपाय । अत्राऽवसरे दृष्टोऽहं चौरगणमध्यस्थो विभाकरनृपेणोपलक्षितश्च नन्दिवर्धनोऽयमिति । अथ तेन पृष्टं- "भ्रातः ! नन्दिवर्धन ! केयं तवाऽवस्था ? कुतस्त्व-मीदृग् सङ्कटे पतितः ?" इत्युक्त्वा बन्धनादुन्मोच्य स्वस्थीकृत्य च पृष्टो व्यतिकरं, मया-ऽपि कथितं सर्वं स्ववृत्तान्तं, तच्छ्रुत्वा महादुःखं धृत्वा विभाकर आह- "हा हा भ्रातः! महाननर्थोऽयं कृतस्त्वया" इति तद्वाक्यात् पुनर्मच्चेतसि वैश्वानरो दिदीपे, तद्वशाद् विभाकरं हन्तुमिच्छन्नपि समीपे तु शस्त्राभावाद् विलक्षीभूय स्थितः[२] । अथ विभाकरो मद्वैलक्ष्यं लक्षयित्वा तां वार्त्तां विहाय मां गृहे नीत्वा तैलाभ्यङ्ग-स्नानादि कारयित्वा प्रवरवस्त्रालङ्कारादिपरिधाप्य चाऽर्द्धासने न्यवेशयत् । तत्र सुखवार्त्तासु क्रियमाणासु मुहूर्त्तादनु भोजनावसरे जाते कृतभोजनौ यावदावां सुखगोष्ठीं कुर्वाणौ स्थितौ स्वस्तावत् मतिशेखराख्यः प्रधानः समागतो, मदागमप्रहृष्टं विभाकरं वीक्ष्य मां प्रति प्राह- "हे

---

१. L 1 V संशो. । २ईढा-V मूल L२ ॥

नन्दिवर्द्धनकुमार ! अयं विभाकरनृपः पितृ-मरणदिनादारभ्याद्ययावदत्यन्तं पितृविरह-दुःखार्दितः क्षणमात्रमपि न रतिं लेभे । परं भवदागमनादतिप्रहृष्टमना अद्य पितृदुःखं विसस्मार, तदा विभाकरोऽपि साश्रुनेत्रः प्राह- ''भ्रातः! पितृवियोगार्त्तस्य मे त्वमेवाऽधुना पितृकल्पश्चित्तालम्बनस्थानं, ततोऽद्यप्रभृति त्वयाऽत्रैवस्थेयम् । एतत् सर्वं राज्यादि परिपालय, अहं तु त्वदाज्ञाकरोऽस्मि इत्यादि तद्वाक्यानि स्नेहसान्द्राण्यपि मया वैश्वानर-वशेन कपट-जल्पितानि मेनिरे, न पुनस्तद्गुणलवोऽपि मच्चेतसि प्रत्यभासि । अथ नानागोष्ठीरसेन दिवसोऽतिक्रान्तः, सञ्जाते च शयनावसरे सभां विसृज्यैक-पल्ल्यङ्केऽहं विभाकरश्च द्वावपि प्रसुप्तौ। यावद् विभाकरो निद्रामितस्तावता पूर्वोत्पन्नरोषात् खड्गेन तच्छिरश्छित्त्वा प्रणष्टोऽहं क्रमेणाऽटवीमुल्लङ्घ्य कुशावर्त्तपरिसरे व्रजन् तत्पुरलोकै-र्दृष्ट्वा उपलक्षितो नन्दिवर्द्धनोऽयमिति, उक्तं च तैर्नृपाय, तदाकर्ण्य कनकचूड-कनकशेखरौ मामनु समागत्य उचतुः- ''भो नन्दिवर्धन ! केयं तवाऽवस्थेति ?'' मयाऽपि सर्वं पूर्ववृत्तं, भाषितं, तच्छ्रुत्वा कनकशेखरेणोक्तं- ''यः क्रोध-हिंसानुगः स्यात् तस्यैवंविधैवावस्था स्यादिति, ततः क्रुधा ज्वलितेन मया कनकशेखरस्य कटिप्रदेशात् छुरीमाकृष्य यावत् हन्तुं प्रचक्रमे, तावता कयाचित् देवतया स्तम्भयित्वाऽम्बरीष-पल्ल्यां मुक्तोऽहं, अथ तेऽम्बरीषभिल्लाः पूर्वं मत्सेवकीभूताः मां दृष्ट्वा सादरं प्रणम्य सिंहासने निवेश्य कृताञ्जलय एकाकित्वकारणं पप्रच्छुः । उक्तं च मया यथावृत्तं, तैः शिरो धूनयित्वा अहह महदसमञ्जसजातमित्युक्तं, ततो जातकोपेन मया कस्यचित् कटीतटात् खड्गमाकृष्य निहतास्ते बहवः किराताः । अथैवंविधं मां उन्मत्तं विज्ञाय तैर्बहुभिः किरातैः सम्भूय हस्तात् खड्गं पातयित्वा नियन्त्र्याऽहं बहुधा यष्टि-मुष्ट्यादिभिः प्रहतः । पुनः क एनं हत्याकारिणं मारयतीति तैर्निशायां अटवीमुल्लङ्घ्य शार्दूलपुरोपान्ते मुक्तः।

अथ सूर्योदये जाते इतस्ततः पश्यता मया महातिशयवान् स्वर्णपद्मोपविष्टः सुरसमूहसेवितो नित्यवैरैरपि सत्त्वैः शान्तीभूतैः सम्भूय समुपास्यमानो विवेकनामा केवली दृष्टस्तावता सपरिकरोऽरिमर्दननृपः समेत्य मुनिं नत्वोपविष्टः केवलिना देशनाऽऽरब्धा अहो भव्या! अनादौ संसारे जन्तोर्जैनधर्माप्ति-दुरापा ततस्तत्-सम्पदं लब्ध्वा यशाशक्ति तत्पालनोद्योगः कर्तव्यः'' इत्यादि देशनां श्रुत्वा नृपेण पृष्टं-

''भगवन् मया स्वपुत्र्या विवाहकरणार्थं स्फुटवाक् जयस्थले प्रेषितोऽभूत् ततः परं तस्य कश्चिदपि समाचारो मया न लब्धः, तदा तच्छुद्ध्यानयनाय अन्ये सेवकाः प्रेषिताः, तैरागत्योक्तं-'यद् जयस्थलं सर्वं भस्मीभूतं परिसग्रामाण्यपि सर्वाण्युद्वसानि दृष्यन्ते इति तत् पद्मराजादयः सर्वे क्व गता भविष्यन्ति ? को वा पुरदाहकृत् ? ततः केवलिना

दूरस्थितो नियन्त्रितोऽहं राज्ञे दर्शित उक्तं च राजन् ''नन्दिवर्धनोऽयं, अस्य द्वेषगजेन्द्र-पत्नी- अविवेकिता प्रसूतेन वैश्वानरेण सह सख्यमस्ति तथा निःकरुणता-दुष्टाभिप्राययोः पुत्री हिंसा-नाम्नी अनेन परिणीताऽस्ति, ततो हिंसा वैश्वानरयोः पारवश्यादनेनैतन्नगर-दाहादि-दुष्टमाचरितम्'' इत्युदित्वा सर्वं मद्वृत्तं प्रकाशितं, पुनः नृपेण पृष्टं-स्वामिन् !

## विवेककेवलिदेशना, कुटुम्बत्रयपरिचयः

अस्य हिंसा-वैश्वानराभ्यां कियत्कालीनः सम्बन्धोऽस्ति ?'' केवल्याह- ''असंव्य-वहारपुरादारभ्याऽनन्तकालीनः सम्बन्धोऽस्ति परम् अत्र भवे तु प्रत्यक्षतया दृश्यते । नृपः प्राह- ''स्वामिन् ! पूर्वं त्वसौ शूरः पराक्रमी जितकाशीत्यादि-गुणवान् श्रुतोऽभूत् ।'' केवल्याह- ''पूर्वं त्वस्य पुण्योदयः सहायोऽभूत्, तदनुभावाद् विरूद्धाचरितमपि गुणायाऽभवत्, परं स्फुटवाक्मारणावसरे दूरीभूते पुण्योदये इमामवस्थां प्राप्तः'' । पुनर्नृप आह- ''स्वामिन् ! अन्यस्याऽपि कस्यचित् हिंसा-वैश्वनराभ्यां सम्बन्धो भविष्यति ?'' केवल्याह- ''सर्वेषामपि संसारिजीवानां तारतम्येनेमौ सम्बन्धिनौ स्तः, यतो जीवमात्रस्य सर्वस्य त्रीणि त्रीणि कुटुम्बानि सन्ति, तद्यथा- क्षमा-मार्दवा-ऽऽर्जवा-ऽऽकिञ्चन्य-ज्ञान-दर्शन-चारित्र-सत्य-शौच-तपः-सन्तोष-प्रभृतयः स्वाभाविकमान्तरङ्गं प्रथमं कुटुम्बं जीवस्य मुक्तिप्राप्तिहेतुः । तथा क्रोध-मान-माया-लोभ-राग-द्वेषा-ऽज्ञान-भय-शोक-प्रभृति स्वाभाविकमान्तरङ्गं द्वितीयं कुटुम्बं, तच्च अभव्यानामनाद्यनन्तं भव्यानां चाऽनादिसान्तं संसारदुःखहेतुः । तथा मातृ-पितृ-स्त्री-पुत्रादयस्तृतीयं बाह्यकुटुम्बं प्रतिभवं नव-नवम् । अथ यः संसारिजीवो बाह्यकुटुम्बपोषणार्थं द्वितीयकुटुम्बेन सह मैत्रीं कृत्वा प्रथमकुटुम्बमवगणयति स भवदुःखपरम्परामनुभवति, परं यस्त्वासन्न-भवसिद्धिको भवति स तु स्ववीर्योल्लासेन द्वितीयं तृतीयं च कुटुम्बं सर्वथा दूरीकृत्य प्रथमकुटुम्बं समादृत्य महानन्दपदभाग् भवति ।

अथैतदाकर्ण्य नृपः प्राह- ''स्वामिन् ! प्रथमकुटुम्बं कथं मिलति ?'' केवल्याह- ''यः साधुवत् निर्दयीभूयाऽप्रमत्तः सन् प्रथमकुटुम्बेन द्वितीयं कुटुम्बं निहन्ति,- तद्यथा- ज्ञानाऽस्त्रेण महामोह-पितामहं निपातयति, वैराग्ययन्त्रेण रागं पीलयति, मैत्रीबाणेन द्वेषं भिनत्ति, क्षमाक्रकचेन क्रोधं विदारयति, तथा मार्दवखड्गेन मानं खण्डशो विधाय हस्तावपि न प्रक्षालयति, आर्जवदण्डेन मायां सञ्चूर्णयति, आकिञ्चन्यकुठारेण लोभं घातयति, तत्त्वदृष्टिचिप्पटिकया मदनं मत्कुणमिव मृद्नाति, ध्यानानलेन शोकं प्रज्वालयति, धैर्यकुन्तेन भयं विध्यति, तथा हास्य-रत्यरति-जुगुप्साः विवेकशक्त्या पिनष्टि, पञ्चापीन्द्रियाणि सन्तोषमुद्गरघातेन शातयति । इत्थं प्रथमकुटुम्बेन द्वितीयं

कुटुम्बं मूलतोऽपि हत्वा निर्घृणं कर्म कुरुते तस्य प्रथमं कुटुम्बं प्रबलीभूय सकलार्थं साधयति।'' इत्याद्याकर्ण्य पुनर्नृपेण पृष्टं- ''स्वामिन्! एतदुपायं निरुपय ।'' केवल्याह- ''प्रथमस्तृतीयमनित्यं कुटुम्बं परिहृत्य पश्चात् द्वितीयकुटुम्बं शनैः शनैर्दूरीकृत्य प्रथम-कुटुम्बं प्रबलीक्रियते ।'' इत्यादि-तदुपायं श्रुत्वा संसारस्वरूपमसारं परिभाव्य धर्ममार्गं च सुरेन्द्रादिपदेभ्योऽपि दुःष्प्रापं मत्वा *श्रीधर*कुमारं राज्येऽभिषिच्य विमलमत्यादिबहुपुरुषैः सार्द्धं अरिदमननृपो दीक्षामाददे ।

अथ नृपदीक्षावसरे ये केचिद् गुरुकर्माणोऽधमा विषयलम्पटा हीनसत्त्वास्ते तु नृपो बलात्कारेण संयमं ग्राहयिष्यतीति भिया कान्दिशीकाः पलायिताः, केचिच्चाऽ-वाङ्मुखीभूय स्थिताः । अहं तु दीक्षावसरे नृपेण बन्धनात् मोचितः ।

## संसारिजीवस्य भ्रमणम्

अथ पुनरपि देशनां दत्त्वा राजर्षिप्रमुखमुनिगणवृतो विवेककेवली अन्यत्र विजहार, सभालोकाश्च सर्वे स्वस्वस्थानं जग्मुः । हे अगृहीतसङ्केते ! संसारिजीवो वक्ति- तदा मयैवं चिन्तितं- यदयं मम निन्दाकारकः केवली दूरगतस्तद्भव्यं जातमिति, न च वैराग्यलेशः समुत्पादि । अथ ततोऽहं चलितः कियन्तीं भुवं यावद् गतः तावद्-*विजय*-पुरेशशिखरिनृपपुत्रो धराधराभिधो मादृशो हिंसा-वैश्वानरदोषात् पित्रा बहिष्कृतो मम मिलितः, मया मार्गं पृष्टोऽप्यसौ वैश्वानर-पारवश्यात् न किञ्चिदवोचद् ततः कोपारुणेन मया कटिप्रदेशाच्छुरी समाकृष्टा, ततस्तेनाऽपि करालखड्गो निष्कासितः, एवमन्योऽन्य-प्रहाराभिहतौ द्वावपि मृत्वा षष्ठं नरकं गतौ, ततश्चोद्वृत्तौ तिर्यञ्चौ पुनर्नारकौ इत्थं चाऽनेकभवान् यावत् परस्परं युध्यतोर्व्यतीतो भूयान् कालः ।

अथ पुनर्मुत्वा भवितव्यतया तथाविध-कर्मरूपगुटिका-प्रदानेन नव-नवरूपः कृत्वा असंव्यवहारपुरं मुक्त्वाऽन्यत्र एकेन्द्रियादिसर्वेषु स्थानेषु अनन्तं कालं यावत् भ्रमणं कारितः। एवं अनन्तकालावधि कष्टानुभवनेन हृष्टया भवितव्यतया एकदाऽहं मनुष्य-गतिपुर्यां आभीरकुलेऽवतारितस्तत्र भद्रकत्वादिभिर्मध्यमगुणानुपार्जयित्वा प्रोक्तं तया- हे आर्यपुत्र! त्वया बहुकष्टान्यनुभूतानि, ततोऽधुना इमं पुण्योदयं सहचरं गृहीत्वा याहि मनुष्यगतिपुरं, अहमपि तदङ्गीकृत्य पुण्योदयं सहायीकृत्य प्रस्थितः ।

इत्थं भव्याः ! स्पर्शन-हिंसा-क्रोधोद्भवं फलं वीक्ष्य प्रयतध्वं तद्विजये, यतो लभेध्वं सदा सौख्यम्

इति श्री उपमितिभवप्रपञ्चा-कथोद्धारे

स्पर्शन-हिंसा-वैश्वानर-फलप्रदर्शनाख्यः प्रथमोऽधिकारः ॥ श्री ॥

# अधिकार - २

अथ संसारिजीव आह- "हे अगृहीतसङ्केते ! सिद्धार्थपुरे नरवाहनो राजा, तस्य विमलमालती नाम्नी देवी, तस्याः कुक्षौ अवतीर्णोऽहं, क्रमेण सुमुहूर्त्ते पुण्योदयेन सह प्रसूतः, राज्ञा महोत्सवं कृत्वा रिपुदारण इति मदभिधा चक्रे । क्रमेण रूप-सौभाग्य-श्रिया सह प्रवर्धमानोऽभूवम् ।

## रिपुदारणस्य मानेन मृषावादेनसह मैत्री गर्विष्ठता च

अथ नन्दिवर्द्धनभवे अविवेकितानाम्नी ममोपमाता बभूव, पुनस्तयाऽत्र भवेऽपि मज्जन्मावसरे एकः पुत्रः प्रसूतः शैलराज इति तन्नाम दत्तं, स च जाति-लाभ-कुलैश्वर्य-बल-रूप-तपः-श्रुत-मदलक्षणैः अष्टभिः शिरभिरलङ्कृतः प्रववृधे । क्रमेण तेन सह मम प्रीतिर्जाता । सोऽपि देहाऽभेदेन मामाश्रितः । ततः प्रभृत्यहं मातृ-पितृप्रमुखवृद्धानपि नाऽनमम् । आकाशदृष्टिरेवाऽचलं, स्वस्य जात्यादि-गर्वेण सर्वं जगदपि तृणवदगणयम् । यावत् कश्चित् किमपि वक्ति तावत् तं निष्कारणमपि निरभर्त्सयम् । एवंविधं मां वीक्ष्य पित्रा प्रधानादीन् प्रत्यादिष्टं- "यत् मानधनोऽयं कुमारस्ततो यद् यद् आदिशति असौ तत्तदेवाऽङ्गीकरणीयं, नाऽस्य वचो विलङ्घनेन मानभङ्गः कार्यो भवद्भिरिति," ततः प्रधानादयः सर्वेऽपि मदाज्ञा-वशंवदा मां पितुरप्याधिकं मन्यन्ते स्म, तदा मया ध्यातं यदहो ! शैलराजानुभावादेते सर्वेऽपि मम वशंवदा जज्ञिरे, तत् महानुभावोऽयमिति ।

अथ मामित्थं वशवर्त्तिनं मत्वा शैलराजेन स्तब्धचित्ताख्यं विलेपनं मद्-वक्षसि प्रदत्तं, तदनुभावाच्चाऽहं काष्ठकील इव पाषाणस्तम्भ इव स्तब्धो जातः । अथैकदाऽहं क्लिष्टमानसाख्यमान्तरङ्गं पुरं प्राप्तः, तत्र दुष्टभावनृपस्तस्य जघन्यता देवी, तयोः पुत्रो मृषावाद नामा छद्म-पैशुन्य-द्रोहादिभयान्वितो मया दृष्टस्तेनाऽहम् । सादरं भाषितो, मयाऽपि तेन सह मैत्री कृता, तत्प्रभृत्यहं साक्षात् कृतानप्यपराधशतान् किमपि कथयामि किमपि करोमि किमपि कृतं किमपि वदामि । इत्थं तयोः कुमित्रयोः सङ्गादनेकेऽनर्थाः प्रादुर्भवन्ति, परं तान् उत्पद्यमानानेव पुण्योदयश्छिनत्ति, तं पुण्योदयोपकारमहं न जानामि ।

अथ समये कलाग्रहणायाऽहं महामतिकलाचार्यान्तिके पित्रा मुक्तः उक्तं च- "वत्स ! कलागुरोस्त्वया प्रणामाऽभ्युत्थानादिविनयः कार्यो यथा शीघ्रं कलाप्राप्तिः

स्यादिति" श्रुत्वा मयोक्तं- "तात ! किमेषोऽस्मत्तोऽप्यधिकं कलावान्? अहं तु तृणवदेनं गणयामीति" श्रुत्वा मौनमाधाय पुनः पित्रा रहसि कलाचार्याय कथितं, "यदयं रिपुदारणो मानशीलस्ततो विनय-प्रणिपातादिकमकुर्वाणोऽपि भवद्भिः नोपेक्षितव्यो विभाव्य सम्यक् पाठयितव्यः" । अथ मां गर्वाध्मातमपि कलाचार्यः सादरं कलाः शिक्षयति, परं सन्निपातरोगिणि परमान्नवत् ताः सर्वा अपि कला मयि दोषवृद्धये भवन्ति । एकदा गुरुणा शिक्षार्थमुक्तोऽहं- "वत्स ! त्वं पयःपानेन सर्व इव कलाशतेन विनीयमानोऽपि कथं दौर्जन्यविषं न त्यजसि ?" इत्याकर्ण्य मया कलाचार्यस्तथा निर्भर्त्सितो यथा पुनरुत्तरमपि वक्तुं न शेके, तदारभ्य कलाचार्येण स्वयं शिक्षानुचितोऽयमिति मत्वा "नाऽस्य किमपि केनाऽपि शिक्षाक्षरं वाच्यमिति" विद्यार्थिनोऽपि निषिद्धाः ।

अथ ततः प्रभृति निरंकुशोऽहं कदापि गुर्वासने उपविशामि, कदाचिद् गुरोरवर्णवादं जल्पामि, यदि च गुरुः पृच्छति तदा मृषावादानुभावात् साक्षाद् दृष्टापराधमप्यपलपामि, एवं नित्यापराधोद्विग्नेनोपाध्यायेनैकदा उक्तं- "भो राजपुत्र ! यदि ते विद्यया सह कार्यमस्ति तर्हि दुर्विनीतत्वं त्यक्त्वा कलाभ्यासं कुरु, नो चेद् गृहं याहीति" तद् वाक्यात् समुद्भूतकोपः कलाचार्यं नानाऽऽक्रोशवचनैः सन्तर्ज्य गृहमागतोऽहं पृष्टश्च नृपेण- "वत्स! त्वया कियदधीतं?" तदा मया मृषावादमाहात्म्यात् भाषितं- "यत् व्याकरण-तर्क-छन्दो-ज्योति-र्धनुर्वेदादि-सर्वशास्त्राण्यधीतानि, साधिताश्च द्वासप्ततिरपि कला मये" त्याकर्ण्य हृष्टचित्तेन पित्रा कलाचार्याय बहु प्रीतिदानं दत्त्वा पुनर्मां प्रत्युक्तं-"वत्स! प्रत्यहं कलाचार्यगृहे गत्वा विद्याः स्मर्त्तव्या यथा सुशिक्षिता भवेयुः।"

अथ तथेत्युक्त्वा निर्गतोऽहं पितुः सकाशात्, अग्रे गत्वा पृष्टो मया मृषावादो चाऽतः "भ्रातः! कुतस्त्वयेदृग्विधाऽचिन्त्यशक्तिर्लेभे यत् तवानुभावात् मूर्खा अपि पण्डितायन्ते, निर्गुणा अपि सगुणीभूय विचरन्ति ?" मृषावादः प्राह- "शृणु मित्र ! राजसचित्तनगरे रागकेशरी नृपो मूढता तद्राज्ञी तयोः पुत्री मायानाम्नी अचिन्त्य-प्रभावा, सा मया भगिनीत्वेन प्रतिपन्नास्ति, तत्-प्रसादात् मयापीदृशी शक्तिर्लब्धास्ति, यदि तवाऽपीदृग्शक्तिलाभे वाञ्छाऽस्ति तदा विचर पण्याङ्गना-गृहेषु, क्रीड द्युतकारशालासु, सेवस्वाऽन्यान्यपि पानगोष्ठ्यादि-तथाविधस्थानानि, तत्राऽहं मायामपि ते दर्शयिष्यामि ।"

अथ तद्वाक्यमङ्गीकृत्याऽहं निरन्तरं तेषु तेषु यदृच्छया खेलन् शिक्षितः परममायाविताम्, प्रवर्द्धिता च मृषावादशक्तिः, इत्थं व्यतीतानि कियन्ति वर्षाणि ।

अवशेष पुरे नरकेशरिनृपेण लोकोक्त्या एवं श्रुतं यत् 'नरवाहननृपाङ्गजो रिपु-दारणकुमारः सकलविद्या-पारीणः, कलापात्रमस्ति, ततस्तेन वसुन्धरा-देवी कुक्षिजा नरसुन्दरी स्वकन्या पृष्टा "वत्से ! यदि तुभ्यं रोचते तदा रिपुदारणेन सह ते विवाहः क्रियते," तदा सा प्राह- "तात ! भवतु एवं, परं एकवारं सदसि तद्विद्यां परीक्ष्याऽहं वरिष्यामि," इति तद्वाक्यमङ्गीकृत्य नरकेशरीनृपो बहुपरिवारान्वितो नरसुन्दरीमादाय सिद्धार्थपुरमायातस्तद्वृत्तान्तश्रवणेन प्रमुदितो नरवाहनो यथोचित-प्रतिपत्त्या नर-केशरिनृपं सच्चकार ।

अथ सुमुहूर्त्ते मत्पिता नरवाहननृपो मां सहाऽऽदाय विवाहमण्डपे सभां पूरयित्वा निविष्टः, तदवसरे पित्राऽऽकारितो महामतिर्नाम मत्कलाचार्योऽप्यागत्य नृपान्तिकमुप-विष्टः, नरकेशरिनृपोऽपि सपरिकरस्तत्राऽऽगतः । अत्रान्तरे वसुन्धराराज्ञीं पुरस्कृत्य सखीवृन्दवेष्टिता रूपसौन्दर्यश्रिया रम्भामुपहसन्ती नरसुन्दरी सभायामागत्य ममाऽभि-मुखमुपविष्टा, तां दृष्ट्वा हर्षितौ मे मातापितरौ, अहं तु कटाक्ष-वीक्षणादेव प्रमोदोत्पुलकोऽभूवम् । अथ नरसुन्दरी प्राह- "अहो कुमारशेखर! क्रियतां कश्चिच्छा-स्त्रवार्त्ता विनोदः, प्रीयन्तां सभाजनोऽयं त्वद्वाक्-पीयूष पानेनेति ।" सभ्याः सर्वेऽ-प्यहो ! सकल-शास्त्र-पारदृश्वा कुमारः, किं किमभिधाष्यति इति विस्मयात् श्रवणो-त्सुका जाताः । [1]मया तु तदा विद्याः सर्वा विस्मारिता। अधुनाऽत्र किमुत्तरं दास्ये इति भयात् समकालोत्पन्नोत्कम्प-स्वेद-रोमाञ्च-जाड्यः शुष्यत्तालु-गलकस्तत्कालमेव मृतावस्थोऽभूवम् । तद्विलोक्य नरसुन्दरी-नरकेशरि-प्रभृतयो विलक्षा जाताः, मत्-पित्रा च कलाचार्याभिमुखं विलोक्य पृष्टं- "किमेतत् सकलशास्त्र-विशारदस्य कुमारस्य क्षोभकारणं?" कलाचार्यः प्रच्छन्नवृत्त्या प्राह- "राजन् ! अयं कुमारस्तु मृषावादा-ऽभिमानयो र्विलसिते विशारदोऽस्ति परं विद्यायास्तु गन्धमात्रमपि न जानाति," इत्युक्त्वा तेन सर्वमपि मच्चरितं नृपाग्रे कथितं, तच्छ्रुत्वा लज्जावदनो नृपः "श्वः कला-परीक्षणं करिष्यते" इत्युक्त्वा सभां विसृष्टवान् । लोकः सर्वोऽपि मामुपहसन् निर्गतः, अहमपि जनेषु गतेषु क्षणान्तरे सावधानो भूत्वा श्यामवदनः सन् गृहमायातः, महादुःखेन स दिवसोऽतिक्रान्तः ।

अथ रात्रौ मम पुण्योदयेन विमृष्टं- "यदहो ! न घटते मदाश्रितस्याऽस्य रिपु-दारणस्यैवं मानहानिः, मयि विद्यमानेऽपि चेदेनं मुक्त्वा नरसुन्दरी किञ्चदन्यं वरं वृणुयात् तदा किं मम साहाय्येनेति ? नरकेशरि हृदयमधिष्ठितस्तदनुभावाच्च

---

1. अहं तु L1, L2, V, D ॥

नरकेशरिणि एवं बुद्धिर्जाता- 'यदहं पुत्रीं गृहीत्वा विवाहार्थमत्राऽऽगतः रिपुदारणेन सह विवाहस्य वृत्तान्तः सर्वत्र प्रसिद्धिं प्राप्तस्ततो यदि कन्यामदत्त्वैव गृहं यामि तदा तु एतेषामस्माकं चोभयेषामप्युपहासो लघुता च स्यादिति' विचिन्त्य प्रभाते मत्पितुः सविधं समागत्य नरकेशरिणोक्तं- "राजन्! अलं कलापरीक्षया, सकल-कलाविशारदस्य रिपुदारणस्य, ततः प्रगुणीक्रियतां विवाहसामग्री, उद्वाह्येते कन्या-कुमारौ" इत्याकर्णनाज्जात-प्रमोदेन नरवाहन-नृपेण प्रारब्धो महामहः, उद्वाहित-श्चाऽहम् ।

## रिपुदारणस्य अहङ्कारपारवश्यं, पत्नी-मात्रोः आत्महत्या

अथ सुदायं दत्त्वा स्वपुरं प्राप्तो नरकेशरी सपरिच्छदः, अथ अहं नरसुन्दरीं लब्ध्वा स्वजनुः कृतार्थं मन्यमानो नवनवभोगान् विलसामि । एवमन्योन्य दृढ-प्रणयासक्तयोरावयोर्नानाभोगभङ्गिभिः कानिचिद् वर्षाणि व्यतीयुः । अत्रान्तरे शैलराजेन मृषावादं प्रति भाषितं- "यदावयोः परमः मित्रं रिपुदारणस्तु साम्प्रतं नरसुन्दरीस्नेहासक्तो नाऽस्माकं स्मरत्यपि । ततो येन केनोपायेनाऽस्य नरसुन्दर्या सह स्नेहवित्रोटः स्यात् स उपायः क्रियते । तदा मृषावादेनोक्तं- 'अहं त्वेतत्कार्यचिन्तयन्नेवाऽस्मि ।

अथैकदा सुखगोष्ठ्यां क्रियमाणायां नरसुन्दर्या पृष्टं- "हे आर्यपुत्र! विवाहदिने सभायां कथं ते क्षोभः समजनि?" मयोक्तं- "तदा विद्यास्तु सर्वा अपि मच्चेतसि पर्यस्फुरन् परं सदसि सर्वजनसमक्षं स्त्रिया सह वदतो मे लाघवं स्यादिति ध्यात्वाऽहं मौनमालम्बितः" तदा नरसुन्दर्या मदभिप्रायं मत्वा पुनर्लीलयोक्तं- "वरं स्वामिन्! अद्यैव रहसि मदग्रे प्रकाशय किञ्चित् चमत्कारि सूक्तम् ।" अथ तदवसरे शैलराजेन स्तब्धचित्ताख्यं विलेपनं मम हृदि दत्तं, ततो मयाऽहङ्कार वशात् पादप्रहारं दत्त्वा- "रे रे रण्डे! स्वगर्वात् त्वं मां मूर्खं जानासि, तद् याहि यः पण्डितो भवति तमेवाऽङ्गीकुरू" इति बहुधा निर्भर्त्स्य च निष्कासिता स्वावासात् नरसुन्दरी । अथ तया रुदत्या मम मातुर्विमलमालत्याः समीपे गत्वा गदितं मम कोप विलसितं, माताऽपि तामाश्वास्य दुःखार्त्ता मदन्तिकमागत्य मामुवाच "वत्स ! न युज्यते तव कुल-शील-गुणाढ्यायाः प्रियाया निरपराधावगणनम् । इयं तु त्वदेकचित्ता त्वद्विरहाऽसहा स्वजीवितं तृणीकरिष्यति तदिमामाश्वासय त्यज मानमित्यादि-" वाक्यैः पुनः प्रवृद्ध-गर्वेण मया माताऽपि कठोर वाक्यैरवगणिता पुनर्मातुरादेशात् नरसुन्दरी तत्राऽऽगत्य दीनवाक्यैः- "हे प्राणनाथ ! हे जीवितेश ! क्षमस्व मेऽपराधं, पुनः कदापि इत्थमपराधं न करिष्ये" इत्यादि जल्पन्ती बाष्पोदकैः पादौ प्रक्षालयन्ती पादयोर्निपत्य मामनुनेतुं लग्ना, तथाऽपि सा मया पादेनाऽऽहत्य दूरीकृता निष्कासिता च स्वगृहाद् बहिः ।

अथ सा दुष्टगजोन्मूलिता कमलिनीव निराशा निराधारा कमप्युपायमलभमाना क्षणं यावद् द्वारि स्थित्वा पुनः शुन्यचित्तेव क्वापि गन्तुं प्रवृत्ता, तदा क्वेयं यातीति विचिन्त्याऽहमपि तामन्वगमम् । अत्राऽन्तरे सूर्योऽस्तं प्राप्तः, प्रसृतं च ध्वान्तम्, अथ सा नरसुन्दरी एकस्मिन् शून्यालये प्रविश्य, तत्रोर्ध्वदारुणि पाशमासूत्र्य तदन्तर्ग्रीवां क्षिप्त्वा नगरदेवतादीन् साक्षीकृत्य मम पश्यत एवं पाशं गले दत्त्वा मृता, तथापि ममाऽनुशय-लवो नोदपद्यत, क्षणान्तरे माताऽपि नरसुन्दर्याः शुद्धिं पश्यन्ती तत्राऽऽयाता, नरसुन्दरीं मृतां वीक्ष्य शोकदुःखार्त्ता साऽपि तथैव गलपाशं क्षिप्त्वा मृता तथाऽप्यहं मानवशात् काष्ठकील इव स्तब्ध एव स्थितः ।

अथ मामेवं दुष्टमयोग्यं मत्वा पुण्योदयोऽत्यन्तक्षीणाऽङ्गोऽभवत् । अथ मातुः शुद्ध्यर्थं तत्राऽऽगता कपिञ्जला दासी, तयोर्मृतावस्थां वीक्ष्य गाढं पूच्चकार, तदाक्रन्द-श्रवणात् सहसा जातसाध्वसा जना समागताः अत्रान्तरे चन्द्रोदयो जातो, दृष्टं ज्ञातं च सर्वैर्ममाकार्यं दृष्टश्चाऽहं कीलितः पिशाच इव कोपकरालः, भर्त्सितो नानापवादभङ्गि-भिस्तैः- "अहो यथा रासभस्य किशोरी यथा च काकस्य राजहंसी, तथा न युज्यतेऽस्य नरसुन्दरी स्त्री । अथ राजाऽपि तद्वृत्तान्तश्रवणात् सञ्जातव्यसनस्तत्रागत्य तयोर्मृतकार्यं कृत्वा मां चाऽयोग्यं विज्ञाय गृहात् निरकासयत् । अथैवं कियद्-दिनातिक्रमे राजा मनःशोकं निवर्त्त्य एकदा उद्यानक्रीडार्थं निर्गतः । तत्रोद्याने संसार-पारावारप्रवहणप्राया अनेकसाधुगणसहिता विचक्षणनामाचार्या दृष्टाः । तद्दर्शना-ज्जातपरमानन्दो नृपः सपरिजनः सूरिं प्रणम्योपविष्टस्तदवसरेऽन्येऽपि भूयांसः पुरजना निविष्टाः सन्ति । संसारिजीवो वक्ति- "हे अगृहीतसङ्केते ! अहमपि कुतोऽपि पर्यटंस्तत्राऽऽगतः, कौतुकप्रेक्षार्थमुपविष्टः सूरिधर्मं जगौ- "अहो भव्याः! संसार-दावानलोपतप्ताः निःशेषतापापहं घनाघनप्रायं शुद्धधर्मं शरणीकुरुत" इत्यादि-सविस्तरधर्मदेशनां श्रुत्वा केचित् साधुधर्मं केचिच्च यथाशक्तिश्राद्धधर्मं प्रति समु-त्सुकाः बभूवुः । अत्रान्तरे नृपेण पृष्टं- "भगवन् ! युष्माभिः तारुण्य एव कामं विजित्य संसारमसारं विभाव्य कथं व्रतमाददे ?" सूरिराह- "राजन् ! अस्मच्चरितं स्वस्तुति-परावगणनामयं स्वमुखेन वदतः स्वस्य लाघवकरं तथापि त्वदभिलाषपूर्त्तये सकलसभ्यजनोपदेशाय च कथ्यते- तथाहि-

## विचक्षणसूरेः आत्मकथाः ।

अस्त्यनाद्यनन्तं पृथिवीतलं नाम पुरम् अनेकलोकाकीर्णं, तत्र मलसञ्चयो राजा तस्य मलपङ्क्ति-नाम्नी राज्ञी, तयोः शुभोदयाऽ-शुभोदयनामानौ द्वौ पुत्रौ, तत्र शुभो-दयस्य,

पत्नी स्वचारुता विचक्षणश्च पुत्रः, अशुभोदयस्य तु अयोग्यता पत्नी जडनामा पुत्रः। तत्र विचक्षणस्तु स्वभावादेव धर्मी, धीरः, सत्यवादी, जितेन्द्रियो, विनीतः, क्षमी, देवगुरु-पूजकः, अनेकगुणाकीर्णः, जडस्तु विलोमचारी, पापी, मृषाभाषी, मायावी, इन्द्रिय-लोलुपोऽविनयी, क्रोधी, देवगुरुनिन्दकः गर्वाऽसूयाभिधाद्यसङ्ख्य-दोषाकीर्णः। एवं तौ द्वावपि भ्रातरौ प्रवर्धमानौ यौवनं प्राप्तौ ।

अथ निर्मलचित्तनाम्नि अन्तरङ्गनगरे मलक्षयो राजा, तस्य सुन्दरता राज्ञी, तयोः पुत्री बुद्धि नाम्नी । साऽन्यदा विचक्षणेन परिणीता तया सह विलसन् विचक्षणः स्वं धन्यं मन्यमानः सुखेन तस्थौ । एकदा मलक्षयनृपेण बुद्ध्याः कुशलोदन्तज्ञानार्थं स्वपुत्रो विमर्शनामा प्रहितो बुद्धि-सविधं समागतः । अत्राऽवसरे बुद्ध्याः प्रकर्षनामा पुत्रः प्रसूतः । अथ विमर्शोऽपि भगिनी-भागिनेययोः बुद्धि-प्रकर्षयोः स्नेहात् तत्रैव तस्थौ । अन्यदा विचक्षणो जडश्च द्वावपि सुखविलास-नाम्नि उद्याने क्रीडार्थं गतौ । तत्र दन्तरूप-कुन्दवृक्षशोभां विलोकयतः तत्र ताभ्यां वृक्षान्तरे एकां दासीं पुरस्कृत्य विचरन्ती एका रक्तवर्णाऽतिचपला स्त्री दृष्टा, जडस्तु तां दृष्ट्वा मोहं प्राप्तः, विचक्ष-णस्तु दास्या सह वने भ्रमन्ती एकाकिनी अतिचपलाऽसौ कुशीलेति विमृश्य जडं हस्तेनाकृष्य गन्तुं प्रवृत्तः । एवं तौ यान्तौ वीक्ष्य सा स्त्री मूर्च्छां प्राप्ता, तदा तस्या दासी पूत्कुर्वन्ती विचक्षण-जडयोः पार्श्वमेत्य प्राह- ''अहो सुपुरुषौ ! युवां मत्स्वामिनीम-वगण्य चलितौ तद्दुःखात् सा मूर्च्छिता, तदाश्वासयतां युवां तत्राऽऽगत्येति''। तद्वाक्या-ज्जडो विचक्षणमाकृष्याऽऽगतस्तत्पार्श्वं, कृता नाम पृच्छा, पृष्टं च स्नेहकारणम् ।

अथ दासी प्राह- ''इयं रसनाभिधा मत्स्वामिनी लोलतेति च मम नाम, श्रृणुतां अस्माकं स्नेहकारणं । पुरा युवां कर्मपरिणाम-लोकस्थिति-प्रमुखाणां बलादसंव्यव-हारनगरान्निर्गत्यैकेन्द्रियपुरे कियन्तं कालं स्थित्वा यावत् प्रभृति द्वीन्द्रियपुरे समागतौ तावत् प्रभृति मत्स्वामिनी कर्मपरिणामनृपेण वां परिणायिताऽस्ति ।

अहमपि तदनुवर्त्तिनी भवत्समीपस्था एवाऽभूवम् । अद्य तु चिरन्तनसम्बन्धं विस्मार्य युवां चलितौ तद्दुःखेन मूर्च्छितैषा इत्यादि तद्वाक्यैर्लुब्धेन जडेन तया दास्या सह सा स्त्री समाश्वास्य प्राणप्रिया प्रणयेनाऽऽदृता, विचक्षणेन तु कर्मपरिणाम-सम्बन्धिनीयं रसना ततो न स्नेहकारणोचितेति मत्वा मन्दस्नेहेन लोकरीत्या-ऽऽदृता, लोलता दासी तु तेन सर्वथाऽपि दूरीकृता। अथ जडस्तु लोलताप्रेरितो द्राक्षा-गुड-शर्करा-दुग्ध-दधि-घृत-मधु-मद्य-मांसादिभिर्विविधाऽशन-पान-खादिम-स्वादिमै-र्नित्यं रसनां लालयन् प्रमोदमाप्नोति, विचक्षणस्तु लोकरीत्या रसनाया आहारादिकं ददाति, परं लोलतां तु दूरत एव त्यजति ।

## जडस्य रसनाऽधीनता

एवं प्रवर्त्तमानस्य तस्य लोके प्रशंसाऽभूत् । जडस्तु रसनालोलताधीनो मृगयाद्य-कार्यं कुर्वन् लोकेऽपवादपदं जातः । एकदा जडेन स्वमातुरयोग्यतायाः पुरः रसनाप्राप्तिवार्त्ता कथिता, तदा तयोक्तं- "वत्स! इयं वधूः त्वया सम्यग् आश्वासितव्या यथा यथा लोलताऽऽदिशति तथा तथा कृत्वा पोषिता सती भृशं ते सुखप्रदा भविष्य-तीति" मातुरादेशाद् विशेषेणाऽभक्ष्याऽपेयादिदानेन लोलतावशो जडस्तां पुपोष ।

एकदा विचक्षणेनाऽपि स्वमातुश्चारुतायाः पुरो रसनागमनं स्वस्यानादरत्वं च कथितं तदा चारुता प्राह- "वत्स ! अस्यामज्ञातकुलशीलायां स्त्रियामनादर एव श्रेयान्, परन्त्वेतस्या येन तेनोपायेन मूलशुद्धिं विलोकय" इति मातृवचः प्रतिश्रुत्य विचक्षणेन रसनाया मूलशुद्ध्यर्थं विमर्शाख्यो बुद्धेर्भ्राता स्वशालकः तथा बुद्धिजातः स्वपुत्रः प्रकर्षः एतौ द्वावपि मातुल-भागिनेयौ नितरां निपुणौ मत्वा एकं वर्ष-मवधीकृत्य प्रेषितौ । अथ रसनामूलशुद्ध्यर्थं गच्छद्भ्यां ताभ्यां भूयांसि बाह्य-नगराण्यवलोकितानि, तत्र क्वाऽपि शुद्धिर्न लब्धा, तदाऽन्तरङ्गनगराणि पश्यन्तौ तौ राजसचित्तपुरं प्राप्तौ, तन्नगरं महासमृद्धिपूर्णं वास्तव्यजनरहितं च दृष्ट्वा विमर्शः प्रकर्षं प्रति उवाच- "यदि एतत् पुरं जनरहितमपि समृद्धिपूर्णं विद्यते, नूनं तदस्य पुरस्य भर्त्ता कोऽपि बलवान् भविष्यतीति ।"

## विमर्श-प्रकर्षयोः रसना शुद्ध्यर्थं गमनम्

अत्रान्तरे दूरात् कश्चित् पुमान् अवलोकितः, तत्समीपे गत्वा पृष्टं ताभ्यां शून्य-नगरस्वरूपम्, स प्राह- "राजसचित्तमिदं नगरं, अत्र रागकेशरी राजा, स तु सर्वं स्वसैन्यं पौरजनं चाऽऽदाय स्वपित्रा महामोहेन सह सन्तोषमभिषेणयितुं गतोऽस्ति । तेषां महामोहादीनां सन्तोषेण सह युध्यतां गतोऽनन्ताऽनन्तः कालस्तथापि न कश्चित् प्रतिनिवर्त्तते । अहं तु मिथ्याभिमान नामा रागकेशरिनृपस्य भटः, कियन्तं कालं तत्र सैन्येऽभूवं, परं नृपाज्ञया नगररक्षार्थमिहाऽऽगत्य स्थितोऽस्मि । तदा विमर्शेन पृष्टं- "अये! सन्तोषेण सह रागकेशरिणः किं वैरकारणमिति ?" मिथ्याभिमानः प्राह- "रागकेशरि-नृपस्य विषयाभिलाषनामाऽमात्योऽस्ति तेन स्वराज्ञः प्रतापवृद्ध्यर्थं स्पर्शन-रसना-घ्राण-चक्षुः-कर्णाभिधानि स्वस्याऽपत्यानि जगद्विजयायाऽऽदिष्टानि, तैः शक्रादयोऽपि निर्जित्य स्वस्य राज्ञो वशंवदाश्चक्रिरे । अथ सन्तोषस्तु कदा कदाऽपि तानि पराभूय तद्वशीकृत-भवजन्तून् स्वाज्ञा-वशंवदान् कृत्वा मुक्तिपुरे प्रस्थापयती-त्येतद्वैरकारणमिति" श्रुत्वा विमर्श-प्रकर्षाभ्यां चिन्तितं- "यदहो ! रसनाया मूल-शुद्धिस्तु लब्धा, तथापि

विलोक्यतेऽस्याः प्रभवहेतूनां मोहादीनामैश्वर्याभोगमिति पुनस्ताभ्यां पृष्टम्- ''अहो महाभाग ! क्वाऽस्ति साम्प्रतं मोहराजस्य सेनानिवेश इति ?'' तदा मिथ्याभिमानेन माऽभूतां चारित्रधर्मादीनां हेरिकावेतावित्याशङ्क्य न किञ्चिद् बभाषे। तदा प्रकर्षः प्राह- ''मातुल ! कृतमनेन प्रश्नेन, गम्यतामग्रे ज्ञास्यते स्वयं तच्छुद्धिरिति'' चलितौ क्रमादायातौ तामसचित्तपुरोपान्ते तत्पुरमपि शून्यमव-लोक्येतस्ततः पश्यद्भ्यामेकः श्यामवदनः पुमानदर्शि । अथ तमनुसृत्य तदभिधां पप्रच्छतुः स पुमानाह- ''अहो वैदेशिकौ ! शोक इति मम नाम, तामस-चित्ताख्यमिदं पुरं, द्वेषगजेन्द्रनामा एतत्पुराधीशः सर्वं स्वपरिजनमादाय सन्तोषेण योद्धुं गतोऽस्ति । किञ्च द्वेषगजेन्द्रराजस्य पत्नी अविवेकिता साऽत्यन्तं श्वसुरकुलभक्ता महामोहादीनां परमवल्लभाऽस्ति । यात्राप्रस्थानसमये महामोहपत्न्या महामूढताभिधायाः श्वश्र्वास्तथा रागकेशरिपत्न्या मूढताया ज्येष्ठयातुः स्नेहातिरे-कात् सहाऽऽगन्तुकामामपि तामापन्नसत्त्वां मत्वा द्वेषगजेन्द्रनृपो निवर्त्त्य रौद्रचित्तपुरे स्वसेवकस्य दुष्टाभिप्रायनृपस्य गृहे मुक्तवान् । तथा क्रमेण पूर्वे काले वैश्वानराभिधः सुतः प्रसूतोऽभूत्, पुनरिदानीमप्यन्तरांतरायातद्वेषगजेन्द्र-संयोगादन्योऽपि पुत्रः शैल-राजाभिधस्तया जातोऽस्तीति श्रूयते ।''

## अन्तरङ्गपुरे मिथ्यादर्शन-राग-द्वेषादीनां परिचयः ।

अत्र संसारि जीवो वक्ति-हे अगृहीत सङ्केते ! यत् पूर्वं नन्दिवर्धनभवमध्ये वैश्वानर-जन्माधिकारे दुष्टाभिप्राय-नृपालये अविवेकिता केनचित् प्रयोजनेनायाता इत्यूचे, तत्प्रयोजनं त्वेतदत्र स्पष्टीकृतम् । अथाऽत्र प्रज्ञाविशालया संसारिजीवं प्रति पृष्टम्- ''अहो! भद्र! त्वया रिपुदारणभवे विचक्षणसूरिमुखादविवेकितादिस्वरूपं श्रुत्वा किमपि श्रद्दधे ?'' स प्राह- ''या तदाऽज्ञानवशात् सर्वमपि तद्वाक्यं मिथ्याजल्पितं मेने ।'' पुनरगृहीतसङ्केतयाऽग्रेतन सम्बन्धं पृष्टः संसारि जीवः प्राह-अथ ताभ्यां विमर्श-प्रकर्षाभ्यां शोकं प्रति पृष्टं- ''यदहो नृपेणाऽत्र त्वं पुरारक्षकतया नियुक्तोऽसि किमुताऽन्यस्मै कार्यायेहागतोऽसीति ?'' शोकः प्राह- ''अत्र पुररक्षार्थं तु नृपेण मतिमोहनामा महाभटो नियुक्तोऽस्ति, परं मम तु मतिमोहेन सह सख्यमस्ति, ततस्तत्-मिलनायाऽधुना चित्तवृत्त्यटव्यां प्रमत्ततातटिन्याः कूले महामोहादीनां स्कन्धावारो-ऽस्ति ततः समायातोऽस्मि'' इत्यादि शोकोक्तमार्गेण महामोहस्कन्धावारस्थिति-निर्णयमासाद्य शोकं प्रति जोत्कारं विधाय पुरः प्रचलितौ तौ मातुल-भागिनेयौ क्षणात् प्राप्तौ चित्तवृत्त्यटव्यां, दृष्टा च साऽटवी दुरवगाहा विलोमवृत्तानां पदे पदे दुःखावहा, सम्यक्प्रवृत्तानां च सुखास्पदीभूता, तस्यां च राजसचित्त-तामसचित्त-पुरयोरन्तरालात्

निर्गता संसारसमुद्रगामिनी तन्द्रा-निद्राभिधप्रौढतटद्वयोपशोभिता विकथाश्रोतः-पतितकषायपूरमज्जदनन्तसंसारिसत्त्वसन्दोहा विविध-विषयव्यापारवीचिमालामिलद्भावहायादियादोगणैर्दुरवगाहा प्रमत्तता महानदी दृष्टा ।

तस्या अनवधानताभिधपुलिने चित्तव्याक्षेपाभिधमहामण्डपे तृष्णाख्याया विशाल-वेदिकाया उपरि मतिविपर्ययाभिधसिंहासनासीनं महामोहनृपं विलोक्य विमर्शं प्रति प्रकर्षः प्राह- ''हे मातुल ! महाप्रतापभासुरोऽयं महामोहराजो दर्शनादेवोपलक्षितो मया, इदानीं माम् उपलक्षयैतस्य सर्वसभासदान्,'' विमर्शः प्राह- ''वत्स ! सावधानी-भूय शृणु तावत् मोहराजस्य समीपे यः कृष्णाङ्गः स्थितोऽस्ति तं मिथ्यादर्शनाभिधानं महामोहराजस्य महामात्यं विद्धि । अयं सर्वसैन्यस्य चिन्तको मोहराजस्य सर्वां राज्यस्थितिं प्रवर्त्तयति । अस्याऽऽज्ञावशंवदा जीवा रागादिभिर्यथेच्छं विनाट्यन्ते, तथा लोके हरि-हरादिकुदेवेषु या देवत्वबुद्धिस्तथाऽष्टादशदोषनिर्मुक्तेषु सर्वज्ञेष्वदेवबुद्धिर्या च परिग्रहारम्भमग्नमिथ्याप्ररूपक गृहिलिङ्ग्यादिषु गुरुत्वबुद्धिः, पञ्चमहाव्रताराधक-शुद्धोपदेशकसाधुषु चाऽगुरुत्वबुद्धिः, तथा सुवर्ण-स्त्री-भूमि-लवणादिदान-पञ्चाग्निसाधनाऽजामेध-माघस्नानादिषु या धर्मबुद्धिर्या च सम्यक्त्व-देशविरति-सर्व-विरत्यादिष्वधर्मबुद्धिस्तथा सर्वज्ञोपदिष्टमार्गं विहायाऽन्येषु परदर्शनपाखण्डिक-निह्नवादिषु यः पक्षपातः, यच्च जीवाऽजीव-पुण्य-पापाऽऽश्रव-संवर-निर्जरा-बन्ध-मोक्षाभिधतत्त्वानां सम्यगश्रद्धानम् एतत् सर्वमप्यस्याऽचिन्त्यशक्तेर्विजृम्भितं, तथा मोहराजस्य दक्षिणाङ्गेऽभ्यर्णं निविष्टोऽसौ महाबाहुर्महामोहस्य ज्येष्ठपुत्रो रागकेशरी नृपः समीपस्थैः कामराग-स्नेहराग-कुदृष्टि-रागाख्यै एभिस्त्रिभिनृपैर्युतः, या चाऽस्य समीपे निविष्टा साऽस्य राज्ञी मूढतादेवी, असौ रागकेशरी एभिर्नृपैर्मूढतादेव्या च सहितोऽसद्वस्तुष्वपि प्राणिनां प्रीतिमुत्पादयति, तथा चाऽस्य लघुभ्राता स्वपितुर्महा-मोहस्य वामाङ्गोपान्ते निविष्टो द्वेषगजेन्द्रराजः प्रबलपराक्रमी यश्चिरकालीनमपि स्नेहं क्षणाद् वित्रोटयितुं क्षमः, पितुः परमवल्लभोऽसौ । अस्य राज्ञी अविवेकिता-देवी, सा च रौद्रचित्तपुरे दुष्टाभिसन्धिनृपगृहेऽस्तीति शोकेनोक्तमभूत् ।'' प्रकर्षः प्राह- ''तत् तु मया स्मर्यते ।''

## काम-हर्ष-शोक-जुगुप्साकषायादीनां स्वरूपम् ।

पुनर्विमर्शः प्राह- ''अयं मोहराजस्य पृष्ठे महासुन्दराकृतिर्धनुष्मान्पञ्चकव्यग्र-हस्तः पुरुषवेद-स्त्रीवेद-नपुंसकवेदाख्य-पुरुषत्रयान्वितः समीपस्थया रतिनाम्न्या स्वप्रि-यया प्रवर्धितोत्साहः कामदेवः, येन स्वौजसा विनिर्जित्य महेश्वरः पार्वत्यग्रे शीर्षो-

पस्थन्यस्तकरयुगलं नृत्यं कारितः, ब्रह्मा च सावित्र्याख्यायां स्वपुत्र्यां प्रलो-भितः, विष्णुश्च गोपवधूजनपादपतनादिभिर्बहुधा विनाटितः, एवं इन्द्र-चन्द्रादयः सर्वेऽपि निर्बीजीकृत्याऽनेन स्त्रीणां दास्यविधायिनो विहिताः, यच्च कुलवध्वोऽपि हीनजातिं कुरूपं नटविटप्रायं पुरुषं भजन्ते, यच्च कुलीना अपि पुमांसः कुलटां दासीं गणिकां विधवामधम जातिप्रायां स्त्रियं रमन्ते, यच्च जराजर्जरिताङ्गा अपि स्तम्भन-वाजीकरणादिभिः कामसेवामभिलषन्ति तदेतस्य कामदेवस्याऽचिन्त्यशक्ति-विल-सितं, पुनर्मोहनृपस्य पृष्ठे यानि पञ्च मानुषाणि सन्ति तेषां मध्ये हासाभिधोऽयं प्रथमं मानुषं तुच्छता चाऽस्य पत्नी, द्वितीयं चाऽरतिर्नाम इयं च सर्वस्य जनस्योद्वेगं जनयति, एतत् तृतीयं भयनामकं समीपे चाऽस्य हीनसत्त्वताख्या पत्नी, चतुर्थं शोकाभिधः पुमान् य आवयोर्दृष्टपूर्वस्तामसचित्तपुरात् साम्प्रतं आयातो दृश्यते, पार्श्वेऽस्य दीनताख्या पत्नी अस्य वशात् प्राणिनः शिरःस्फोटा-ऽऽक्रन्द-हृदयघातादिकं कुर्वते, पञ्चमं त्वेषा जुगुप्साभिधा स्त्री, अस्याः सङ्गात् स्वं मलमूत्रादिभृताङ्गा अपि जीवा दूरस्थं दुर्गन्धि-मल-मूत्रादि दृष्ट्वा मुखं पिदधते, नक्रं च मोटयन्ति, थूत्कुर्वते, एतानि पञ्चाऽपि स्वाश्रितान् जीवान् इहलोके स्वविपाकान् दर्शयित्वा परत्र पापिपञ्जरादौ क्षिप्त्वा भृशं पीडयन्ति । पुनर्विलोकय यानि चाऽमूनि मोहस्य परितः षोडश बालकानि दृश्यन्ते तानि सर्वाणि कषायसञ्ज्ञकानि, तेषां प्रथमानि महामोहासैनि चत्वारि क्रमेण क्रोध-मान-माया-लोभ नामकानि अनन्तानुबन्धीति सामान्याऽपरनामकानि, एतदाश्रिताः प्राणिनः सम्यक्त्वसङ्गं नाऽऽसादयन्ति । इतोऽन्यानि चत्वारि क्रोध-मान-माया-लोभा-ख्यानि अथाऽप्रत्याख्यानिकेति सामान्यनामकानि, एतद् वशात् प्राणिनो देशविरतिरूपं न प्राप्नुवन्ति, अपराणि च चत्वारि क्रोधादीनि प्रत्याख्यानिकेति-सामान्याभिधानि एतानि सर्वविरत्याख्यपुरप्रस्थाने रोधकारीणि, अन्यानि चत्वारि डिम्भानि क्रोधादीनि सञ्ज्वलनेति सामान्याभिधानि, तानि सर्वविरतिस्थप्राणिनां अतीचाराद्युपप्लवकराणि । एवमेषु षोडशसु चत्वारि क्रोधाख्यानि, चत्वारि च मानाख्यानि, एवमष्टावपि द्वेष गजेन्द्रापत्यानि अविवेकिताप्रसूतानि, यानि च चत्वारि मायाख्यानि, चत्वारि च लोभाख्यानि तान्यष्टावपि रागकेशरिराजस्यापत्यानि मूढता कुक्षिजातानि, एते षोडशाऽपि कषाया महामोहराज्यपौत्राः सामान्येनेदं कषायस्वरूपं विशेषतस्तेषामेकैकस्याऽचिन्त्यशक्तिकं तं को निरुपयति ?

## विषयाभिलाषस्वरूपम्

अयं च रागकेशरिणः पुरतस्ताम्बूलमण्डितमुखः लीला-कमलमाजिघ्रन् भोग-

तृष्णायाः स्वप्रियायाः कण्ठे न्यस्तैकबाहुः तन्मुखन्यस्तनेत्रः तन्नूपुरकङ्कणादिशिञ्जितदत्तकर्णः युगपत् पंचाऽपीन्द्रिय विषयान् भुञ्जानो विषयाभिलाषनामा सचिवः अस्य चाऽर्धाङ्गनीयं भोगतृष्णापत्नी । अनेन विषयाभिलाषेन सपत्नीकेन भक्ष्याऽभक्ष्य-पेया-ऽपेय-हिता-ऽहित-कृत्या-ऽकृत्यविवेकविकलीकृतं जगदन्धवच्चेष्टते । एनं चाऽचिन्त्य-शक्तिकं मत्वा रागकेशरिनृपः सर्वराज्यभारधौरेयं चक्रे, स्पर्शनादीनि पञ्चाऽप्यस्याऽ-पत्यानि प्रागुक्तानि ।

अयं च पण्डितानपि मूर्खयति, धीरानपि कातरयति, संयमिनोऽपि विकारयति इत्यादि-'' विमर्शवचांसि निशम्य प्रकर्षः प्राह- ''मातुल ! त्वदनुक्तमप्यस्य वीर्यं स्वरूपदर्शनेनैवाऽहं जानामि, यतः आकृतिरेव गुणान् ब्रूते'' विमर्शः प्राह- वत्स ! घटत एव बुद्धि-विचक्षणयोः पुत्रस्य तवैतद् ज्ञानसामर्थ्यं तथाप्याकर्णयावशिष्टानामेषां मोहसत्कानां स्वरूपमिति'' विमर्शो वक्ति- ''हे प्रकर्ष! विलोकय मण्डपान्तराले ये एते कुविकल्प-दुष्टभावादयः स्थिताः सन्ति, ते सर्वेऽपि मोहराजस्य भटा यद्यप्येते सगोत्रीयास्तथापि मोहराजं स्वकुलोत्तमं मत्वा स्वामित्वेन सेवन्ते ।

## कर्मणां स्वरूपम्

तथा य एते मोहाग्रतो निषण्णाः सप्तपुरुषा महौजसो विलोक्यन्ते, तान् ज्ञानावरणीयादीन् सप्तनृपानवेहि । तेषु प्रथमोऽयं ज्ञानावरणीयनृपः स्वाङ्गीभूतमति-श्रुता-ऽवधि-मनःपर्यय-केवलज्ञानावरणाख्यमनुष्यपञ्चकवृतः, पञ्चाऽपि ज्ञानान्यावृणोति प्राणिनोऽज्ञानाऽन्धान् करोति, द्वितीयोऽयं दर्शनावरणीयनृपो निद्रा-निद्रानिद्रा-प्रचला-प्रचलाप्रचला-स्त्यानर्द्धि-चक्षुर्दर्शनावरणाऽ-चक्षुर्दर्शनावरणा-ऽवधिदर्शनावरण-केवलदर्शनावरणाभिधैर्नवभिर्मानुषैर्वृतः सामान्य-ज्ञानमावृणोति । साता-ऽसाताख्य मानुषद्वययुतस्तृतीयो वेदनीयराट् सुखाऽसुखविपाकमुपदर्शयति । अयं च देव-नर-तिर्यक्-नारकायुर्नामकमनुष्यचतुष्क-युतश्चतुर्थ आयुःकर्मराट् चतुर्ष्वपि गतिषु जीवान् काष्ठकीलितपादानिव करोति । पञ्चमो नामकर्मनृपः मनुष्यादिगति-चतुष्कैकेन्द्रियादिजातिपञ्चकौदारिकादिशरीरपञ्चकौ-दारिकादित्रिका-ऽङ्गोपाङ्गौ-दारिकादि बन्धन-पञ्चदशकौदारिकादिसङ्घातनपञ्चक-वज्रर्षभादिसंहननषट्क-सम-चतुरस्रादि संस्थानषट्क-वर्णपञ्चक-गन्धद्वय-रसपञ्चक-स्पर्शाष्टक-मनुष्याद्यानुपूर्वीचतुष्क-खगतिद्वय-त्रसदशक-स्थावरदशकोद्योता-ऽगुरु-लघूच्छ्वाऽसातपो-पघात-पराघात-निर्माण-तीर्थकृन्नामकर्मलक्षणैस्त्र्युत्तरशतमितैर्मानुषैर्वृतोऽयं जीवान् नानारू-पान् कृत्वा नाटयति । गोत्रकर्मनामा षष्ठोऽयं नृपः उच्चैर्गोत्र-नीचैर्गोत्राख्यभटद्वय-युतोऽ-

नन्तकुलादिषु प्राणिनो नियोजयति। तथा दान-भोगोपभोग-लाभ-वीर्यान्त-रायाभिधैः पञ्चभिर्भटैर्युतः सप्तमोऽन्तरायकर्मराट् जीवानां दानभोगादि-प्राप्तिं रुणद्धि ।

एते सप्ताऽपि राजानो मोहराजस्य कुटुम्बिनस्तथापि मोहराजाज्ञावशंवदाः सन्तो नानाविपाकैः संसारिसत्त्वान् विडम्बयन्ति । यदा च सामान्यदृष्ट्या विलोक्यन्ते तदात्वेतेसप्तैव दृश्यन्ते भटपरिकरस्तु नाऽवभासते । यदा तु विशेषमपेक्ष्य विलोक्यन्ते तदा तु एतेषां भटा एव विलोक्यन्ते न चैते दृश्यन्ते, अत एवाऽनेकान्तमतं सिद्धान्त इति जिनैरुपदिश्यते, यतः समुदायमात्रं सामान्य-विशेषप्रकाराभ्यां कथञ्चिद्भिन्नं कथञ्चिदभिन्नं च स्यात्, यथा तन्तूनां पृथक् पृथगुपादाने पटस्याभाव एव स्यात् तथा सम्पूर्णपटापेक्षया तन्तवोऽपि नोपलभ्यन्ते । यथा च एकैकस्य वृक्षस्योपादाने वनाभावः, सामान्येन वनग्रहणे पृथग् वृक्षाभावः, तथा कर्मणां मूलप्रकृत्युपादाने उत्तरप्रकृतयो भिन्ना नोपलभ्यन्ते, उत्तरप्रकृतिविवक्षायां तु मूलप्रकृतेर्नोपलम्भः । इत्थं सामान्य-विशेषभेद द्वयोपादाने सर्वं समञ्जसम् । पुनर्विमर्श आह- "एतेषु सप्तसु तृतीय-चतुर्थ-पञ्चम-षष्ठा एते चत्वारस्तु केषाञ्चिद् दुःखप्रदाः केषाञ्चिच्च किञ्चित् सुखप्रदा अपि । यथा शरीरादियोगाद् व्याधादयो हिंसां कुर्वन्ति, तथा साधुजनश्च जीवरक्षां करोति । प्रथम-द्वितीय-सप्तमास्तु सपरिकराः सर्वजीवाना-मप्येकान्तदुःखप्रदा एव ।

## मोहभटस्य जेतारः दुर्लभाः ।

"इत्यादि-विमर्श-वार्त्ताः समाकर्ण्य प्रकर्षः प्राह- "मातुल ! सम्भवति कश्चित् भवजन्तुरीदृशो यमुपद्रोतुं समस्तमपीदं मोहसैन्यं न प्रभवति ?" विमर्श आह- "सम्भवत्येव तात ! ये केचिद् भव्यसत्त्वाः सुनिर्मलमनसोऽनादि-निधनभव-समुद्र-स्वरूपमवगम्य, दुःष्प्रापां धर्मचतुरङ्गीं प्राप्य, धीरतमाः सद्भूतभावनावशाद् अप्रमत्ततया प्रवर्त्तन्ते, तान् प्रति महामोहः सपरिजनोऽप्यकिञ्चित्कर एव स्यात् । तथा च जलबुद्बुदप्रायमायुः, क्षणभङ्गुरं च देहस्वरूपं, सन्ध्यारागप्रायं यौवनम्, आपातरम्यं विपाकदारुणं किम्पाकफलतुल्यं विषयसुखं, परिजनसङ्गमं च पक्षिसङ्गमतुल्यं विज्ञाय जीवितव्यादिषु योऽनित्यत्वं विभावयति तस्मिन् मोहनृपस्य महामूढतायाश्च रागद्वेषा-दीनां शोक-भय-हास्यादीनां वा बलं न स्फुरति । तथा जिनोक्तमार्ग-प्रतिपत्त्या यः स्वात्मानं विशदीकुरुते तस्मिन् मिथ्यात्वाऽमात्यस्य तत्प्रियायाः कुदृष्टेश्च न शक्ति-प्रचारः स्यात् । यश्चाऽमेध्य-मूत्र-वशा-मांसादि-बीभत्सं देहं मत्वाऽशुचिभावना-भावितं मनो धत्ते, ततः सपत्नीकोऽपि पञ्चेषु श्च्यूतेषु दूरत एव तिष्ठति । यः पुनर्निखिलाऽम्भोधिजलैरपि मलमूत्रोद्भवः स्वभावाऽशुचिदेहः कथं शुद्ध्यतीत्यादि

भावयति स जुगुप्सां क्षणार्धाद् दिगन्ते क्षिपति । तथा यः किल ज्ञानभक्त्या पञ्चविध-स्वाध्यायादि-ज्ञानाभ्यासं कुरुते कारयति वा साहाय्यं तदनुमोदनं च कुरुते स ज्ञानावरण-दर्शनावरणाख्यौ नृपौ पराभवति । यश्च सप्तक्षेत्र्यां वित्तमुप्त्वा वितृष्णो ज्ञानाचारादिषु वीर्यं स्फोरयति सप्तमोऽन्तरायनृपस्तमुपद्रोतुं न शक्नोति । इत्थं सर्वेषामपि मोहभटानां जयनोपाया जेतारश्च सन्ति जगति, परं यथा शैले शैले माणिक्यं न स्यात्, गजे गजे मौक्तिकं न स्यात्, वने वने च चन्दनं न स्यात् तथा तेऽपि मोहसैन्यविजेतारो जगति स्तोकतरा एव भवन्ति'' ।

## भवचक्रनगरं प्रति प्रकर्श-विमर्श-विमर्शयोः प्रयाणम् ।

इत्याद्यनेकनिर्णयमय्यो विमर्शोक्ता वार्त्ताः समाकर्ण्य पुनः प्रकर्षोऽभिदधे- ''मातुल! एवंविधाः समासन्नसिद्धिका भव्यजीवाः क्व निवसन्ति?'' इति, विमर्श आह- ''शृणु वत्स ! तत् निवासस्थानं अस्त्यनाद्यनन्तं समस्तवृत्तान्तोत्पत्तिभूमिः भवचक्राभिधनगरं समस्ताश्चर्यमयं समस्तबाह्यान्तरङ्गपुराणामाधार-भूतमनन्तवास्तव्य-जनाकीर्णं, तच्च पुरमान्तरङ्गतया बाह्यतयाऽपि ख्यातम्, तत्र नगरे मोहनृपादीनां विजेता सन्तोषनामा महाभटो निवसति, तदुपान्ते आसन्नभवसिद्धिका निवसन्ति ।'' अत्र प्रकर्षः प्राह- ''मातुल ! तत्राऽपि किं मोहादयो भवन्ति ?'' विमर्शः आह- ''भवन्ति वत्स! तत्राऽपि मोहादयो यतस्ते योगशक्तिमन्तोऽनेकानेकैः रूपैः पर-पुरप्रवेशं विदधते ।'' प्रकर्ष आह- ''तं मोहादिविजेतारं सन्तोषं, तान् भव्यसत्त्वान् तद्भवचक्राभिधं च पुरं विलोकयितुं मे महत् कौतुकं तदाऽऽवां यावस्तत्र'' इत्याकर्ण्य विमर्शेनोक्तं- वत्स ! आवां रसना-मूल-शुद्धिमधिकृत्य निर्गतौ, तत् तु ज्ञातं यद् राग केशरिराजस्य मन्त्रिणो विषयाभिलाषस्य पुत्रो स्पर्शनादीनां भगिनी रसनेयमिति प्रस्तुत-कार्य-साधनान्तरं किमधिककालक्षेपेनेति यावः कृतकृत्यौ स्वगृहमेव।'' तदा प्रकर्षः प्रोवाच- ''मातुल! वर्षमात्रावधिकालमध्येऽद्याऽपि मासषट्कमवशिष्यते, ततो दर्शयावः कौतुकमिति ।''

तदाग्रहात् निर्गतौ भवचक्रावलोकनार्थं मार्गे पुनः प्रकर्षेण पृष्टं- ''मातुल ! श्रूयते कर्मपरिणामाभिधो राजा महावीर्यस्तत् किमसौ महामोहादपि बलवान् भविष्यति ? किं वा महामोह एव कर्मपरिणामः ?'' विमर्शः आह- ''कर्मपरिणामस्तु मोहराजस्य ज्येष्ठभ्राता सर्वाधिकारी, परं स तु नाटकप्रियः, केवलं मोहराजस्तु सङ्ग्रामरसिको लुण्टाकः ततश्चित्तवृत्त्यटव्यां निवासमासूत्र्य विश्वं मुष्णाति यदेव मोहसैन्यं तदेव कर्मपरिणामसैन्यं, परं स्वानुजे मोहराजे राज्यचिन्तां विन्यस्य स्वयं सपत्नीको

नानाभवजन्तुनाटकानि पश्यन् सुखमास्ते । कर्मपरिणामस्तु जन्तूनां यथा कष्टं ददाति तथाऽन्तराऽन्तरा सुखलवमपि ददाति मोहराजस्तु केवलं दुःखप्रद एव । तथा कर्मपरिणामराजेन मोहराजस्य राजसचित्त-तामसचित्ताभिधे द्वे नगरे भुक्त्यां दत्ते स्तः। एतेषा-मान्तरङ्गपुराणां चित्तवृत्त्यटव्याश्च राजा तु प्राग् भवजन्तुरेव । आभ्यां तु प्रबलीभूय प्रसह्य भवजन्तुं स्वराज्याद् दूरे व्यपास्यैतद् राज्यं स्वायत्तीकृतमस्ति, न पुनः पर्य्यायागतं, न चाऽधुनैवाभ्यां राज्यं गृहीतमस्ति किञ्चाऽनन्ताऽनन्तः कालोऽतिक्रान्तः तत्प्रमितिं केवल्येव वेत्ति इति, ततः कर्म-परिणामनृपः सर्वोपरिवर्त्ती, मोहराजस्तु तत् सेनामादाय लोकान् विजित्य राज्यं वर्धयति ।" इत्यादि-वार्त्ता-विनोदेनाऽज्ञात-मार्गलङ्घनश्रमौ तौ मातुल-भागिनेयौ वेगाद् भवचक्रपुरं प्राप्तौ ।

## वसन्तर्तुवर्णनम्, जननां मोहाधीनता ।

इतश्च कामदेवस्य वयस्यो वसन्त नामा सोऽपि तत्राऽऽगतः । अथ तत्रोद्यानेषु नव-किशलय-प्रसून-पुञ्ज-सुषमातिसुन्दरास्तरवः वातोत्कम्पित कुसुमस्तबकभरावनम्राः प्रतानिन्यः उन्मद-पिक-निकर-कुहूकारमुखरितोद्यान-भूमयः, अमन्दमकरन्दास्वाद मोदमत्तालिमाला-झङ्कार-रवाभिरामाश्चाऽऽरामा युगपद्-वसन्तराजस्यैकातपत्रतामा-चख्युः। इत्थमुद्यान-शोभां निरीक्ष्य विमर्शः प्रकर्षं प्रत्याह- "तात! पश्यावोऽत्र वन-शोभामिति ।" पश्यद्भ्यां ताभ्यां तत्र वने स्थाने स्थाने निबद्धपानगोष्ठिकाः केचित्, केचिच्च पीतमद्याः, केचिच्च मदक्षीबतया भुवि लुठन्तः, केचिच्च प्रियामाश्लिष्य गायन्त, इत्थं प्रतिमण्डपं प्रतिकुञ्जं विविधं विचेष्टमानाः पौरगणा व्यलोक्यन्त ।

अत्रान्तरे महर्द्धि-विस्तरेण वाद्यमानै-र्नानाऽऽतोद्यनादैर्दिशो मुखरयन् चतुरङ्गसेना-भिवृत्तो धृतातपत्र-चामरादि-राजचिह्नस्तत्रत्यो लोलाक्षनामा बाह्यराट्वसन्तोत्सवार्थ-मागतस्तमायान्तं वीक्ष्य विमर्श आह-"प्रकर्ष! पश्यैषां महामोह-रागकेशरि-विषया-भिलाष-भोगतृष्णा-कामदेवादिवशंवदानां जनानां जडत्वं वैकल्यमकार्यकारित्वं च।"

अथ तदालोक्य प्रकर्षः स्माह- "मातुल ! कथमेते मोहादि-वशंवदा उन्मत्तीभूय विचेष्टन्ते ?" विमर्शो वक्ति- "शृणु प्रकर्ष! कर्मपरिणामराजस्य पत्नी कालपरिणति-र्देवी, तस्या हिम-शिशिर-वसन्त-ग्रीष्म-प्रावृट्-शरन्नामानः षट्-सुभटाः सन्ति, ते च यथाक्रमं देव्या नियोगं लब्ध्वा भवचक्रपुरस्य मानवावासाख्यान्तरपुरे समागत्य स्ववारकावधि स्वाज्ञां प्रवर्त्तयन्ति । यदा च वसन्तस्य वारको भवति तदा मोहराजोऽपि वसन्तप्रियमित्रं कामदेवं स्वप्रतापवृद्ध्यर्थं तत्र नियोजयति इति, तदद्या-ऽपि वसन्ता-वसरे कामराजेनाऽऽगत्य सर्वोऽप्ययं जनो विजित्य मोहादि-वशंवदः कृतोऽस्ति ।"

## मानवावासपुरे मोहसाम्राज्यम् ।

किञ्च मोहराजादयोऽप्यन्तरान्तरा समभ्येत्य स्व-स्व-व्यापारं कुर्वन्ति, परं ते योगशक्तिभाजः सन्ति, ततो न साक्षाद् दृश्यन्ते । अहं तु विमलालोकाख्य-योगाञ्जन-शक्त्या सर्वानपि तान् पश्यामि । तवाऽपि तद्-दर्शनस्य चेत् कौतुकं, तद् गृहाण त्वमपि इदं योगाञ्जनमित्युक्त्वा विमर्शेनाऽञ्जिते तेनाञ्जनेन प्रकर्षस्य चक्षुषी । अथ तदनुभावाद् व्यलोकयदसौ सर्वं यथोक्तस्वरूपं, जगाद च सविस्मयं- "मातुल ! महत्कौतुकमिदं त्वया मे दर्शितमिति ।" पुनः विमर्शः प्राह- "किमेतद् वत्स ! कौतुकं ? इतोऽप्यग्रे भवचक्रनगरे महत्कौतुकं द्रक्ष्यते ।" पुनः प्रकर्षः प्राह- "मातुल! अत्र वसन्तोत्सवे मानवावासस्य राज्यं कामदेवस्य दत्त्वा मोहराजस्तु तत् परिच्छदीभूय प्रस्तावे व्यापारं कुर्वन् दृश्यते । तथा रागकेशरि-विषयाभिलाषभोगतृष्णादयोऽपि स्व-स्वव्यापारासक्ता विलोक्यन्ते । परं द्वेषगजेन्द्र-शोकादयस्तु न दृश्यन्ते, तत्-कथमिति ?" तदा विमर्शोऽवोचत्- "वत्स ! द्वेष-गजेन्द्रादयोऽप्यत्रैव सन्ति, परं साम्प्रतं निलीय स्थिताः सन्ति, स्वावसरे प्रकटीभविष्यन्ति ।" पुनः प्रकर्षेणोक्तं- "किमेते मोहादयोऽत्राऽऽयाताः सन्ति तर्हि चित्तवृत्त्यटवी शून्या भविष्यति !। विमर्शः स्माह एते मोहराजादयस्तु कामरूपाः सन्ति । इच्छा-वशादनन्तरूपा भवन्ति, तदेते यथाऽत्राऽपि सन्ति तथा तत्राऽपि सन्ति ।

## मद्य-परदारगमनकारणेन महाविनाशः ।

अथाऽत्रान्तरे वसन्तोत्सवायातो लोलाक्षनृपो हस्तिस्कन्धादवरुह्य चण्डिका-यतनमध्ये प्रविश्य मद्यादिभिश्चण्डिकां सन्तर्प्य, ततः पानगोष्ठ्यामागत्य सपरिजनो निविष्टस्तत्र कनकचषकेषु मद्यमापूर्याऽऽपूर्य पातुं, परिजनं पाययितुं च प्रवृत्तस्ततः सर्वेऽपि ते लोलाक्षादयः प्रचुरासव-पान-परवशा यावद् विविधं विचेष्टमानाः सन्ति, तावद् लोलाक्षस्याऽनुजो रिपुकम्पनः मददर्पविकल स्तत्रमण्डल्यां स्वप्रियां रतिललितां नर्त्तयितुं लग्नः । साऽपि मदौद्धत्यात् विगलित-त्रपा-निगडा ज्येष्ठस्य परिजनादीनां च लज्जामवगण्य यावन्नरीनर्त्ति तावद् रिपुकम्पनस्त्वतिमहामोहावेशाद् उद्वमन् निश्चेष्टीभूय भुवि लुलोठ । अन्योऽपि सर्वः परिजनो मदक्षीबतया निश्चेष्टः पतितोऽस्ति, तदवसरे लोलाक्षनृपस्तां रतिललितां मदोद्धतां घूर्णमानलोचनां स्रस्तोत्तरीयां स्खल-त्पदन्यासां नृत्यन्तीमवलोक्य भोगतृष्णया विवशीभूतस्तां ग्रहितुमुत्थितस्तावत् सा ज्येष्ठस्य दुरभिप्रायं मत्वा नष्टा, लोलाक्षेण च पश्चादापतत्य वस्त्राञ्चले धृता, पुनः सा तद्-हस्तमाच्छोट्य चण्डिकायतनं प्रविश्य चण्डिका-पृष्ठे निलीय स्थिता ।

अथ द्वेषगजेन्द्रः स्वावसरं विज्ञाय लोलाक्षस्यांऽङ्गेऽवतीर्णः, तदा खड्गमाकृष्य तेन चण्डिकाया मूर्त्तिर्विपाटिता । पुनस्ततोऽपि रतिललिता पूत्कुर्वन्ती पलाय्य रिपुकम्पनान्तिकमागता । लोलाक्षोऽप्याकृष्टाऽसिस्तामन्वागतः रिपुकम्पनः पूत्कारं श्रुत्वा सचेतनीभूतः खड्गमाकृष्योत्थितो जातश्च कोलाहलः, समुत्थिताश्चाऽऽकृष्टपाणयः सर्वे भटाः। मदर्पवशादलब्ध-स्व-परिविभागाः प्रवृत्ताः परस्परं प्रहर्त्तुं, निहताश्च शतशो भटाः पलायिता लोका इतस्ततः ।

अत्राऽन्तरे विमर्शः प्रकर्षं वक्ति- "विलोकय वत्स ! आविर्भूतोऽयं द्वेषगजेन्द्रः, पश्याऽधुनाऽस्य वीर्यमिति ।" पश्यतो द्वावपि तावत् निपातितो लोलाक्षो रिपुकम्पनेन, जातश्च हाहाकारः । तद्विलोक्य विमर्शः प्रकर्षमाह- "पश्य तात ! मद्य-परदाराभिलाषयोरनर्थकारित्वम्, अत एव त्यजन्ति सुधियो मद्यं परदाराश्च ।

## मिथ्याभिनिवेश-धनगर्व कृता जीवस्य दुर्दशा

अथ रिपुकम्पनो भ्रातरं हत्वा स्वयं नृपो जातः, प्रवर्त्तिता जनपदे स्वाज्ञा । विमर्श-प्रकर्षावपि पुरं प्रविश्य कौतुकं विलोकयतः, तदवसरे मिथ्याभिमानो रिपुकम्पनाऽङ्गे प्रविष्टः । इतश्च रिपुकम्पनस्याऽन्यया राज्ञ्या पुत्रः प्रसूतः तदभिधायकाभ्यश्चेटीभ्यो दत्तानि मुकुट-कुण्डल-ग्रैवेयकाद्याभरणानि नृपेण, मिथ्याभिमानावेशात् चिन्तितं चाऽहो ! भाग्यनिधिरहं यत् समकमेव राज्यलाभ-पुत्रलाभौ मे जाताविति । प्रारब्धः प्रतिगृहं प्रतिचत्वरं महोत्सवः, प्रमोदमेदुरं यावत् तत् समस्तं राजकुलमस्ति, तावत् मतिमोह-शोकाख्यौ द्वौ सुभटौ राजकुलं प्रविशन्तौ वीक्ष्य प्रकर्षेण पृष्टं- "मातुल ! एतौ मतिमोह-शोकौ क्व यास्यतः ?" विमर्शेणोक्तं- "राजकुले साम्प्रतमेतयोर्वारक आयातोऽस्ति ततो विलोकय एतयोर्विलसितमिति ।" तावता एकया चेट्या नृपान्तिकमागत्योक्तं- "स्वामिन् ! कुमारस्याऽङ्गेऽस्वास्थ्यमस्ति इत्याकर्णनमात्रात् मति-मोह-शोकाभ्यामाक्रान्तो नृपो दुःखपीडितमनाः पुत्राभ्यर्णमागत्य नानामन्त्र-तन्त्रौषधादि कारयितुं लग्नः, परं ते सर्वेऽप्युपाया ऊषरे वृष्टय इव विफला आसन् । क्षणान्तरे मृतः स बालस्तद्दुःखार्त्तो नृपस्तन्माता च द्वावपि दम्पती मतिमोहाविष्टौ शिरःस्फोट-हृदयप्रहारार्दितौ मूर्च्छामाप्य मृतौ । जातं च शोकाकुलं समस्तं राजकुलं, तद् दृष्ट्वा विमर्शोऽभ्यधाद्- "विलोकय वत्स ! भवचक्रनगरकौतुकम् ! प्रकर्षोऽपि साश्चर्यम्- "अहह मोहसैनिकानां दुर्विलसितमित्यनेकवार्त्तापरौ प्रचलितौ ततोऽन्यत्र मातुल-भागिनेयौ स्थितौ च विपणि-वीथ्यां कौतुकावलोकनार्थम् ।

तत्र चैको महेभ्यो हट्टे निविष्टोऽस्ति, तस्य पुरतो बहवो वणिक्पुत्रा लेखन-तोलन-क्रय-विक्रयादिवाणिज्यं कुर्वन्ति । नानामणि-रत्न-स्वर्ण-रूपाद्युच्चयाः पतिताः सन्ति। अथ तं दृष्ट्वा प्रकर्षो विमर्शं जगौ- "मातुल! किमयं वणिक् प्रणतिकारिणोऽपि नरान् कटाक्षेणाऽपि नाऽवलोकते ? स्तुतिपरान् याचमानान् वा किं चिरेणाऽपि न प्रतिवक्ति, न शृणोत्यपि, नोर्ध्वं विलोकतेऽपि ।" विमर्शः प्राह- "वत्स! एतस्याऽङ्गे मिथ्याभिमानस्य भ्राता धनगर्वाभिधः प्रविष्टोऽस्ति तद्वशा-दस्येदृशी दुरवस्था जाताऽस्ति । परमयं धनादिकं क्षणक्षयीति न जानाति ।" इति यावत् तौ वार्त्तां कुरुतस्तावत् रागकेशरिनृपसुतोऽनन्तानुबन्धि-लोभः तस्याऽङ्गे प्रविष्टः, अत्रान्तरे कश्चिद् भुजङ्गो रहसि तं श्रेष्ठिनमाकार्य बहुमूल्यं रत्नखचित-मुकुटमदर्शयत्, श्रेष्ठ्यपि स्तेनाऽऽहृतं विज्ञाय लोभवशात् किञ्चित् स्वल्पमूल्यं तस्य दत्त्वा मुकुटं जग्राह, गतो भुजङ्गः, क्षणाद् बिभीषणनृपस्य सैन्यं भुजङ्गस्य पदानुसारेण तत्राऽऽ-गतं, धृतो भटैः श्रेष्ठी समुकुटः, लुण्टितं च सर्वं तस्य धनसुवर्णाद्यं, विडम्बितश्चाऽसौ सर्वजनसमक्षं खरारोपादि-विविध-विडम्बनाभिः ।

## समृद्धि-स्थिरतोपायाः

अथैतवदलोक्याऽऽश्चर्याकुलमनाः प्रकर्षो बभाषे- "मातुल ! किमेतदिन्द्रजाल-विलसितं ? किं वा स्वप्नोऽयं ? क्षणमात्रादस्यैवंविधर्द्धिविस्तरः कथं व्यलीयत ?" विमर्शः प्राह- "इयं गतिरेव सदा धन-वैभवादीनाम्, अत एव सत्पुरुषा धनगर्वं न कुर्वते । धनलोभिनः पुरुषाः अकार्यशतै-र्नीचजनसेवनैर्दुष्करोपायसहस्रैः कृच्छ्रेण धनान्यर्जयन्ति, परं तानि शारदाभ्रपटलानीव तेषां पश्यतामेव कुतोऽपि यान्ति । अत्र प्रकर्षो जगाद मातुल ! स्वभावचपलमेतद् धनं कथमपि स्थिरीभवति ?" तदा विमर्शः स्माह- "शृणु वत्स ! धन स्थैर्योपायान्, यः किल न्यायार्जितं धनं लब्ध्वा शुद्धाचारैः प्रवर्त्तते, दीनानाथादिजनाननुकम्पते, परपीडां न कुरुते, स्वशक्त्या चोपकुरुते, चित्तं वशीकुरुते, सुक्षेत्रेषु धनं व्यापारयति धनमूर्च्छां न विधत्ते इत्याद्युपाय- परस्य तस्य पुंसः पुण्यानुबन्धिपुण्य निगडितं धनं स्थिरीस्यात् ।

## वेश्याऽऽसक्तानां दुर्दशा

इत्थं नाना वार्त्ता-विनोदपराभ्यां ताभ्यां तदवसरे कश्चिद् युवा दरिद्रः परिहित-मलिम्लुचशटितप्रायांऽशुकः किञ्चिद्-द्रव्यव्ययेन चतुष्पथमध्याद् मोदक-ताम्बूलादि गृहीत्वा किञ्चित् निष्क्रयेण रजकगृहाद् विशदवासांसि परिधाय सुरभितैल-पुष्पा-दिभिः स्वाङ्गं विभूष्य क्वापि व्रजन् ददृशे तमालोक्य प्रकर्शः पप्रच्छ मातुल! कोऽयं

दुर्विध-प्रायोऽपि स्वाङ्ग-विभूषापूर्वकं मोदक-ताम्बुलादि लात्वा क्व गच्छन् भविष्यतीति?'' विमर्शः प्राह- ''शृणु वत्स! अयं समुद्रदत्तेभ्य सुतो रमण नामा एतन्नगरवास्तव्यो गणिका-व्यसना-धीनतया निष्ठापित सकलपितृधनो दास्यकर्मभिर्लोकगृहेष्वाजीविकां विधत्ते । अद्य तु कुतश्चित् किञ्चिद् द्रव्यलेशमवाप्य तद्व्ययेनाऽङ्गविभूषादि-पूर्वकं मदनमञ्जर्याः पण्ययोषितः सुतायाः कुन्दलतायाः पार्श्वे याति । प्रागपि तयैवाऽस्य पितृसत्कमसङ्ख्यं धनं निष्ठापितं, तदनु निर्धनं शबप्रायं मत्वा गृहादेनं निरकासयत्, तथाप्यद्याऽयं भोगतृष्णया विवशी-कृतः कामदेव घातितः पुनस्तत्र याति, पश्याव आवामप्येतत् कौतुकमिति । तमनुगतौ विमर्श-प्रकर्षावपि गणिकालयम् ।

अत्रान्तरे नक्रमोटन-पूर्वकं प्रकर्षः प्राह- ''अहह ! कोऽयं महान् दुर्गन्धः समुच्छलति?'' विमर्शः प्राह-''वत्स! किं न पश्यसि विष्टापिठर्या एतस्या गणिकायाः शरीरोत्थोऽयं दुर्गन्धः यत एता अमेध्यपूर्णभस्त्रा-प्राया द्वादशरन्ध्रनिर्यन्मल-मूत्राद्याविलाः कृमि-वसा-मांसा-ऽस्थि-श्लेष्मप्रभृत्यशुचिवस्तु-व्याप्तान्तराः कृत्रिमगन्ध-पुष्पादिसंस्कारैः क्षणरम्यां शोभामुत्पाद्य कामान्धीकृतजनान् मोहयन्ति ।'' इत्याकर्ण्य प्रकर्षः प्राह- ''अहो ! सोढुमशक्योऽस्या दुर्गन्धः । यावो बहिरिति'' कृत्वा निर्गत्य स्थितौ बहिर्द्वारे विलोकयतः ।

अथ रमणो गतो गृहान्तर्दृष्टा मदनमञ्जरी । अथ तया तमायान्तं वीक्ष्य किञ्चिच्च सम्भोगं लक्षयित्वा सादरं कपटवाक्यं बभाषे- ''अहो ! सुभग ! त्वद् गमनदिनादारभ्य मत्सुता कुन्दलतिका त्वद्विरहेण जलाद् दूरीकृता सफरीवाऽत्यन्तं ताम्यति'' इत्यादि वचोभिः कपटरागमुपदर्श्य पुनराह- ''साम्प्रतं राजपुत्रः चण्डाभिधोऽत्राऽऽयास्यति ततो मुहूर्त्तमात्रं निलीय तिष्ठतु भवानिति'' यावद् वदति तावद् उपागतश्चण्डस्तद्दर्शनादेव प्रविष्टो रमणस्याऽङ्गे भयनामा मोहसैनिकः। अथ दृष्टमात्रात् सञ्जातकोपेन चण्डेन छुरिकया कर्ण-नाशाच्छेदं कृत्वा चक्षुषा काणीकृत्य पादप्रहारादिभिर्भृशमाहत्य पण्ययोषिद्भ्यां नाना विकत्थनपराभ्यामुपहस्यमानो गृहात् निष्कासितो रमणस्तत्राऽपि चण्डस्य भटैर्गाढं यष्टि-मुष्ट्यादिभिः प्रहतः पञ्चत्वं प्रपेदे । इति तद् वृत्तान्तं विलोक्य विमर्श आह- ''पश्य प्रकर्ष ! वारयोषितां कौटिल्यं कपटपाण्डित्यं च, पश्य च कामदेवस्य शक्तिं, पश्य गणिकासत्कानां दुष्टोदर्कम्, अत एव सत्पुरुषैः जाति-शील-धन-लज्जादि-रिरक्षिषयाऽनेकाऽनर्थपूरप्रवाहिन्यः पण्ययोषितो दूरत एव परिहर्त्तव्याः'' पुनर्विमर्शो जगौ- ''वत्स ! अनन्तानन्तकौतुकमयं

भवचक्र-नगरं, स्तोकानि चावयोरवधिदिनानि, तदेहि यावो विवेकपर्वतं, तच्छिखरमारुह्य पश्यावो युगपदेव समस्तं भवचक्रचरितं, विवेकशिखरस्थितानां हि सकलं भवचक्र-स्वरूपं दृष्टि-गोचरीभवतीत्यारूढौ द्वावपि विवेकाद्रिशृङ्गं पश्यतो भवचक्रस्वरूपम् ।

## द्यूतव्यसनकृता दुर्दशा, शिकार-मांसभक्षणदोषाः ।

अत्राऽन्तरे कश्चिदेकः पुमान् भयवेपमान-गात्रो विवसनः खटिका-धवल-हस्तः पिशाच इव क्षुत्-क्षाम-कुक्षी दीनवदनो विकीर्णकेशस्तरलितदृशा दिशः पश्यन् कैश्चिन्नरैर्वेष्टितो- दृक्पथमागतः, तदा प्रकर्षेण- "कोऽसाविति पृष्टे विमर्शः प्राह- "कुबेर-सार्थवाहस्य महाधनिनः पुत्रोऽयं धनेश्वरनामा द्यूताद्यासक्तो लोकैः कपोत इव यथार्थकृताभिधो व्यसनापलक्षणात् पित्रा बहिष्कृतः, शतशश्चौर्योद्यपराधेऽपि राज्ञा रासभरोहणादिभिर्विडम्ब्य वणिक्पुत्र इति जीवन्मुक्तोऽद्य रात्रौ शिरः प्रतिज्ञाय क्रीडन् द्यूते पराजितो द्यूतकारैरेभिः सर्वैः सम्भूय शिरश्छेदार्थं वेष्टितोऽस्ति" इत्या-कर्ण्य प्रकर्षोऽवोचत्- "मातुल ! यदित्थं धनवैभवादि-क्षयकरं प्राणापहाराद्यनर्थहेतु द्यूतं पश्यन्ति तर्ह्येते लोकाः कथमेतदाचरन्ति ?" विमर्श आह- मोहराजेन स्वशक्त्या-ऽन्धीकृताः पश्यन्तोऽपि न पश्यन्ति । ये तु मोहद्यपराभूताः सन्ति ते तु दूरत एव द्यूतं त्यजन्ति, इत्यादि-वार्त्ताऽन्तरे पुनः प्रकर्षेण पृष्टं- "मातुल ! कोऽयं कश्चिदश्वारूढोऽ-टव्यामाकृष्टाऽसिः शृगालमनुधावति ? किमर्थमसौ भीष्मग्रीष्मातपे क्षुत्-तृषाऽऽ-कुलिताङ्गोऽटव्यां पर्यटति ?" विमर्शः प्राह- "वत्स ! अयं ललितपुराधिपो ललन-नामाऽति-मृगायाऽऽसक्तोऽहर्निशं तत्परतया विस्मारितसकल-राज्यकार्यः प्रधानादि-भिर्बहुशो निषिद्धोऽपि मृगयाममुञ्चन् राज्याऽनुचितोऽयमिति कृत्वा देशात् निष्कासितः स्थापितश्चैतत् पदेऽस्य पुत्रः, सोऽयं ललनो वने क्षुधा तृषा भृशं बाधितोऽपि मांस-लोलुपतयाऽनिशं पर्यटन्नास्ते । इहाऽपि स्वजनधनादिभ्रष्टः परत्राऽपि च निरयादिगतिं लप्स्यते ।" यावत् मातुल-भागिनेयाविति वार्त्तां कुरुतस्तावदसौ शृगालन्यस्तदृष्टि-रश्ववेगादलक्षित-भूमिवैषम्योऽगाधगर्त्तोदरे सतुरगः सहसा पपात क्षणात् मृतश्च । तद् विलोक्य विमर्श आह- "पश्य वत्स ! आखेटकफलं, ततः सद्भिः साक्षाद् दुष्टोदर्कं विज्ञाय वर्जितव्यं मांसभक्षणं पापर्द्धिकरणं च ।

## विकथा फलम् ।

अथैतदवसरे किञ्चित् पुमांसं यमकिङ्करप्रायै राजपुरुषैर्जिह्वामुत्पाट्य तप्तं त्रपु पाय्यमानं विलोक्य प्रकर्षोऽपृच्छत्- "मातुल! कोऽयं ? कोवाऽस्याऽपराधो भविष्यति ?

यदमी तप्तत्रपु पाययन्ति एनमिति ।'' विमर्शोऽवदत्- ''चणकपुरवास्तव्यः सुमुखनामा श्रेष्ठी महाधनो स बाल्यादेव स्त्रीकथा-भक्तकथा-देशकथा-राजकथा-लक्षणासु चतसृष्वपि विकथास्वत्यासक्तिमान् वाचाटो लोकैर्दुर्मुख इति धृत-यथार्थनामाऽन्येद्यु पुरनृपे तीव्राभिधे कञ्चिद् रिपुभूपमभिषेणयितुं प्रस्थिते कतिचिद् दिनेषु व्यतीतेषु ''अस्मन्नृपस्तु प्रत्यर्थि-नृपेण पराभूतः कुतोऽपि गतः, प्रत्यर्थिसैन्यं चाऽत्र पुरमोषार्थ-मायातीति पलायध्वं भो लोका !'' इत्यनेन विप्रलपितम् । तत् त्रासात् पुरजनः सर्वोऽपि पलायितः, पुरं शून्यं जातम् । इतश्च सत्वरमेव तीव्रनृपः शत्रुं विजित्य जितकाशी पुरमागतो, लोका अपि नृपागमन-मुदिताः पुरमायाताः । क्रमात् नृपेण पुरत्रासकारणे पृष्टे कस्यचित् मुखात् त्रासोत्पादनमूलमेनं दुर्मुखमवेत्य कोपाध्मातेन राज्ञा स्व-सेवकान् प्रत्यादिष्टं- ''यदुत भो भटा ! यया जिह्वयाऽनेन दुर्मुखेन विप्रलपितं सा जिह्वा समूल-मुन्मूल्यताम् यद्-गलनालादियं प्रवृत्तिर्निर्गता तत्र गलनाले तप्तं त्रपु क्षिप्यतामिति ।'' तदेते भटाः नृपादेशादस्य विरुद्धभाषणफलमेतदुपदर्शयन्ति तदा प्रकर्ष ऊचे- ''विकथासक्तानामविमृष्टभाषण-पराणामियमेवावस्था भवति, अत एव सत्पुरुषाः सर्वजनहित-परिमित-तथ्य-भाषका एव गीयन्तेऽतो हितेच्छुभिर्विकथा वर्जनीयाः ।''

तदवसरे एकः कश्चिदुज्ज्वलः पुमान् राजमार्गे याति, तं दृष्ट्वा प्रकर्षेण पृष्टं- ''कोऽयं शुभ्रतनुः पुमान् यातीति ?'' विमर्शो जगौ- ''वत्स ! अयं रागकेशरिराजस्य भट्टो हर्षनामा मानवावासपुरवास्तव्यस्य वासवनाम्नो महेभ्यस्य चिरविप्रयुक्त-धन-दत्ताभिध-वयस्यसमागममुदितस्य गृहे याति इति गतो हर्षस्तत्र । अथ वासवश्चिरेणागतं धनदत्तं वीक्ष्य हर्षवशात् समालिङ्ग्याऽऽसनं दत्त्वा कुशलादिवार्त्तां पप्रच्छ, प्रमुदितः सर्वोऽपिगृहजनः, एवं वासवः सपरिजनो यावत् महाहर्षवशो मित्रेण विनोदवार्त्तां करोति तावदेको लम्बनकनामा वासवस्य गृहदासो देशान्तरादेत्य म्लानवदनः किञ्चिद् वक्तुमुपचक्रमे । अथ तदैवेकं श्यामपुरुषं वासवगृहं प्रति व्रजन्तं वीक्ष्य प्रकर्षेण ''कोऽयमिति ?'' विमर्शं प्रति पृष्टं- विमर्शः प्राह- ''वत्स ! अयं शोकस्य मित्रं विषादनामा मोहसैनिको वासवगृहं याति । यतोऽस्य वासवस्योपयाचितशतैरेको वर्द्धनमाना पुत्रोऽभूत् । क्रमेण स यौवनं प्राप्तो वाणिज्यार्थं वासवेन वार्यमाणोऽपि बहुधनमादाय देशान्तरं गतस्तत्र च कियन्तं कालं स्थित्वा कोटिशो धनान्यर्जयित्वा महता सार्थेन साकं गृहमागच्छन् क्रूरचौरधाट्या मुषितो, गृहीतं सर्वस्वं लुण्टितश्च सर्वोऽपि सार्थः, गृहीतश्च महेभ्योऽयमिति कृत्वा सपरिजनो वर्द्धनश्चौरैस्तन्मध्यादेको

गृहदासो लम्बनकनामा पलाय्य गृहागतोऽस्ति, स धनहरणादिवृत्तान्तं कथयत्यतः स्वप्रस्तावं मत्वा विषादो यातीति ।''

अथ लम्बनेनोक्तो वृतान्तः प्रविष्टश्च वासवाङ्गे विषादस्तद्वशात् ''हा वत्स ! हा वर्धन ! त्वं मया वारितोऽपि विदेशेऽगाः, किं कुर्वेऽहं ? सर्वस्वमपि हारितं त्वया । अथ केनोपायेन त्वां मोचयामीत्यादि'' प्रलपितुं लग्नः परिजनः, सर्वोऽपि विषाद-वशादाचक्रन्द । अत्र प्रकर्षः प्राह- ''मातुल ! किमेतद् भवचक्रवास्तव्य-जनानां स्वरूपम् ? यद् क्षणाद् हृष्यन्ति क्षणाच्च विषीदन्ति ।'' विमर्श आह- ''वत्स ! मोहवशादेते बाह्यजना धनपुत्रादि लब्ध्वा क्षणेन हृष्यन्ति विश्वमपि तृणीयन्ते, क्षणेन च तद्-वस्तु-विनाशे शोक-विषादादि पराभवन्ति, ये च विवेकिनः सन्ति ते तु धनाद्यनित्य-वस्तुनः प्राप्तौ नाशे च हर्षं शोकं वा न कुर्वते, किञ्च नानाश्चर्यमयमेतद् भवचक्रपुरम्, एवं प्रत्येकं प्रत्येकमत्र कियन्ति कौतुकानि विलोक्यन्ते ततः संक्षेपादेव भवचक्रस्वरूप-ज्ञानोपायं ते वच्मीति ।

## चतुर्गतिस्वरूपम् ।

पश्य वत्स ! इमानि मानवावास-विबुधालय-पशुसंस्थान-[१]पापिपञ्जराख्यानि चत्वारि पुराणि यद्यपि भवचक्रेऽसङ्ख्यानि पुराणि सन्ति तथापीमानि चत्वारि महत्तराणि, अन्यानि सर्वाण्याप्येतदन्तर्गतानि तदेतेषु दृष्टेषु दृष्टं सर्वमपि भवचक्रपुरं, तत्र प्रथममिदं मानवावासपुरं पश्याऽत्र मोहादिभिर्भृशं विडम्बिता जनाः केचत् सुखिनः केचित् दुःखिनः, केचित् मुदिताः, केचिद् विषादवन्तः, केचिद्रागासक्ताः केचिद्-द्वेषसंतप्ताः केचित् सुभगाः, केचिच्च दुर्भगा इत्यादि-विविधावस्था दृश्यन्ते । तथा द्वितीयं विबुधालयपुरम्, अत्रत्या जना अपि रत्नमयविमान-पुष्करिणी-कल्पद्रुमादि-क्रीडया सुराङ्गनाविलासैः चिन्ता-समकालोपस्थिताभीप्सित-भोगादिभिश्च सातवेदनी-यमनुभतोऽपि ईर्ष्या-भय-शोक-क्रोध-विप्रयोगादिभिर्मोहसैनिकैर्विडम्ब्यमाना एव दृश्यन्ते । तृतीयमिदं पशुसंस्था-नपुरम्, अत्र तु क्षुत्-पिपासोद्वेग-दाह-भय-ताडन-पारतन्त्र्यादि नाना-विडम्बनाभिः वास्तव्य जनान् मोहराजो विडम्बयति । कर्मपरिणामराजेनासातवेदनीयाख्यभटोऽत्र सदा नियुक्त एवाऽस्ति । तथा चतुर्थमेतत् पापिपञ्जरपुरम्, अत्रत्य-जनस्तु नित्यं निबिड-दुःखासक्तो एवाऽऽस्ते, यतस्तप्त-ताम्रपान-खड्गच्छेदन-मुद्गर-घातन-क्रकचदारण-लोहयन्त्रपीलनादिभिः सततं पीड्यमानोऽस्ति अत्र पापिपञ्जरेऽधोऽधः सप्त पाटकाः सन्ति तत्राऽप्य-धोऽधः पाटके

१. DL2 । पापपञ्जरा VL1 ॥

यथाक्रममधिकाधिकं दु:खमित्येतद् दु:खं निर्णेतुं केवलं केवल्येव प्रभुस्तदेवं समस्तोऽपि भवचक्रवास्तव्यजनोऽकृतसन्तोष-शरणो मोहराजेन पीडितोऽस्ति इति ।

## जरा-रोग-मृत्यु-दुर्जनता-कुरूपता-दरिद्रता-दुर्भगतास्वरूपम् ।

अत्रान्तरे भवचक्रप्रसर्पिणी: काश्चित् सप्त स्त्रीर्विलोक्य प्रकर्षेण तत्स्वरूपं पृष्टो विमर्श आह- ''वत्स ! जरा-रुजा-मृति-दुर्जनता-कुरूपता-दरिद्रता-दुर्भगताख्याः *सप्तैता: स्त्रियो यथासम्भवं भवचक्रवास्तव्यजनान् समाश्लिष्य स्व-स्व-विपाकान्* दर्शयन्ति, *तद्यथा-कालपरिणत्याज्ञया* प्रथमा स्त्री जराख्या तारुण्यमदोद्धतानपि प्राणिनो विजित्य गलितपलिताङ्गान् प्रक्षीणसर्वेन्द्रियबलांश्च करोति । तथाऽसाता-वेदनीय-निर्देशात् द्वितीया रुजाऽभिधा स्त्री बल-बुद्ध्यादि-भ्रंशं वात-पित्त-कफादि-विकारं च करोति। ज्वरा-ऽतीसार-कुष्ट-प्रमेह-शूल-च्छर्द्दि-भ्रम-श्वास-कास- कण्डू-जलोदरादयोऽस्याः परिवारस्तेन सह सम्भूय नीरोगतां हत्वा जनान् पीडयति । तृतीया मृति-नाम्नी एषा तु आयु:कर्मण: क्षये विषा-ऽग्नि-शस्त्रोदक-पर्वतादिपाता-ऽऽकस्मिकभयादिभि: सम्भवति । इयं स्त्रीत्वेऽपि एकाकिनी शक्र-चक्र्यादीन् महो-जसोऽपि निपातयति । युव-बाल-वृद्ध-सबला-ऽबल-नृप-वराक-पण्डित-मूर्खादिषु सर्वेषु तुल्य-प्रचारा, त्रिभुवनेऽप्यकुण्ठित-विक्रमा धनस्वजनादिसर्वं परित्याज्य पुण्य-पापान्यतर-सम्बलान् प्राणिन: परलोके नयति, दुर्जनताख्या चतुर्थी स्त्रीयं पापोदयात् संभूता प्राणिनां मत्सरेर्ष्या-ऽसूया-मिथ्याकैतव-विश्वस्तवंचन-कृतघ्नताद्य-पलक्षणानि करोति, पुण्योदयजनितं सौजन्यं च विनिहन्ति । पञ्चमी कुरूपता दुष्टनामकर्मोदयनियुक्तैषा प्राणिनोऽन्ध-काण-खलति-कुणि-कुब्ज-वामनावनायदि हीनाधिकाङ्गान् विरूपान् वा विधत्ते । षष्ठी दरिद्रता-भिधा अन्तरायनृपादिष्टैषा द्यूतादिव्यसन-जला-ऽग्नि-चौरादि-निमित्तैर्धनक्षये प्रादु-र्भवति । दीनता मूढता प्रायो बह्वपत्यता बह्वशिता चित्तवैकल्यम् अनुद्यमम् इत्या-दयोऽस्याः परिवारस्तेन मिलिता पुण्योदयजनितमैश्वर्यं निहत्य प्राणिन: पीडयति । सप्तमी दुर्भगता इयमपि दुष्टनाम-कर्मनृपादिष्टा पुण्योदयदं सौभाग्यं निवार्य प्राणिनो दुर्भगान् सर्वलोकाप्रियान् करोति।

इत्येता: सप्त स्त्रियो विश्वव्यापिन्यो यथासम्भवं सर्वलोकान् पीडयन्ति । यद्यपि सामान्येन कर्मपरिणाम-कालपरिणति-स्वभाव-लोकस्थिति-भवितव्यतादिभि: कार्य-जातं निष्पद्यते, तथापि विशेषापेक्षया एता अपि स्व-स्व-विपाकानां हेतुभूता: सन्त्येव तथा निश्चयनयापेक्षया यद्यप्यप्रतीकारा एतास्तथापि व्यवहारनयमाश्रित्य एतत्प्रतीकारा-स्तप:प्रभृतय: सन्त्येव नयद्वयाधीनं हि सर्वज्ञदर्शनं प्राय: सर्वोऽपि जनो व्यवहारमवलम्ब्य

प्रवर्त्तते, ततः सद्भिर्यथाकथञ्चिदेतासां निवारणोपाये यतितव्यं इति श्रुत्वा प्रकर्षो जगाद- ''हे मातुल ! यत्रैता जरादयो न प्रभवन्ति एवंविधं भविष्यति किमपि स्थानम् ?'' विमर्श आह- ''अस्त्यनन्तसुखास्पदं निर्वृति नाम-नगरं, यत्र जरादीनां प्रचार एव न कदाऽप्यस्ति, परं तत्तु ज्ञान-दर्शन-चारित्राणामेकान्तसेवया प्राप्यते ।

## षड्दर्शनस्वरूपं, भौतकथानकम्

पुनः पृष्टं प्रकर्षेण ''मातुल! यद्यपि समस्तमपीदं भवचक्रनगरं मोहराजादिभिर्व्याप्तं तथापि मिथ्यात्वाऽमात्यस्य कुत्र कुत्र स्थानेऽधिकारशक्तिरिति ?'' तदा विमर्श आह- ''वत्स ! पूर्वोक्तेषु मानवावासादि-चतुर्ष्वपि पुरेषु मिथ्यात्वस्य स्थितिरस्ति परंत्वस्य विशेषस्थितियोग्यानि तु षट्पुराण्येतानि नैयायिक-वैशेषिक-साङ्ख्य-बौद्ध-मीमांसक-नास्तिकाऽभिधानि । एषु द्वितीयं पुरं प्रथम पुर एवाऽन्त र्भवति, अतः पञ्चैवोच्यन्ते । एतानि मिथ्यात्वमन्त्रिणः सदानिवासस्थानानि, परं विवेक-पर्वतस्याऽप्रमत्तताख्य-शिखरवर्त्ति यत्पुरं दृश्यते तदेतज्जैनपुरं सकलशोभास्पदं, एतद्वास्तव्यजनान् पराभवितुं मिथ्यात्वाऽमात्यो न प्रभुः।'' प्रकर्ष आह- ''कथमेते जैनपुरवास्तव्या जना अन्यपुर-पञ्चकवास्तव्यवत् मिथ्यात्वेन न पराभूयन्ते ?'' विमर्शः प्राह- ''पुरपञ्चकवास्तव्यास्तु स्वकपोलकल्पितं कञ्चिदुन्मार्गमवलम्ब्य प्रवृत्ताः, पश्चाच्च दिग्मूढा मार्गमजानाना विशरणा मिथ्यात्वमन्त्रिणा बहुधा विडम्ब्यन्ते, चिरेणाऽपि च निर्वृतिं न लभन्ते । जैनपुरवास्तव्यास्तु सम्यग्दर्शन-कृताधिपत्यास्त-दुक्तमार्गमवलम्बमाना अचिरेणैव निर्वृत्तिपुरमासादयन्तीति तेषां पृथग् उपादानम् ।''

अथ विमर्शः पुरपञ्चकवास्तव्य-जनानामसमीक्षितप्रवृत्ति-संवादकं भौतकथा-नकमाह-शृणु प्रकर्षः- कुत्रचित् पुरे सदाशिव-नामा भौताचार्यो बधिरोऽस्ति । एकदा केनचिद् धूर्त्तेणाऽऽगत्य करसञ्ज्ञया कथञ्चित् तस्मै ज्ञापितं- यदुत 'रिपुवद्-व्याधि-रप्युपेक्षितोऽग्रे महानर्थाय जायते' इति नीतिवाक्याद् भवद्भिरपि नोपेक्षणीयोऽयं बाधिर्य-व्याधिः, कर्त्तव्य एव त्वरितमस्य प्रतीकार इत्युक्त्वा गते तस्मिन् सदाशिव-स्तद्वचः प्रतिपद्य स्वशिष्यं शान्तिशिवं भैषज्य-पृच्छार्थं वैद्यगृहे प्रैषीत् । अथ शान्तिशिवो यावद् वैद्यगृहमागत्य विलोकयति तावत् तदवसरे वैद्यः स्वसुतं रज्जुभिर्नियन्त्र्य लगुडेन ताडयति । तद्-विलोक्य कथमसौ ताड्यते इति शान्तिशिवेन पृष्टे वैद्य आह- ''यदयं बधिरोऽस्ति तदेवं बाधिर्य-प्रतिकारः क्रियते ।'' पुनः स्व-स्त्रियाऽपि निवार्यमाणो वैद्यस्तथैवाह, पुनः प्रातिवेश्मिकादिभिरपि कारणे पृष्टे-

''नाऽयं शब्दशतैरपि किञ्चित् शृणोतीत्यस्य प्रतीकारः क्रियते, ततो न केनाऽपि निवारितव्यम्, इत्थमेवाऽस्य बाधिर्यं यास्यतीति'' भृशं ताडयामास ।

अथ शान्तिशिवः परमार्थानभिज्ञस्तद्वैद्योक्तमेवावधार्य कृतकृत्यं मन्यः स्वाश्रममागत्य गुरुं स्तम्भे दृढं बद्ध्वा वंशादिकम्बाभिर्बाढं ताडयितुं लग्नः, यथा यथाऽसौ पूत्करोति तथा तथा गाढं ताडयति, तदराटि श्रवणात् मिलितैः लोकैः ''रे रे दुष्ट ! किमिदं करोषि ?'' इत्युक्ते ''यूयं न जानीथ मया वैद्यमुखाद् बाधिर्यप्रतीकारोऽयं श्रुतोऽस्ति, ततः स्वाचार्यस्य बाधिर्यमपनयामि । दूरेऽपसरत यूयं, यदि च भवत्सु कश्चिदन्तराले पतिष्यति तदा तमपि ताडयिष्याम्यहमि'' त्युक्त्वा पुनर्भृशं कुट्टयितुं लग्नस्ततस्तं वैधेयं मत्वा लोकैर्वैद्यमाकार्य स्वरूपं पृष्टं, वैद्यस्तमाह- ''अहो मूर्ख ! मत्पुत्रस्तु पठनमनादृत्य क्रीडासक्ततया मद्-वचोऽवगणयन् शिक्षार्थं मया ताडितो लोकैः पृष्टे च कोपवशात् मया न शृणोतीत्युक्तं, परं ताडनाद् बाधिर्यं कथं निवर्त्तते ?'' इत्यादि श्रुत्वा लोकैः स बहुधा निर्भर्त्सितो मोचितश्च सदाशिवः । ततो ''हे प्रकर्ष ! एवं नैयायिकाद्याः पञ्चाऽपि शान्तिशिववत् यतस्ततो यत् तत् किञ्चिद् अपि श्रुत्वा तदेवाऽङ्गीकृत्योन्मार्गे धावन्तः परिभवाऽऽस्पदीभवन्ति, स्वार्थं च न साधयन्तीति ।''

पुनः प्रकर्ष आह- ''येऽमी नैयायिकाद्याः पञ्च तथा ये च जैनास्ते सर्वेऽपि तत्त्वज्ञानादेव मुक्तिं वदन्ति ततः कोऽस्ति तेषां भेदः ?'' विमर्शः प्राह- ''शृणु वत्स ! एतेषां षण्णामपि पृथक्-पृथक् वादित्वं तथाहि - तावत् नैयायिकास्तु प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्ताऽवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां षोडश-पदार्थानां तत्त्वज्ञानात् मोक्षः । प्रत्यक्षाऽनुमानोपमान-शाब्द-भेदाच्चत्वारि प्रमाणानि वदन्ति । तथा वैशेषिका द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाया इति तत्त्व-षट्कं प्रत्यक्षा-ऽनुमाने द्वे च प्रमाणे मन्यन्ते। उभयेषामपीश्वरो देवस्तत एकदैवतत्वात् परस्परं तत्त्वानुगमाच्च वैशेषिका नैयायिकमत एवाऽन्तर्भवन्ति । उभयेऽपि शैवा उच्यन्ते । साङ्ख्यास्तु सत्त्वं रजस्तम इति गुणत्रयं तथा प्रकृति-महदहङ्कार-स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्र-पायूपस्थ-वाक्-पाणि-पाद-मनः-शब्द-रूप-रस-गन्ध-स्पर्श-पृथिव्यप्-तेजो-वाय्वा-ऽऽकाश-लक्षणानि चतुर्विंशति तत्त्वानि पुरुषं पञ्चविंशतितमं मन्यन्ते । तन्मते प्रमाण-त्रितयं प्रत्याक्षा-ऽनुमान-शाब्दलक्षणं, प्रकृति-वियोगो मोक्ष इति च वदन्ति । साङ्ख्याः केचित् निरीश्वराः केचिदीश्वरदैवताः केचिच्च नारायण-दैवता इति ।

बौद्धास्तु दुःखा-ऽऽयतन-समुदय-मार्ग-लक्षणानि चत्वार्य्यार्यसत्यानि तत्त्वतया मन्यन्ते । वैभाषिक-सौत्रान्तिक-योगाचार-मध्यमा इति चत्वारस्तद् भेदाः । एतेषां चतुर्णामपि सुगतो देवता, क्षणिकाः सर्वे पदार्थाः । प्रत्यक्षमनुमानं चेति प्रमाणद्वयं, रागादिज्ञान-सन्तान-वासनोच्छेद-सम्भवा मुक्तिरिति सिद्धान्तः । मीमांसकास्तु नास्ति कश्चित्सर्वज्ञादि-विशेषणविशिष्टो जगति देवस्ततोऽपौरुषेयेभ्यो नित्येभ्यो वेदवाक्येभ्य एवार्थविनश्चयः कर्त्तव्यः । ततो वेदपाठपूर्वकं धर्मजिज्ञासा कार्येत्येवं वदन्ति । नोदना लक्षणो धर्मस्तत् प्रवर्त्तकं वेदवचः 'स्वःकामो ऽग्निंयजेदि' त्यादि । प्रत्यक्षा-ऽनुमान-शाब्दोपमा-ऽर्थापत्त्यभाव-लक्षणानि षट् प्रमाणानि, आत्मन्यवलयो मुक्तिरिति तेषां सिद्धान्तः । नास्तिकास्तु तावत् पुण्य-पाप-परलोक-धर्मा-ऽधर्म-जीव-स्वर्ग-मोक्षादि-सर्वमप्यपलपन्ति । 'एतावानेवाऽयं लोकः पञ्चभूतात्मकोऽयं देहो मद्याङ्गोत्था-मदशक्तिरिव भूतसमुदायोत्थमिदं चैतन्यं, देहे नष्टे इदमपि नश्यति, कुतस्तर्हि भवान्त-रगतिः ? ततो दृष्टसुखपरित्यागेनाऽदृष्टे स्वर्गादौ प्रयत्नस्तु मरीचिका-धावनकल्प' इति नास्तिकानां प्रत्यक्षमेव प्रमाणं, इत्थं हे प्रकर्ष ! एते नैयायिकाद्याः पञ्चाऽपि स्व-स्वमते वाग्डम्बर-स्फोरणात् पण्डितम्मन्या अपि क्लीबा रणाङ्गणमिव परस्पर-सङ्घट्टे प्रमाणभूमिकां नाऽऽक्रमन्ते ।

## जैनसिद्धान्तस्वरूपम्

जैनास्तु 'जीवाऽजीवाऽऽश्रव-संवर-निर्जरा-बन्ध-मोक्ष-इति-सप्त-तत्त्वानि, पुण्य-पापमील-नात् नवाऽपि । तत्र शुभाऽशुभ-कर्मणां कर्त्ता भोक्ता च चैतन्य-लक्षणो जीवस्तद्-विपरीतोऽजीवः । सत्कर्मविपाकः पुण्यं, असत्कर्मविपाकः पापम् । मिथ्यात्वाऽविरति-कषाय-योगैर्हेतुभिर्यद्बन्धहेतुक-कर्मपुद्गलादानं तदाश्रवः, तन्निरोधः संवरः, आत्मनः कर्मभिः संश्लेषो बन्धः, कर्मपरिशाटो निर्जरा, निर्जराया फलं मोक्षः, स तु आत्यन्तिकदेहादिवियोगलक्षणः । तथाऽज्ञानाद्यष्टादशदोषरहितो वीतरागो देवः, पञ्चमहाव्रतधरः सम्यक्त्वनिरूपको गुरुः, ज्ञान-दर्शन-चारित्ररूपरत्नत्रितय-लक्षणो धर्मः, अनन्तपर्यायात्मकं नित्याऽनित्यम् उत्पत्ति-स्थिति-विनाशमयं द्रव्यजातं, प्रत्यक्षा-ऽनुमाने द्वे प्रमाणे, ज्ञान-क्रिया-संयोगाच्च मुक्तिरिति' वदन्ति । ततो विगलित-सकल-कलङ्क-कश्मलः शाणोल्लिखित-जात्यमणिरिव सत्केवलालोक-साक्षाद्भूतसमस्तवस्तु स्वरूपः सर्वज्ञोपदिष्टत्वात् न कुत्राऽपि जैनमार्गो विच्छायता-मासादयति । नैयाकिाद्यास्तु कृत्रिमकान्तिं दधन्तोऽपि काचमणय इव न परीक्षा-शाणोल्लेखं सहन्ते, अत एव ते चिरं यावत् क्लिश्यमाना अपि मुक्तिं नाऽऽप्नुवन्ति ।

एवमन्येऽपि क्रियावादि-प्रभृतयस्त्रिषष्ट्यधिकशतत्रयमित-पाखण्डिनो निह्नवाद्याश्चोत्सूत्रप्ररूपका विरूद्ध-मार्गचारिणस्ते सर्वे चिरकालं तपःप्रभृतिक्रियां कुर्वन्तोऽपि मिथ्यात्वाऽमात्य-पराभूताः प्रत्युत संसारवृद्धिकारिणो भवन्ति ।

## जैन साधु स्वरूपम्

प्रकर्षः प्राह- ''विलोक्यते तज्जैनपुरं, ते च मिथ्यात्वमोहाद्यपराजिता जैना जनाः इति गतौ द्वावपि अप्रमत्तता-सानुस्थं जैनपुरं, दृष्टास्तत्र जैनाः ।'' साधवो मोहादिबल-ध्वंसकाः, तान् विलोक्य विमर्शः प्राह- ''वत्स ! विलोकयैते सर्वजन्तुजातहिताः हितमितसत्यवक्तारः चतुर्विधाऽदत्त-परिहारकाः दिव्यौदारिकमैथुनवर्जकाः- बाह्याऽभ्यन्तरपरिग्रहविप्रमुक्ताः, स्वदेहेऽपि निःस्पृहा द्वाचत्वारिंशद्-दोषवर्जिताहार-ग्राहकाः पञ्च-समिति-त्रिगुप्ति-समुपयुक्ता मोहादि-वैरि-घातकाः एतेषां चित्तवृत्त्यटव्यपि महा-सुन्दरा, सदालोका अनन्तगुणरत्नसम्भवभूमिः, प्रमत्तता-सरिदपि शोषमा-गता, भग्नःचित्त-व्याक्षेपमण्डपः, पतिता तृष्णा-वेदिका इत्यादिसकल-सुखहेतु-मुदिताः सुखं तिष्ठन्त्यत्रैते । इत्यादि श्रुत्वा प्रकर्षः पुनः सविशेषं जैनपुरस्वरूपं पप्रच्छ।'

## जैनपुरवर्णनम्

विमर्श आह- ''वत्स! भवचक्रपुरमध्ये चित्तवृत्त्यटव्यामेवाऽयं विवेकनामा पर्वतः, अस्योपत्यकायां सात्त्विकमानसनगरं निर्मलचित्तादीनि बहूनि नगराण्यात्राऽन्त-र्भवन्ति । अत ये प्राणिनः सम्यग्दर्शन-सदागमोपेक्षिता मोहादिवशवर्त्तिनस्ते कदाऽपि सात्त्विकमानसादीनि पुराणि विवेक-पर्वतं वा द्रष्टुमपि न क्षमाः । विवेक-पर्वताऽधि-त्यकायां चेदं जैनपुरं, धन्या एवाऽत्र पुरे निवसन्ति । कर्मपरिणामराजोऽप्येषां सम-धिका-ऽधिकसौख्यप्रदः सात्त्विकपुरवास्तव्यास्तु मार्गानुसारिण इत्युच्यन्ते । जैनपुर-वास्तव्यास्ते जैना इति। ते च विवेक-पर्वतोपरिस्थाः समस्तमपि भवचक्रस्वरूपं हस्तामलकवत् पश्यन्ति । मोहादयोऽपि कदा कदा अन्तरालं विलोक्य जैनानुपद्रोतुमा-यान्ति, परं विवेकदुर्गाश्रितत्वाद् अकिञ्चित्करा एव प्रतिनिवर्त्तन्ते । यद्यपि मानवा-वासादिषु चतुर्ष्वपि जैना वसन्तो दृश्यन्ते । तथापि तत्त्वतस्ते जैनपुर एव सन्ति।''

## प्रशस्तमोहादिस्वरूपम्

प्रकर्ष आह- मातुल ! किलैतेषु जैनेष्वपि मिथ्यात्वाधीनजनवत् मोहादयो दृश्यन्त एव । यदेतेऽपि जिनबिम्बादिषु मोहं दधति, स्वाध्यायकर्मणि रागिणः साधर्मिकेषु स्निह्यन्ति, शुभक्रियायां प्रीतिमन्तः, गुरुदर्शनात् हृष्यन्ति, व्रतातीचारान् द्विष्यन्ति, व्रतलोपाय क्रुध्यन्ति, प्रवचनप्रत्यनीकेभ्यो रुष्यन्ति, कर्मनिर्जरया माद्यन्ति, प्रतिज्ञा-

निर्वाहेऽहङ्कुर्वते व्रतमालिन्यं जुगुप्सन्ति, हृषीककितवान् वञ्चयन्ते, तपः-करणादिषु लुभ्यन्ति, वैयावृत्त्यादौ समुत्सहन्ते, परोपकारं कृत्वा कृत्वाऽपि न तुष्यन्ति, प्रमाद-चौरान् निघ्नन्ति, भवभ्रमणाद् बिभ्यन्ति, दुष्टाचरिते शोकं प्रयान्ति, निजदुष्कृतं निराकुर्वते, जिनाज्ञारूपां स्त्रियं बहु मन्यन्ते, इत्यादि चेष्टितैर्मोहादि-सद्भावः स्फुट एव दृश्यते तत्कथमेते मोहादिध्वंसका इत्युच्यन्ते ।'' विमर्शः प्राह- ''वत्स ! सत्यं तदेतत्, परं मोहादयस्तु प्रशस्ताऽप्रशस्तभेदाद् द्विधाः सन्ति, तत्राऽप्रशस्ताः कर्म-परिणामपक्षपातिनस्ते मिथ्यात्विषु भवन्ति, ये च प्रशस्तास्ते चारित्रधर्मपक्षपातिनो जैनेषु भवन्ति ।''

## चारित्रधर्मनृपस्वरूपम्

एवं विविध-वार्त्तापराभ्यां ताभ्यां ददृशे पुरतश्चित्तसमाधानमण्डपे निःस्पृहता-वेद्यां जीवपराक्रमाख्य-विष्टरनिविष्टो दान-शील-तपो-भाव-रूप-मुखचतुष्टयकलित-श्चारित्रधर्मनृपः । अथ तद्-दर्शन-मुदितं प्रकर्षं विमर्शः प्राह- ''वत्स ! पश्यैष चारित्रधर्मनृपो मुखचतुष्केण धर्ममार्गमुपदिशति । तद्यथा-प्रथममुखेन जनान् अभय-सुपात्र-विषयं दानं दापयति, अनुकम्पादि-दानमपि न निषिध्यति । भू-कन्या-मधु-लवण-रथाऽश्वादि-महारम्भकरदानं तु निषिध्यति । द्वितीयमुखेन चाऽष्टादश-सहस्र-शीलाङ्गभेदकलितं शीलपालनमादिशति । तृतीयमुखेन द्वादशधा निराशंसं तपः कारयति, पञ्चाऽग्निसाधन-माघस्नानादि-लौकिकं दुष्टतपस्तु निषिध्यति । चतुर्थ-मुखेनाऽनित्यादि-द्वादशभावनाः समादिशति ।

## चारित्रधर्मनृपपरिवारः

अस्य च चारित्रधर्मस्य यत्-किञ्चिदेकैकमपि मण्डपवेदिका-सिंहासनादिवस्तु तादृक् प्रभावं यदनुभावात् मोहादयो हतप्रभावा दूरत एव नश्यन्ति । पुनः पश्य प्रकर्ष! एषा नृपाभ्यर्णं स्थिताऽतिसुन्दराऽङ्गी विरतिनाम्नी पट्टराज्ञी । इयमेव प्राणिनां मुक्तिदात्री । तथा एते राज्ञः पुरः पञ्च पुरुषास्ते सामायिक-छेदोपस्थापनीय-परिहार-विशुद्धि-सूक्ष्मसम्पराय-यथाख्यातनामानो राज्ञोऽङ्गभूता वयस्याः । एते प्राणिनः पापात् निवर्त्त-यन्ति । तथा एतानि दश-मानुषाणि राज्ञः परिकरभूतानि, तत्र प्रथमं क्षमा, द्वितीयं आर्जवं, तृतीयं मार्दवं, चतुर्थं मुक्तिः, पञ्चमं तपः, तस्य पुनर्द्वादश-मानुषाणि परिवार-भूतानि । तत्राऽनशनोनोदरिता-वृत्तिसङ्क्षेप-रसत्याग-कायक्लेश-संलीनताख्यानि षट् बाह्यसञ्ज्ञकानि, प्रायश्चित्त-विनय-वैयावृत्त्य-स्वाध्याय-ध्यान-कायोत्सर्गाभिधानि षट् आभ्यन्तर-सञ्ज्ञकानि । एभिर्वृतस्य तपसो माहात्म्यात् साधवः कर्मपरिणामनृपं

जर्जरीकुर्वते । षष्ठं संयमनामकं, तच्च पञ्चाश्रवविरति-पञ्चेन्द्रिय-निरोध-कषायचतुष्कजय-योगत्रयनिरोधलक्षण-सप्तदश-मानुषकलितं, सप्तमं च सत्यम्, अष्टमं द्रव्यभावभिन्नं शौचं, नवमं चाऽकिञ्चन्यं, दशमं ब्रह्मचर्यं चेति एभिर्दशभिर्वृतोऽयं राज्ञो ज्येष्ठपुत्रो यतिधर्मनामा वामाङ्गे चाऽस्य पत्नीभावसारताभिधा, तथा द्वितीयोऽयं राज्ञो लघुपुत्रो गृहस्थधर्माभिधः स्थूलहिंसा-मृषावादा-ऽदत्तविरति, परदार-परिहारेच्छापरिमाण-दिग् विरति-भोगोपभोग व्रता-ऽनर्थदण्डविरति-सामायिक-देशावकाशिक-पौषधोपवासा-ऽतिथिसंविभागनामक-द्वादशमानुषवृतोऽस्य च समीपस्थिता इयं सद्‌गुणरक्तताख्या पत्नी ।

## सम्यग्‌दर्शन-सम्यग्ज्ञान-सन्तोषादयः सपरिकराः

अयं च महौजाः चारित्रधर्मराजस्य सम्यग्‌दर्शनाभिधो महामात्यः, राज्ञो राजकुमारयोश्च परम-हिताभिलाषी सन् रक्षां करोति । एते चोपशम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्यनामानोऽस्य महामात्यस्य कीर्त्तिख्यापकाः, मैत्री-मुदिता-करुणोपेक्षाख्याश्चतस्त्रः स्त्रियोऽस्य भूषणधारिण्यः परिचारिका ह्येता, इयं च सुदृष्टि-नाम्नी सकलसुलक्षणोपेता गौराङ्गी सम्यग्‌दर्शनाऽमात्यस्य पत्नी । इत्थं सपरिकरोऽप्ययं सम्यग्‌दर्शनाऽमात्यो मिथ्यात्वोन्मूलनक्षमः । असौ च दर्शनमोहनीयस्योपशमे क्षयोप-शमे क्षये च क्रमाद् औपशमिक-क्षायोपशमिक-क्षायिकलक्षणं रूपत्रयं धत्ते ।

तथाऽयं च सद्बोधनामा द्वितीयो महामात्यो भूत-भविष्यद्-वर्त्तमानान् समस्तद्रव्य-गुण-पर्यायान् वेत्ति । चारित्रधर्मराज्ये जैनपुरे अयमेव नीतिमार्गप्रवर्त्तकः । इयं च ज्ञातृता नाम्नी सद्बोधस्य पत्नी, मति-श्रुता-ऽवधि-मनःपर्यव-केवलज्ञानाभिधा एते पञ्चाऽस्याऽङ्गभूताः सखा एषां यः श्रुतज्ञाननामा वयस्य स एव सदागम इत्युच्यते । सदागमोऽयं समस्तराज्यस्थिति-मर्यादादिकारकः । मत्यवधि-मनःपर्यव-केवलाख्य-श्चत्वारोऽपि मूकप्रायाः स्वकार्यसाधका एव । अत एव जैनलोकः सर्वोऽपि सदागमाज्ञयैव क्रियादि साधयति । योगोपधानोद्वहन-काल-विनया-द्यष्टप्रकार-लिखन-वाचनादि-भक्त्या बहुमन्यते च । यश्चाऽक्षरमात्रा-मात्रमपि सदागमविरुद्धं भाषते मन्यते वा स जमालिवदनन्तं संसारं पर्यटति" इति सदागमः स्वयमेव वक्ति, यदुक्तं समवायांगे- "इच्चेइयं दुवालसंगं गणिपिडगं विराहित्ता तीते काले अणंता जीवा चाउरंतं संसारकंतारं परियट्टिंसु" इत्यादि, एवं नंदीसूत्रादिष्वपि [ सूत्र ११६ ] ततो हितैषिभिः सम्यग्-सदागमाज्ञयैव प्रवर्त्तितव्यं, तथा ये च प्राणिनो मुक्तिं लभन्ते ते केवलज्ञानाख्यपञ्चम-वयस्यबलेनेति ।

अथ प्रकर्ष उवाच- ''मातुल! यं सन्तोषनामा महाभटमुद्दिश्य वयमत्रागताः स्म स तु अधुनाऽपि क्वाऽपि न दृष्टस्तत् क्व भविष्यत्यसौ।'' विमर्शः प्राहः- ''पश्य पश्य वत्स! अयं चारित्रधर्माभिमुखः संयमस्य पुरतो निविष्टः, प्रबल-पराक्रमः सन्तोषनामा महाभटः, येन दोष्मता ध्वस्तानि पञ्चाऽपि स्पर्शनादीनि, विहितश्च हतौजाः महामोह-महीपालः । अत एव चारित्रधर्मनृपेण सर्वं स्वसैन्यं समर्प्य सेनानीत्वे स्थापितोऽस्ति । अस्य मोहराजेन सह युद्ध्यतोऽनन्तः कालोऽतिक्रान्तः, कदाप्येतत्सैन्यमपसरति, कदाचिच्च मोहसैन्यमपसरित, परं न ज्ञायते निदाने किं भविष्यतीति ? इयं चाऽस्याङ्गसङ्गिनी निष्पिपासिताख्या प्रणयिनी, अस्याः प्रभावात् लाभाऽलाभयोः सुख-दुःखयोर्माना-ऽपमानयोः शुभा-ऽशुभाहारयोर्वा सममनसः सन्तुष्टाशयाः प्राणिनो भवन्ति । अतो हे प्रकर्ष ! चारित्रधर्मनृपो यतिधर्म-गृहिधर्मौ राजकुमारौ सम्यग्दर्शन-सद्बोधाख्यौ राज्यचिन्तकौ प्रधानौ सन्तोषः सेनानीः । एते सर्वेऽपि सपरिच्छदाः सर्वेषां प्राणिनां हितकारकाः, तथा हे वत्स! एते मण्डपमध्ये स्थिताः शुभाशय-विशुद्धाशयाद्याः अनेकशः सुभटाश्चारित्रधर्मं सेवन्ते, इत्थं चाऽस्य सैन्यं प्रत्येकं वर्णयितुं कः क्षमः स्यादित्यलं विस्तरेण । सम्प्रति गृहं याव'' इत्युदित्वा सौजन्य-दाक्षिण्याद्यनेकमातङ्गान्, गाम्भीर्य-धैर्यादीन् लक्षशो रथान्, बुद्धिपाटव-तत्त्वावबोधादि-तुरङ्गमान्, विनीतत्वस्थैर्यादि-पदातिकांश्च विलोकयन्तौ निर्गतौ द्वावपि ।

## विमर्श-प्रकर्षयोः स्वगृहे आगमनम्

अत्राऽन्तरे प्रकर्षो जगाद- ''मातुल ! त्वया मे महत्कौतुकं दर्शितं, त्वदनुभावात् ज्ञातं मया मोहसैन्य-चारित्रधर्मसैन्य-भवचक्र-विवेकशैल-जैनपुरादीनां निखिलं स्वरूपं, जातश्चाऽहं कृतकृत्यस्तथाऽप्यत्र स्थित्वा सम्यक् विवेकशैल-भवचक्रादि-स्वरूपं निरीक्षितुं सतृष्णं मे मनस्तदत्र तिष्ठामः कियन्ति दिनानि'' इति तद्वचः प्रतिश्रुतं विमर्शेन, स्थितौ च तत्राऽनेक-कौतुकालोकन-परौ चतुरो मासान् । अथाऽन्यदा प्रतिपूर्णं स्वावधिकालं विज्ञाय गृहं प्रति प्रस्थितौ मातुल-भागिनेयौ स्वल्पकालेन प्रत्यागतौ स्वगृहं, मिलितौ च बुद्धि-विचक्षणाभ्यां, हृष्टा च बुद्धिर्भ्रातृ-सुतयोर्दर्शनेन, निवेसितश्च प्रकर्षो विचक्षणेन स्वोत्सङ्गं, कृतं चाऽन्योऽन्यं कुशलप्रश्नं, निवेदितो विमर्श-प्रकर्षाभ्यां राजसचित्त-तामसचित्तादिषु दृष्टश्रुतः सर्वो व्यतिकरः, कथिता च विषयाभिलाष-मन्त्रिसुतेति रसनाया मूलशुद्धिः, वर्णितश्च मोहसैन्य-भवचक्र-विवेकशैल-जैनपुर-चारित्रधर्म-सैन्यादि सम्बन्धी-वृत्तान्तः ।

## रसनालौल्यात् जडस्य दुर्दशां दृष्ट्वा विचक्षणस्य दीक्षास्वीकारः ।

तदाकर्ण्य विचक्षणो विशेषात् रसना-विषयं ममत्वं तत्याज । अथ जडस्तु लोलता-प्रेरितो मद्य-मांसादिभिर्बहुधा रसनां पोषयन्नास्ते ।

अथाऽन्यदा जडः उरभ्र-भ्रान्त्या क्वाऽपि प्रसुप्तं पशुपालं बाणेन जघान, समीपमागतः सन् पुरुषं हतं विज्ञाय मनसि दध्यौ- 'यदहो ! मया नानामिषानि रसना-तुष्टये भक्षितानि, परं मनुष्यमांसं तु कदापि न भक्षितं, तदद्य मनुष्य-सम्बन्धि-महामांसेन रसनां तर्पयामि' इति विचिन्त्य भक्षितं तेन पुशपालमांसं, जाता च बलवती लोलता, तद्वशात् प्रत्यहं महामांसभक्षणलोलुपोऽसौ पौराणां शिशून्यपहृत्याऽपहृत्य भक्षयामास । एकदा रात्रौ शूरनाम्नः क्षत्रियस्य गृहमध्ये प्रविश्य, तस्य स्तनन्धयं पुत्र-मादाय यावत् निर्याति तावज्जागरितेन शूरेण दृढं बद्ध्वा विडम्बना-शतैर्भृशं विडम्बितः, प्रभाते सर्वलोकैर्ज्ञातं जडस्य तद्-दुश्चेष्टितम् ।

अथ विचक्षणस्तां भ्रातुरपभ्राजनां विडम्बनां च वीक्ष्य लज्जितोऽचिन्तयत् । 'अहह! जडेन दुष्टस्त्रिया रसनायाः पारवश्यात् अस्माकं कुलं कलङ्कितं, तदधमकुलो-द्भावाया एतस्या दुष्टस्त्रियास्त्याग एव वरमिति । ततः स्वपितरं शुभोदयं चारुतां मातरं चाऽऽपृच्छ्य बुद्धिं प्रकर्षं विमर्शं च सहाऽऽदाय विवेकशैलस्याऽप्रमत्तता-सानुस्थं जैनपुरमागत्य श्रीगुणधरसूरेरुपान्ते दीक्षां जग्राह । तदा माता-पितरावपि सहागतौ । राजन् ! सोऽहं विचक्षणः क्रमेण गुरुसेवां कुर्वाणः शिक्षितः सकलं साध्वाचारं, कृता चाऽनेकतपोभी रसनाऽकिञ्चित्करी, एवं कियत्कालातिक्रमे मां गीतार्थं विज्ञाय श्रीगुरुभिः सूरिपदं दत्तं, कृतश्च मन्निष्ठः श्रमणसङ्घः, क्रमेण विहरन्निहागममित्युक्तं ते मद्-दीक्षाकारणम् ।

## रिपुदारणं राज्ये निवेश्य नरवाहनस्य दीक्षाग्रहणम् ।

अथैवं नानोपदेशमयं विचक्षणसूरि-चरितमाकर्ण्य प्रबुद्धचेता नरवाहननृपः प्राञ्जलि गुरुं प्रत्याह- "स्वामिन्! प्रबोधितोऽहं प्रमाद-विषविलुप्तचेतनस्त्वया स्वचरिता-ऽमृतपानेन, सम्प्रति कृतार्थय मां भगवद्-दीक्षा-प्रदानेनेति" गुरुभिस्तस्य योग्यतां मत्वा "यथासुखमिति" तद्वचः प्रतिपेदे । अथाऽगृहीतसङ्केते ! तदवसरे मां तथाविधं दुःस्थितं वीक्ष्य मम पुण्योदयो लज्जितः किञ्चित् समासन्नः समजनि, तदनुभावाद् राज्ञा राज्यप्रदानचिन्तया निर्गुणोऽप्यहं स्मारितः, तदैव तत्रोपविष्टं दीनवदनं मां वीक्ष्य जातस्नेहः पिता स्वोत्सङ्गे निवेश्य गुरुं पप्रच्छ- "स्वामिन् ! रिपुदारणोऽयं आबाल्या-देव स्तब्धचित्तः स्वदोषादेव म्रियमाणे स्वजननी-भार्येऽनेन

दृष्ट्वाऽप्युपेक्षिते । कथ मस्मिन्नीदृशी निर्घृणतेति?" गुरुराह- "राजन्! यद्यप्ययं त्वत्कुलोद्भवः प्रकृतिसुन्दर-स्तथापि शैलराज-मृषावादाख्यौ अस्य परमसखायौ स्तस्तद्वशादयमपि निस्त्रिंशो जातः पुनस्तत्-पापमित्रत्यागोपाये पृष्टे गुरुः प्राह- "राजन्! उज्ज्वलमानसाख्य-पुरे शुद्धाभिप्रायनृपस्य सौजन्यता शिष्टता चेति द्वे पत्न्यौ, तयोः कुक्षिजाते क्रमेण नम्रतासत्यताभिधे द्वे कन्ये यद्ययं रिपुदारणस्ते कन्ये परिणेष्यति, तदा शैलराज-मृषावादौ त्यक्ष्यतीति । परं तत् तु कालान्तरे भावि साम्प्रतं त्वलं तच्चिन्तया" इत्याकर्ण्य मामयोग्यं मत्वाऽपि पुत्रस्नेहाद् राज्ये निवेश्य स्वयं नरवाहननृपो विचक्षणसूरिपार्श्वे व्रतमाददे । क्रमाद् विजहार गुरुभिः सहाऽन्यत्र महीपीठे ।

## अभिमान-मृषावादसंयुतस्य रिपुदारणस्य चक्रिणा संघर्षः मरणं च ।

अथाऽहं राज्यं लब्ध्वा समस्तं जगत् तृणवद् गणयामि, मिथ्या स्वप्रशंसां करोमि, स्वेच्छया मिथ्या जल्पामि, पुष्टौ पुनः शैलराज-मृषावादौ । इत्थं पुण्योदयप्रसादात् राज्यसुखमनुभवतो मे गतः कियान् कालः । अत्राऽन्तरे तपन-नामा चक्रवर्त्ती दिग्-विजयार्थं निर्गतः । सिद्धार्थपुराभ्यर्णमायातस्तदा प्रधानाद्यैर्विज्ञप्तोऽहं 'यत् सर्वोपरिवर्त्ती चक्रवर्त्त्यसौ, तत्प्राभृतादि लात्वा, सन्मुखं गत्वा पर्युपास्यो भवद्भिर्यथा स्वराज्ये कुशलं स्यादिति' श्रुत्वा यावदहं तदभिमुखं गन्तुमिच्छामि तावत् शैलराजेन स्तब्धचित्तविलेपनं मे हृदये दत्तं, तद्-वशाद् गर्वाध्मातेन मयोक्तं- "कियन्-मात्रोऽयं तपनश्चक्री मद्-भुजपराक्रमाणां पुरतः? तन्न यामो वयमेतत् सेवार्थं," पुनस्तैरति-निर्बन्धकृते मृषावादबलात् मयोक्तं- "प्रथमतो यात यूयं चक्रिसेवार्थं, तदनु वयमप्यागमिष्याम" इति । ततस्ते प्रधानादयः कारणिका भटसमुदायमादाय च चक्र्यन्तिके गत्वा बहुद्रव्याद्युपदीकृत्य चक्रिणं प्रणेमुः । चक्रिणा च कुशलप्रश्न-पूर्वकं मदनागमकारणं पृष्टं, तैरुक्तं- "स्वामिन् ! अस्मन्नृपो देवपादसपर्या-समुत्सुकोऽस्मदनुपदमेवाऽऽयाति । वयं तु पुरतः प्रेषिताः स्म इति ।" अथ तैः प्रधानाद्यैः पुनर्ममाकारणार्थं ते प्रेषिते, शैलराजप्रेरितेन मयोक्तं- "रे रे अधमा ! "यूयं ममोपरि भूत्वा कस्यादेशात् चक्रिसमीपे गताः ? किं करिष्यत्यस्मान् चक्री ? नाऽऽगमिष्यामो वयं तु" इत्यादि श्रुत्वा प्रतिनिवृत्तेन दूतेन गत्वा प्रधानादीन् प्रत्युक्तं, तेऽपि तच्छ्रुत्वा भीषणचित्ता बभूवुः । अथैतत् सर्वं मम गर्व-दुर्विलसितं प्रच्छन्न-नियुक्त-चार द्वारा विज्ञाय चक्रिणा योगेश्वर नामा मान्त्रिकः सिद्धार्थपुरे प्रेषितः । तदवसरे पलायितं मे पुण्योदयेन । अथ तेन मान्त्रिकेण मन्त्रयोगशक्त्या विकलीकृतोऽहं विवसनो विकीर्णकेशः पांशुपूर्णसिराः स्थाने स्थाने चत्वरे चत्वरे

षिड्गैर्हस्ततालाभिर्नीयमानो नीतश्चक्रि-स्कन्धावारे । यः कश्चित्-चक्रिणा सह गर्वं करिष्यति, तस्येयं गतिर्भवित्रीत्युद्घोषणा-पूर्वकं सर्वत्र परिभ्राम्य राजपुरुषैर्मुद्गर-प्रहारादि-यातनाशतैर्विडम्ब्य पञ्चत्वं प्रापितः ।

## रिपुदारणस्य नरकादिगतौ भ्रमणम् ।

हे अगृहीतसङ्केते ! सोऽहं संसारि-जीवो रिपुदारणभवाच्च्युत्वा पापिपञ्जरपुरे महातमःप्रभाख्ये पाटके नारकत्वेनोत्पन्नः । तत्र मया यानि यानि दुःखानि सोढानि तानि संस्मार्य संस्मार्य अद्याऽप्युत्कम्पं धत्ते मे मनः। जानाति च भगवानयं सदागमस्तानि । अथ त्रयस्त्रिंशत्-सागरान्ते तत उद्धृत्य भवितव्यतया नव नव गुटिका प्रयोगेण नव नव वेषान् ग्राहयित्वा प्रायोऽसंव्यवहारपुरवर्जं सर्वेषु स्थानेषु भ्रामितोऽहम्, तेषु कुत्रचिच्छेदन-भेदनादिभिः, कुत्रचिद् यन्त्र-पीलनाद्यैः, कुत्रचिच्च क्षुत्-तृट्-शीतोष्णाद्यैः क्वचिन्-मौर्ख्येण, क्वचिद् दारिद्र्येण। एवं हीनजाति-हीनाङ्ग-स्वजन-वियोग-दासत्व-दौर्भाग्य-कुरूपत्वादि-नाना-दुःखैः नाना-भवेषु तया भृशं विडम्बितः। इत्थं अनन्तं कालं विडम्ब्य विडम्ब्य श्रान्ता सती किञ्चित् प्रसादं विधायाऽन्यदा मामुवाच- "हे आर्यपुत्र ! त्वया बहूनि दुःखान्यनुभूतानि, तदेनं पुण्योदयं सखायं गृहीत्वेदानीं याहि मानवावासपुरमिति" तद्वचः प्रतिपन्नं मया। इति मानाऽ-नृत-रसना-मद-चौर्य-दुरोदरादि-सङ्गोत्थं श्रुत्वा फलं, न सक्तिस्तेषु विधेया - कदापि बुधैः ।

इत्युपमिति-कथोद्धारे
शैलराज-मृषावाद-मद्यपान-मिथ्याभिमान-धनगर्व-
गणिकागमन-द्यूतक्रीडा-ऽऽखटेक-विकथाऽऽसक्त्यादि-विपाक-दर्शनो
द्वितीयोऽ-धिकारः ॥ २ ॥

## अधिकारः - ३

### संसारिजीवस्य माया-स्तेयसम्पर्कः ।

अथाऽगृहीतशङ्केतां सम्बोध्य संसारि-जीवो वक्ति-सदागमो भव्यपुरुषः प्रज्ञाविशला च त्रयोऽपि शृण्वन्ति ।

शृणु अगृहीतसङ्केते ! पुण्योदयं सहायीकृत्याऽऽगतोऽहं मनुष्यगतिपुर्याम्, अथाऽस्ति वर्धमानपुरे स्वकीर्त्तिधवलितधरावलयो धवलो नाम नृपस्तत्पट्टराज्ञी कमलसुन्दरी, तयोः सुतो विमलकुमार इति यथार्थनामाऽस्ति, तत्रैव पुरे सोमवदेवव्यवहारी वसति, तस्य भार्या कनकसुन्दरी तस्याः कुक्षौ पुत्रत्वेन भवितव्यतयाऽवतारितोऽहं, समये जातश्च पुण्योदय-सहितः । पित्रा जन्मोत्सवं विधाय वामदेव इति मदभिधा चक्रे । क्रमेण मातृ-पित्रादिभिर्लाल्यमानो वर्द्धे।

एकदा श्यामवर्णौ द्वौ पुमांसौ वक्राङ्गी चञ्चला चैका स्त्री, एवं ते त्रयोऽपि मया दृष्टाः । तन्मध्यादेकेन समालिङ्ग्य भाषितोऽहं- "मित्र ! स्मरसि मां ?". मयोक्तं- "नाऽहं स्मरामि । तदा तेनोक्तं- "असंव्यवहार-पुरादारभ्य यत्र यत्र स्थाने चिक्रीडिथ तत्र तत्राऽह-मप्यलक्षित इव तव सहैवाऽभूवम् । रिपुदारणभवे तु प्रकट एव मृषावाद-नामा तव सखाऽभूवम् । तदा त्वं मयि परमासक्तोऽभूः, एकदा मच्छक्ति-रञ्जितेन त्वया मे पृष्टं शक्तिप्राप्तिनिमित्तं, तदा मया रागकेशरिसुता मम प्रतिपन्न-भगिनी मायाऽभिधा, तत्-सकाशात् शिक्षितोऽहं, समये त्वामपि तां दर्शयिष्ये इति यदुक्तमभूत्, तत्- सत्यापनायैनां मायां, तथा एनं च स्तेयनामानं मल्लघुभ्रातरमादायाऽऽगतोऽस्मीति ।" तदा मयोक्तं- "अहो मित्र ! यद्यपि त्वां न लक्षयामि, तथापि त्वदालोकनान्मनो मे हृष्यतीति । जानामि ते परमसौहार्दं, ततस्तिष्ठ मदुपान्ते त्वं भ्रातृ-भगिनी युत" इति श्रुत्वा मृषावादेनोक्तं- "साम्प्रतं तु माया-स्तेये त्वदन्तिके स्थास्यतः, तयोस्त्वया प्रणयपरेण भाव्यं, तेऽपि तव नाना-शक्तीर्दास्यतः । प्रस्तावे चाऽहमपि प्रकटिष्यामि । अधुना त्वन्तर्हितः स्थास्यामी" त्युक्त्वाऽन्तर्दधे ।

अथ माया- स्तेये समाश्लिष्य हृष्टोऽहं, ध्यातं चाऽहो ! मृषावादस्य प्रणयो, यदन-न्तेनाऽपि कालेन तादृगेवाऽऽसीत्, कृतोऽनेन मयि महोपकारो मित्र-द्वय-दानेनेत्यादि ।

ततोऽहं मायानुभावाद् विश्वस्तान् मातृ-पित्रादीनपि वञ्चयामि, स्तेनवशाच्च यस्य तस्य यत् तत् चोरयामि । इत्थं कुलक्षणत्वात् स्वजनवर्गेऽवगणनास्पदं जातः ।

## रत्नचूडकथा

अथ मन्मातुः कनकसुन्दर्याः कमलसुन्दर्या राज्ञ्या सह सख्यमभूत् । तत्-स्नेहाद् विमलकुमारेण सह मम मैत्री बभूव । यद्यप्यहं बहुशोऽपि तं वञ्चयामि, तथाऽप्यसौ परमसौजन्यपात्रं मयि परमप्रणयं धत्ते । क्रमेणावां द्वावपि सहाऽध्यायिनौ शिक्षितौ कला-कलापम् । अन्यदा कौतुकार्थिनौ विविधवृक्षोपशोभितं क्रीडानन्दनाभिधमुद्यानं प्राप्तौ, तत्र नाना-तरु-गुल्म-लतादि-शोभावलोकनपराभ्यां आवाभ्यां कश्चिदव्यक्त-मधुरध्वनिः शुश्रुवे । तदा मया विमलं प्रत्युक्तं- "मित्र ! किङ्किण्यादिशिञ्जितसन्निभो ध्वनिरयं, तन्नूनं वनसुषमा-समालोकन-कौतुकी कोऽपि किन्नरोऽमरो वाऽत्र क्वचिल्लता-कुञ्जान्तरादौ विहरन् भविष्यति । विलोकयामस्तावदिति" शब्दानुसारेण यावदावां कियन्ति पदानि गतौ, तावच्चक्रा-ऽङ्कुश-च्छत्रादिलक्षणोपेतानि सिकतासु सद्यस्कानि कस्यचित् पदानि दृष्ट्वा विमलेनोक्तं- "यदयं कोऽप्युत्तम-पुमान् सम्भाव्यते । अन्तरीक्ष-चारिणां सुराणां पदन्यासाऽभावात् ।" इत्युक्त्वा यावदग्रे विलोकयावस्तावल्लता-गहने मिथुनमेकं सर्वाङ्गसुन्दरमालोक्य विमलः प्राह मित्र ! अयं पुमान् विशालवक्षाः प्रोन्नतांसः पद्मपत्राक्षः प्रलम्बबाहुः तनु-मध्य एवं सर्वाङ्ग-सुलक्षणः कश्चित् साक्षाच्चक्रवर्त्तीव भासते । इयमस्य दयिताऽपि करभोरु, पृथुनितम्बा सल्लक्षणाङ्कित-सर्वावयवा दृश्यते साक्षाल्लक्ष्मीरिवेति। यावदावां वार्त्ता-परौ स्वस्तावद् गगनाध्वना द्वौ पुरुषौ लतागृहोपर्यायातौ । तयोरेकेन तिरस्कारपूर्वकं- "एहि रे पौरुषं वहसि चेत् तद् युध्यस्व मया सहेत्याकारितो मिथुन-पुरुषः । सोऽपि लतागृहे प्रियां मुक्त्वा कोपकरालाक्षो धावितस्तदभिमुखं, तावद् द्वितीय-पुरुषो लतागृहाऽन्तः स्त्रियं गृहीतुं धावितः । सा स्त्री ततः पलाय्य "अहो ! वीर ! रक्ष मां रक्ष मां" इति वदन्ती भयवेपमानाऽङ्गी विमलं शरणीचक्रे । तदा विमलस्य पुण्योदय-माहात्म्यात् वनदेवतया स्तम्भितोऽसौ दुष्टः ।

अथ मिथुन-पुरुषेण विनिर्जितोऽन्यः पुमान् नष्टः, मिथुनपुरुषोऽपि तदनुगतः, तदा स स्तम्भितोऽपि तदनुयियासुर्मुक्तो वनदेवतया तयोः पृष्टे उद्यातः । एवं ते त्रयोऽपि दृष्टिपथमतीत्य गगनाऽध्वना गता दूरे, जाता भूयसी वेला । अथ चिरेणाऽपि नाऽऽगतो मे पतिस्तद्-दुष्टाभ्यां पराभूतो हतो वा मा स्म भूदिति दुःखार्त्ता सा स्त्री रोदितुं लग्ना, विमलेन समाश्वासिता, तां तत्र निवेश्य यावद् विमलस्तत्-पत्यन्वेषणार्थं याति, तावत् स पुमान् द्वावपि दुष्टौ विजित्य जिताहवोऽम्बरतलादवतीर्णः, दृष्टा च तद्-दयिता । तया

विमलस्योपकारः कथितः पत्युः पुरः, तेनाऽपि हृष्टेन विमलं प्रत्युक्तं- ''अहो अकारण-बन्धो! त्वया मत्-प्रिया दुष्टात् रक्षिता समाश्वासिता च, ततो बहूपकृतं मयि ततः समादिश किमपि कृत्यं यत्-प्रत्युपकारकरणेन किञ्चिदहमप्यनृणः स्यामिति'' तेनोक्ते- विमलः प्राह- ''अहो मित्र! त्वया स्वबलेन जितौ विपक्षौ, तत्र कोऽहमुपकर्त्ता? परं त्वद्-दर्शनादेव जाता मे सकलकार्यसिद्धिः । ततस्तोषय स्ववृत्तान्त-कथनेन मामिति ।'' अथ स प्राह- शृणु मित्र ! अस्मन्मूलवार्त्ता-

## रत्नचूडवृत्तान्तम्

वैताढ्यस्य दक्षिणश्रेण्यां गगनशेखरपुरे मणिप्रभो राजा, कनकशिखा तत्-प्रिया। तयोः रत्नशेखरनामा एकः पुत्रो, रत्नशिखा-मणिशिखाऽभिधे च द्वे पुत्र्यौ, तन्मध्ये रत्नशिखा मेघनादखेचरेण परिणीता, तस्याः पुत्रऽहं रत्नचूडनामा, मणिशिखा तु शितप्रभेण परिणीता, तस्या अचल-चपलाख्यौ द्वौ सुतौ, रत्नशेखररस्य रतिकान्ता पत्नी, तत् कुक्षिसम्भवा चूतमञ्जरीयं मे पत्नी । अथ बाल्ये तु अहं तथाऽचल-चपलौ चूतमञ्जरी च एवं सर्वेऽपि वयं रत्नशेखर-मातुलग्रहे एकत्र क्रीडामः ।

अथैकश्चन्दन-नामा सिद्धपुत्रोऽष्टाङ्ग-निमित्तविद् जिनमताभिज्ञश्च रत्नशेखरनृपस्य बालमित्रमभूत् । तत् सङ्गाद् रत्नशेखरोऽपि श्रावकत्वं प्रपेदे । क्रमेण मम माता-पितरौ रत्नशिखा-मेघनादावपि तेन चन्दनेन जैनधर्मं प्रबोधितौ । ततोऽहमपि श्रावको जातः ।

अथैकदा चन्दनेन मदभिमुखमालोक्य मन्मातुलं प्रत्युक्तं- ''अहो रत्नशेखर ! अयं ते भागिनेयो रत्नचूडः खेचर-चक्रवर्त्ती भावीति लक्ष्यते ।'' अत्राऽन्तरे मया विमलं प्रत्युक्तं ''मित्र ! यत् त्वया सुलक्षणोऽयं पुमान् नूनं चक्रवर्त्ती भविष्यति इत्यादि यदुक्तं तत् सत्यं जातमिति पुनः रत्नचूड आह- ''ततो रत्नशेखरेण चन्दनवचनादभ्युदयिनं जैनं च मां विज्ञाय स्वपुत्री चूतमञ्जरीयं मह्यं दत्ता । तद्व्यतिकरादचल-चपलौ मम मातृ-ष्वस्रीयावसहनौ मनसि दूनौ, तदा प्रभृति मयि मत्सरं वहतः । परं चूतमञ्जरीमपहर्त्तुं मामुपद्रोतुं वाऽशक्तौ एकदा कालीनाम्नीं दुष्टविद्यां साधयामासतुः, सिद्धविद्यौ च तौ यावत् मया सह योद्धुमागच्छतस्तावन्मुखराभिध-दूतमुखेन तदागमनं विज्ञाय मयाऽचिन्ति-यदहो ! आभ्यां युध्यमानस्य मे मा भूत् मातृष्वस्त्रीयघातपातकमिति तदितोऽपसरामि तावदिति प्रियामादाया-ऽऽगतोऽहमत्र क्रीडानन्दने, इतस्तावपि कथञ्चित् मामत्राऽऽगतं विज्ञाय पश्चादायातौ, भवतोः पश्यतोरेवाऽचलेनाऽहं युद्धार्थमाकारितः क्रमान्मया विनिर्जितः, पलायितोऽपि पश्चाद् गत्वा निर्वीर्यीकृत्य मुक्तः ।

अथ चपलेन चूतमञ्जरी हृता मा भूत् इति ससाध्वसो यावदहं प्रतिनिवृत्तस्तावच्चपलो

ऽप्यभिमुखो मिलितस्तमपि सम्यग् निरौजसं विधाय शीघ्रमिहागमम् । इत्येषोऽस्मद्-वृत्तान्तस्तत्- कुमारशेखर ! कथय साम्प्रतं स्ववृत्तान्तम्, तदा मया वर्धमानपुरेश-धवलधरापालसूनुर्निखिलगुण-निवास-सदनं विमलनामा कुमारोऽयं कौतुकार्थी क्रीडानन्दनमायातोऽस्तीत्यादि कथितं, तदाकर्ण्य हृष्टो रत्नचूड एकं महारत्नं बलात्कारेण विमलकुमाराय ददौ ।

## विमलस्य जातिस्मरणज्ञानं, वैराग्यश्च ।

अथ वार्त्तान्तरे रत्नचूडेनोक्तं- "अहो मित्र ! अत्रोद्याने मम पितृभ्यां कारितः श्रीऋषभजिनप्रासादोऽस्ति । तद्यामस्तत्र भगवद्-दर्शनार्थमिति । ततो गताश्चत्वारोऽपि वयं प्रासादे, प्रविष्टाश्च नानामणिनिबद्ध-कुट्टिम-कान्ति-कर्बुरितदिग्वलयं सदोद्योतं प्रासादमध्यम् । तत्र नाना-स्तुति भङ्गीभी रत्नचूडः श्रीयुगादिदेवं तुष्टाव । विमलोऽपि भगवद्-दर्शनात् प्रोद्भूताऽनिर्वाच्य-प्रेमरसोऽत्यर्थं मुमुदे । अथ भगवन्तं प्रणिपत्य यावद् बर्हिमण्डपे निविष्टास्तावन्मूर्च्छितो विमलः शीतोपचारैः सावधानीकृतो रत्नचूडपादयो-र्निपत्य जगाद- "अहो मित्र ! त्वं मेऽकारण-बन्धुर्गुरुः परमोपकारकारी च । त्वदुपदेशाद् भगवन्तं विलोक्य मम जातिस्मृतिरभूत् । भवान्तरे प्रतिपन्न-सम्यक्त्वेन मया बहुशो जिनपूजाः कृता अभूवन् इहाऽप्यद्य प्रभृति त्वत्प्रसादात् मया जिनधर्मे यतितव्यम् ।" इति श्रुत्वा जातोत्पुलको रत्नचूडः साधर्मिकभक्त्या विमलं प्रणम्य प्राह- "मित्र ! सिद्धं मेऽद्य सर्वाभीष्टं यत् प्रतिपन्नस्त्वयाऽर्हद्-धर्मः । साधर्मिकेण सौहार्दं तत् स्वर्णसौरभप्रायं पुण्यप्राग्भारमन्तरेण नाऽऽप्यते । अन्यच्च धन्योऽसि त्वं, यच्चिन्तामणिलाभेऽप्यनुत्सिक्तमनाः, साम्प्रतं जातिस्मृत्या जिनधर्ममासाद्याऽप्रमेयां मुदमावहसि ! मूढास्तु स्त्री-धन-राज्यादि लब्ध्वा हृष्यन्ति, ये च त्वादृशा धीरपुमांसस्ते तु धर्ममेव बहुमन्यन्ते ।"

## बुधाचार्यस्वरूपम् । लब्धिस्वरूपम् ।

विमलः प्राह- "मित्र ! इदानीं मे संसारस्वरूपं किम्पाकविपाकप्रायं प्रतिभाति । तदद्यैव संयममाद्रिये, परम् अविज्ञात-धर्मतत्त्वौ मम पितरौ नाऽनुमन्येते, ततो यथाकथमपि तौ प्रतिबुद्ध्येते तर्हि सिद्ध्यति मे समीहितम् । रत्नचूडोऽवक्- "मित्र ! यदि कथञ्चित् कुतश्चिद् बुधनामाचार्याः समायान्ति, तदा ते बोधयन्ति ते पितरौ । दृष्टपूर्वाऽस्ति मे तेषामचिन्त्यशक्तिः ।" विमलः प्राह- "मित्र ! भवता क्व दृष्टास्ते बुधाचार्याः ?" रत्नचूडः प्राह- "मित्र! गताऽष्टम्यामत्रैव प्रासादे जिनवन्दनागतेन मया प्रासादद्वारे बहुमुनिमण्डली-परिक्षिप्तः कृष्णाऽङ्गो विरूप-स्त्रिकोणशिरा गलन्नेत्रो नतनासिकः प्रलम्बग्रीवोदरो

बीभत्साकृतिः कश्चित् सूरिर्मेघगम्भीरस्वरेण धर्मदेशनां तन्वानो वीक्षितस्तदा मया ध्यातं- 'यदहो ! गुरुर्वचनातिशयस्तु विश्वातिशायी तन्न युज्यतेऽस्यैवंविधकुरूपत्वमिति । ततः प्रासादन्तर्गत्वा विधिनाऽष्टभिः प्रकारैर्जिनानभ्यर्च्य स्तुति-मङ्गलादि कृत्वा यावत् प्रासादाद् बहिर्निर्गतोऽहं तावत् कनककमलस्थितं सकलाङ्गोपाङ्गसुन्दरं साक्षात् मकरध्वज-स्वरूपं तमाचार्यं विलोक्य मया चिन्तितं - 'अहो ! मयाऽधुनैव कुरूपो दृष्टोऽभूत् क्षणमात्रादेव च जात्य-कार्त्तस्वरकान्तिर्जातोऽयं महानुभावः । यदिवा भवन्त्येव तपस्विनोऽनेकलब्धि-निधयः । पुरा मम धर्माचार्येण चन्दनेनाऽप्युक्तमभूद् यत् तपस्विनोऽणुवत्सूक्ष्म-शरीरं कुर्वन्ति, मेरोरपि महच्छरीरं कुर्वन्ति, वायोरपि लघूभवन्ति, वज्रादप्यतिगुरवो भवन्ति, भूमिस्था अप्यङ्गुल्यग्रेण मेरुं स्पृशन्ति, अग्नि-जलादावपि भूमाविव गच्छन्ति, न च तदाश्रित-जीवान् बाधयन्ति । तथा चक्रि-शक्रादि-ऋद्धिं विकुर्वन्ति । इन्द्रोपेन्द्रादीनपि वशीकुर्वन्ति । इत्थमनेकलब्धि-कलिता नाना-रूपा भवन्ति इति तन्महानुभावा एते महर्षय' इति विचिन्त्य वन्दिता मया प्रत्येकं ते सर्व-साधवो, दत्ता च तैर्धर्मलाभेत्याशीः ।

अथ मया गुरुमुखाद् धर्मदेशनां श्रुत्वा कश्चिन्मुनिः पृष्टः सूरेर्नामादिकं स त्वाह- "बुधाचार्योऽयं निःशेषलब्धिपात्रमिति" श्रुत्वा साक्षात् तपःप्रभावं दृष्ट्वा च जाता मे जैनमते दृढभक्तिः । ततः साधून् नत्वा गृहमायातः, गुरवोऽपि मुनिगण-वृता अन्यत्र व्यहरन्। ततो हे विमल ! यदि कथञ्चित् पुनरपि ते बुधाचार्या मिलन्ति, तदा भवत्येव भवदिष्टसिद्धिः।" विमलः प्राह- "हे मित्र ! यदि क्वाऽपि ते गुरवस्त्वद्-दृष्टिगोचरी-भवन्ति, तदा त्वया मदर्थमभ्यर्थनीया यथाऽत्राऽऽयान्तीति" तद्वचः प्रतिश्रुतं रत्नचूडेन ।

अथ चिरं यावत् परस्परं प्रणय-पेशलैर्धर्मदृढीकरणंकारणैर्वार्त्तालापैः तत्र स्थित्वा रत्नचूडं बन्धुत्वेन, चूतमञ्जरीं च स्वसृत्वेन प्रतिष्ठाप्य, स्वपुरप्रस्थानोन्मुखौ तौ दम्पती भूयसीं भूमिमनुव्रज्य शीघ्रं पुनर्दर्शनेन सम्भावनीयोऽहमित्यादि वदन् बाष्पपूर्णनयनः प्रतिनिवृत्तो विमलः ।

## वामदेवकृतं रत्नहरणम् । वनदेवताकोपः ।

शृणु अगृहीतसङ्केते ! इत्थं विमल-रत्नचूडोक्तानेकधर्मकथा मया समीपस्थेन श्रुतास्तथाऽपि रत्नचूडार्पित-चिन्तारत्नहरणचिन्ताकुलचेतसा न किञ्चिदप्यवधारिताः । अथाऽऽवा चलितौ गृहं प्रति, अग्रे गत्वा विमलं प्रति मयोक्तं- "मित्र ! एतद्-रत्नं मुच्यताऽत्रैव क्वापि," विमलेनाऽपि सरलतया "तथास्तु" इत्युक्ते भुवं निखाय मुक्तं मया तत्र तद्-रत्नम् । क्रमेण प्राप्तौ स्व-स्व-सदनम् । रात्रौ च रत्नहरणोपायं विचिन्तयतः क्षणमात्रमपि मे निद्रा नाऽऽयाता । प्रभाते स्तेयकुमित्र-प्रेरितो रत्नहरणार्थं प्राप्तोऽहं तत्र

वने । इतश्च विमलोऽपि जिनवन्दनेच्छया तद्-वनं जिगमिषुर्मद्गृहमायातस्तावत् कस्यचित् मुखात् मां तत्रैव गतं विज्ञाय सोऽपि मामनुपदं प्रचलितः । अथ यावदहं रत्नन्यासस्थले गत्वा स्थितस्तावद् दूराद् विमलोऽप्यागच्छन् दृष्टः। तदालोकनादत्याकुलेन मया रत्नं गृहीत्वा न्यस्तस्तत्र स्थले दृषत्-खण्डः । रत्नमपि विमलभीत्याऽन्यत्र भुवि क्षिप्तं, तावदायातेन विमलेन पृष्टोऽहं- "मित्र ! किमर्थमिहाऽऽयातोऽसि ? कथं च विलक्ष इव दृश्यसे ?" मयोक्तं- "मित्र ! त्वामत्राऽऽगतं श्रुत्वाऽहमप्यागमं, पुनस्त्वां दृष्ट्वा वैलक्ष्यं प्राप्त इति" ततो वरमित्युक्त्वा मां सार्धं गृहीत्वा विमलश्चैत्यमुपेयिवान् !

अथ विमले चैत्यान्तः प्रविष्टे पृष्टतो मया चिन्तितं- यदहं रत्नं गृह्णन् विमलेन दृष्टो भवेयम् । ततो इतो नश्यामि' इति ध्यात्वा रत्नन्यासस्थलमागत्य व्याकुलत्वाद् रत्न-भ्रान्त्या दृषत्खण्डमादाय पलायितो वनमध्ये, दिनत्रयेण अष्टाविंशतियोजनान्युल्लङ्घ्य किञ्चिद् विश्रम्य तत्र ग्रन्थिमुद्ग्रथ्य यावद् विलोकयामि तावदश्मखण्डं विलोक्य मूर्च्छितो मुहूर्त्तान्तरे पुनर्लब्धचेतनो रत्नग्रहणेच्छया प्रत्यावृत्तः । इतश्च प्रसादात् निर्गतेन विमलेन मामदृष्ट्वा व्यग्रीभूतेन मद्-विलोकनाय प्रेषिताः समन्तात् सेवकास्तन्मध्यादेको मामभ्यापतितस्तं दृष्ट्वा यावद् भय-विह्वलाङ्गो नश्यामि तावत् तेनोक्तं- "अहो वामदेव! त्वामनालोक्य विमलकुमारस्तु भृशं चिन्ताकुलितोऽस्ति, तदागम्यतां शीघ्रमिति" श्रुत्वा विमलेन न ज्ञातो मेऽपराध इति जातधैर्यः समागतोऽहं विमलान्तिकं, विमलोऽपि साश्रुनेत्रो मामाश्लिष्याद्धासने निवेश्य मे गमनकारणं पप्रच्छ । अथ मायानुभावतो मिथ्या-कल्पयित्वा मयोक्तं- "मित्र! त्वयि प्रासादान्तःप्रविष्टे द्वारि स्थितोऽहं कयाचिद् विद्या-धर्याऽपहृतस्तिर्यग्-गगनाऽध्वनि कियन्ति योजनानि गत्वा सा मां भोगार्थं प्रार्थयामास । मया तु त्वद्वियोगानलतप्तेन तद्वचो न प्रपन्नम् । अत्रान्तरे अन्या काचित् खेचरी आयाता, साऽपि मम हस्ते विलग्ना, ततो जातस्तयोः कलहस्तद्विग्रहव्यग्रयो-स्तयो-र्हस्ताभ्यां स्खलितः पतितोऽहं भुवि, जातो भृशं जर्जराङ्गस्तथापि त्वत्प्रेम पारवश्यात् कथञ्चिच्छनैः शनैः प्रचलन्निहागममित्येतन्मे माया-जल्पितं स्वभाव-सरलत्वाद् विमलेन सत्यं मेने । अथैतत् मिथ्या वृत्तान्तकथनानन्तरमेव ममाङ्गे महावेदना जाता, तद्वशात् समुद्भ्रान्तनेत्रः पतितोऽहं भुवि, जातो निश्चेष्टः, मद्दुःखार्त्तेन विमलेन कृतो हाहारवः, मिलिताश्च धवलराजादयः सर्वेऽपि, कृताश्च मन्त्राद्यनेकशः प्रतीकारास्तथापि नोपशान्ता किमपि सा वेदना ।

तदवसरे स्मृतं विमलेन 'यदहो ! अचिन्त्य-प्रभावस्य चिन्तारत्नस्य प्रक्षालनजलेन शाम्यत्येषा वेदनेति' ध्यात्वा तन्न्यास-स्थले गत्वा विलोकितं, तत्र रत्नमदृष्ट्वा केनाऽपि

हृतमिति निश्चित्य 'हा हा ! कथं जीविष्यति मे सखा वामदेव इति' महाचिन्तार्त्तो विमलः प्रत्यावृत्त्य यावद् मदन्तिकमागतस्तावदतिघोररूपेण वनदेवता प्रकटीभूय सर्वजनसमक्षं प्रोचे- "अहोऽनेन वामदेवेन विश्वासघातिना तावत् रत्नं हृतं, पुनर्मिथ्याभाषणेन विमलो विप्रतारितस्ततोऽस्य कर्मचाण्डालस्य कर्मचाण्डालेनेत्थं दुर्दशा कृताऽस्ति । अतः परमप्येनं भृशं विडम्बयिष्याम्यहम्" इत्याकर्ण्याऽपि कृपालुना विमलेन मधुरवचनैर्वन-देवतां प्रसाद्य नीरुजः कारितोऽहम् ।

अथ ज्ञातं सर्वलोकैर्मम दुश्चरितं धिक्कृतश्च तैर्बहुधा, बहिष्कृतः स्वजनादिभिर्गेहात्, तथापि विमलेन न किञ्चिदपि कृतं मनोमालिन्यं, प्रत्युत "दुर्वारा एते प्राकृतजना, न चैषां वचनैस्त्वया काऽप्यधृतिर्विधेयेति" मां समाश्वासयामास ।

अथाऽन्यदा विमलकुमारो मदन्वितः प्राप्तः क्रीडानन्दनम् । तत्र चैत्ये गत्वा यावत् मधुर-स्वरेण नव्यकाव्यप्रबन्धैर्यावद् युगादिदेवं स्तोतुं प्रवृत्तस्तावद् रत्नचूडोऽपि चूतमञ्जर्या सहितस्तत्रायातः । परमभक्तिप्राग्भारजन्यां विमलोक्तां तां स्तुतिं श्रुत्वा हृष्टः, स्वयमपि भगवन्तं तुष्टाव । अथ जिन-वन्दनान्ते बहिर्मण्डपमागत्याऽन्योऽन्यं सानन्दाश्रु-लोचनमाश्लिष्य परस्परं कुशलप्रश्नश्चक्रे, रत्नचूडः प्राह- "मित्र ! त्वं मे मनसः क्षणमपि न विस्मृतोऽसि तथापि कार्यव्यग्रत्वेनाऽद्य यावत् त्वन्मिलनायाऽपि नाऽऽगमम् । बुधा-चार्यमपि न समानयं, यतो यद्-दिने त्वां मिलित्वा गतोऽहं वैताढ्ये तद्-दिन एव रात्रिशेषे रोहिण्यादि-षोडश-देव्यः प्रकटीभूय मामूचुः- 'वत्स ! त्वत्पुण्योदयाकृष्टा वयं सर्वा अपि अद्य प्रभृति तवाऽङ्गे अवतरिष्यामो, भविता च त्वं खेचरचक्री । आयान्ति च सर्वेऽपि खेचराः प्रातस्त्वामभिषेक्तुं', तदाकर्ण्य ध्यातं मया- 'यदहो ! एता विद्यादेव्य-श्चक्रित्वं चैतत्सर्वं पुण्यानुबन्धिपुण्यफलम् । विमलेन सह व्रतादानोत्सुकस्य मे सुवर्ण-निगडप्रायं राजविष्टिरिवाऽवश्यं भोक्तव्यमेवेति यावच्चिन्तयामि तावत् मदङ्गं प्रविष्टास्ता विद्यादेव्यः। अथ प्रगे सकलैर्विद्याधरैः सम्भूय महामहपूर्वकं कृतो मे राज्याभिषेकः, धृता च तैः शिरसि मदाज्ञा । तद्-दिवसादारभ्य नाना-राज्यकार्यविधानव्यग्रस्य मे गतानि कियन्ति दिनानि । एकदा स्मृतं मया- यदहो ! मेऽनवधानत्वं, विमलोक्तं कार्यं विस्मार्य राज्यार्त्तिपङ्कमग्नोऽनिशं तिष्ठामि इति । ततो बहुषु स्थानेषु गवेषयता दृष्टोऽन्यदैकत्र बुधसूरिः । कथितो मया त्वद्दीक्षाभिलाषः, प्रार्थितश्चासौ त्वत्कुटुम्ब-प्रतिबोधार्थं तदा सूरिणोक्तं- "वरं, यास्यामो वयं प्रस्तावे तत्र वर्धमानपुरे।" तत्प्रमाणीकृत्याऽहमत्राऽऽगत इति कृत्वा रत्नचूडेन काचित् सङ्केतवार्त्ता विमलस्य कर्णे कथिता । अथैतदाकर्ण्य हृष्टो विमलः, सपत्नीकं रत्नचूडमत्यादरेण स्वमन्दिरं समानिनाय । विविधभोज्य-वस्त्राल-

ङ्गारादिं-सपर्यां विधाय नाना-धर्मवार्त्ताभिर्गोष्ठी-सुखमनुबभूवे । इत्थं विमलस्नेहवशंवदौ तौ दम्पती पञ्च-षाणिअहानि तत्र स्थित्वा, विमलमनुज्ञाप्य स्वगृहं जग्मतुः । विमलस्तु लघुकर्मत्वात् ततः प्रभृत्यनिशं व्रतोन्मुखः संसाराऽसारतां विभावयंस्तस्थौ ।

एकदा मातृपितृभ्यां चिन्तितं- 'यदयं कुमारः प्रत्यग्रतारुण्योऽपि साधुवत्-संवृतेन्द्रियग्रामो न किञ्चिदपि विषयसुखमभिलषतीति विमलमाकार्य प्रोचतुः- "वत्स! अस्माकं प्राणावलम्बे यष्टिभूतः, कुलधौरेयस्त्वमेक एव सूनुस्त्वदुपभोगफलश्चैताः समस्ता राज्यसम्पदस्त्वमेव चेद् विरक्त एव तिष्ठसि तदा किमस्माकं राज्यादिवैभवेन ? ततो वत्स ? परिणय प्रत्यग्रयौवना राजकन्याः, भुङ्क्ष्व भोगान् मनोऽभीप्सितान्, सेवस्व शब्दादीन् पञ्चविषयान्, गृहाण राज्यधुरां, पूरयाऽस्मन्मनोरथान् राज्य सम्पदमनुभवनेनेति ।" ततो विमलोऽवादीत्, "पितरौ ! क्षुत्-पिपासा-ऽधमर्ण-स्वजनविप्रयोगादि-दुःखशतैः दुःखितेषु जानपदजनेषु कुक्षिम्भरिवद् यो नृपः केवलं स्वयं सुखं भुनक्ति, धिगस्तु तं नृपं, तत् सौख्यं च । ततः पूर्वं सेवकैः सर्वतो दुःखितजनानाकार्य तेषां दुःखान्यपाकृत्य पश्चाद् यद् यद् यूयमादिक्ष्यथ तदहं करिष्ये । तावत् तिष्ठामो वयं उपकारिकालयनमा सूत्र्योपवनशोभावलोकपराः पुरोद्याने" इति विमलवचसा हृष्टेन राज्ञा प्रहिताः सर्वदिक्षु दुःखिजनान्वेषणार्थं सेवकसङ्घाताः स्वयं च नानाद्रुमलतानिकुञ्जदीर्घिकादि रम्यायामा-रामभुवि पटकुटिमासूत्र्य तत्र विमलकुमारेण सह सपरिकरः सभामापूर्य नानातोद्यनाद-नाट्यादिप्रेक्षापरस्तस्थौ ।

## जैन महर्षि आगमनम्

अथाऽनेकेषु दुःखिजनेषु सेवकैर्नीयमानेषु अनेकेषु चाऽदुःखीक्रियमाणेषु तदवसरे क्वाऽप्यटव्यां कश्चित् पुमान् कृष्णाङ्गः क्षुत्क्षामः कुष्टाभिभूतो वेपमानतनुर्जराजीर्णो गलन्नेत्रोऽवनतनासिकः शटित-करचरणो लुञ्चितमुर्द्धजोऽनुपानत्कः परिशटितवस्त्र-खण्डावृताङ्गो दण्डकम्बलधरोऽलाबूयुगलमूर्णारजोहरणं चोद्वहन् दवदग्धकाष्टकीलनिभो गलत्स्वेदमलाविलो निदाघमध्याह्नार्कमरीचिप्रतप्तरजसि मार्गे धावन् दृष्टो राजादिष्ट सेवकैस्ततो महादुःख्यसाविति पश्चाद् गत्वा भाषितः "अहो मानव! एतस्मिन् महानिदाघे-ऽनुपानत्कस्य किं ते प्रस्थानप्रयोजनमिति ?" स प्राह- "अष्टौ मे उत्तमर्णाः सन्ति, तद् ऋणमोक्षार्थमहं गुर्वादेशादित्थं पर्यटामि । भविष्यति च मे गुरुप्रसादात् तद्-ऋणमोक्ष" इत्युत्क्वा पुनस्तथैव गन्तुं प्रवृतः। पुनर्नृपसेवकैर्हस्ते धृतोऽवद्- "अहो भवति मे कालक्षेपेण कार्यहानिरि" त्युक्त्वा पुनश्चलितस्ततो बलात्कारेण कथञ्चित् आनीतोऽसौ राजसेवकै राजसभायां कुरूपकुष्ठाभिभूतत्वाज्जवनिकान्तरे स्थापयित्वा कथितस्तै राज्ञो-

ऽग्रे सर्ववृत्तान्तस्तावद् विमलेन जवनिका पटमपसार्य विलोकितो रत्नचूडोक्त-सङ्केतानुसारेण लक्षितश्चाऽसौ बुधसूरिरिति । ततो विमलेन ''अहो ! महापुरुषस्य कृपालुत्वं, अहो ! निष्कारणोपकारित्वमिति ।'' सविस्मयप्रमोदोत्पुलकेन कृतो मनसा प्रणाम-स्तेनाऽपि मनसा धर्मलाभाशीर्दत्ता ।

अथ पुनस्ततोऽप्यसौ गन्तुं प्रवृत्तस्तदा सर्वेऽपि सभालोकास्तस्य कुरूपकुष्ठित्वादिकं जुगुप्समाना उच्चैर्जहसुर्यदहो ! ईदृग् दुःखस्थोऽप्यसौ महाभीष्मग्रीष्मातपे ईदृग्विधं शीतलमण्डपं मुक्त्वा मूढो गन्तुं व्यवस्यतीति ।

अथैवं नानालोकभणितिभिः सकोपमिवात्मानं दर्शयित्वा समुत्तप्तकनकाभ-कनीनिको भृकुटी-भीषणाननोऽसौ समस्त-संसदुत्त्रासकारिणा तारस्वरेण जगाद- ''रे रेऽधम ! स्वयंकुरूपाः कुष्ठिनः क्षुत्-क्षामाः दारिद्र्यादि सकलदोषोपद्रुता अपि किं मां हसथ ? किं युष्मत्तोऽपि अहमधिकदोषाश्रयः ? इत्यादि निर्भर्त्सना-परं कोपकरालाक्षं तमालोक्य नृपो विमलं प्रत्याह- ''वत्स ! अयं पुमान् पूर्वं गलत्कुष्ठविरूपाङ्गः स्रवल्लाला-म्लानमुखोऽत्यन्त-दीन इवाऽभूत् । साम्प्रतं तु क्षणमात्रादस्मासु पश्यत्स्वेव जातश्च-ण्डांशुचण्डकान्तिर्दुष्प्रेक्ष्यो दर्शनादेव जनयति त्रासोत्कम्पं, तन्नूनं कारणान्तरवश-विहित-रूपविपर्ययः कश्चिन्महर्षिरयं कुपितो मा भूत् तेजोलेश्यया सकलदेशदाहाय, तदेनं प्रणतिनुत्यादिभिः तावदनुनयाम'' इति । ततो विमलेनाऽपि ''तात! सत्यमेतदिति'' उक्ते नृपादयः सर्वेऽप्युत्थाय तं महर्षिं प्रणिपत्य प्राञ्जलयः प्रोचुः- ''स्वामिन् ! अज्ञानिनो वयं, यूयं च महात्मानस्तत्-क्षन्तव्यो भगवद्भिः अस्मदपराधः, स्वस्य मूलस्वरूप-दर्शनेनाऽनुग्राह्याश्च वयमित्यादि-भक्तिवाक्यैः कोपं संवृत्य निमेषमात्रात् स महर्षि-र्महौजसं दिव्य-स्वरूपं सर्वाङ्गसुन्दरं कनक-कमलासीनमात्मानमदर्शयत् ।

## संसारीणां संसारत्यागिनां भेददर्शनम्

अथ नृपादयः प्रहृष्टास्तं महर्षिं प्रणम्य पप्रच्छुः- ''भगवन् ! युष्माभिः प्राक्-कुरूपताऽवसरे स्वाङ्गस्थाः कुरूप-कुष्ठित्वादयो दोषाः सर्वेऽप्यस्मासु यदारोपितास्ते प्रत्यक्षतस्त्वस्मासु नोपलभ्यन्ते, तथा यूयमप्यवितथवादिनस्तदेनं संशयमपोहितुमर्हन्तु भवन्तः ।'' सूरिः प्राह- ''अहो भव्याः ! शृणु तत्-कुरूपत्व-स्वरूपत्वादिकारणम् । संसारिजीवाः कनककान्तयोऽपि पाप-पङ्कोपलिप्तत्वात् कृष्णाङ्गा एवोच्यन्ते । साधवस्तु कृष्णाङ्गा अपि विशदपरिणामत्वाद् गौराङ्गा एवोच्यन्ते । संसारिणो नीरोगा अपि मिथ्यात्व-महाकुष्ठग्रस्तत्वात् कुष्ठिनः । साधवस्तु बहिर्गलत्कुष्ठिनोऽपि मिथ्यात्व-कुष्ठापगमात् नीरोगा एव । संसारिणो नित्यमिष्टान्नभोजिनोऽपि विषयकदन्नैः सदा-

ऽतृप्तत्वात् क्षुधिता एव, साधवस्तु बहिः क्षुत्क्षामा अपि शमामृताऽऽस्वादमुदिता नित्यं तृप्ता एव । संसारिणस्तारुण्यमदोद्धता अपि पण्डितवीर्योल्लास-समयं चरमपुद्गल-परावर्त्तलक्षणं स्वभावतारुण्यमनासादयन्तो ज्ञानादिरत्नत्रयोपार्जनविकला जीर्णाङ्गा एव। साधवस्तु बहिर्जराजीर्णा अपि प्राप्तस्वभाव-तारुण्यत्वात् तरुणा एव । संसारिणः सुलोचना अप्यतत्त्व-दर्शिनश्चिप्पटाक्षा एव । साधवस्तु गलन्नेत्रा अपि तत्त्वदर्शित्वात् सुलोचना एव । संसारिणो गृहे स्थिता अपि दुस्तरभवकान्तारादनिवृत्ताः सदा पर्यटनशीला एवोच्यन्ते, साधवस्तु नित्यमुद्यतविहारिणोऽपि अप्रमत्तपुराश्रयणात् सदा सुखशीला एव। इत्थं समस्तान्यन्यान्यपि दारिद्र्यकार्शादिविशेषणानि सम्यग् विभाव्यमानानि संसारि-जन्तुष्वेव सम्भवन्ति, न पुनर्लोकोत्तर-स्वभाव-साम्राज्यसुखमुदितेषु साधुषु । इत्यादि संसाराभिमुखाणां संसारविमुखाणां च स्वरूपं सूरि-मुखादाकर्ण्य नृपादयः प्रमुदिताः सूरिं प्रोचुः- "स्वामिन् ! सुष्ठु निरूपितं कुरूपत्व-सुरूपत्वादिस्वरूपमिति ।"

## संसारस्य मठरूपता, मोहादिकृता बठरगुरुकदर्थना

पुनर्नृपः प्राह- "स्वामिन् ! यद्येवं संसार-स्वरूपमतिदारूणं तदेवं जानन्नपि जनः कथं तदासक्तिं न जहाति ?" अथ सूरिः प्राह- "शृणु राजन् ! विशालनाम्नि ग्रामे एको नाना-धन-रत्न-खाद्यपूर्णः शिवालयोऽस्ति । तत्रैकः सारगुरुर्नाम मठाधिपतिर्वसति। सोऽनिशं तद्-ग्राम-वास्तव्यैर्धूर्त्तैः सह मिलति, स्वकुटुम्बं चोपेक्षते, एवं क्रमेण तैर्धूर्त्तैः कार्मणप्रयोगेण वशीकृतोऽसौ, यथा ते नर्त्तयन्ति तथा नृत्यन्ति । सकल समृद्धिभृतोऽपि तन्मठः स्वायत्तीकृत्यैकं ज्येष्ठधूर्त्तं तत्र नायकं कृत्वा सर्वे धूर्त्ताः स्वेच्छया तत्सम्पदं भुञ्जते। स सारगुरुस्तु मठमध्ये प्रवेशमपि न लभते । अथैवं दृष्ट्वा तत्पुरवास्तव्या व्यवहारिणः सारगुरुं बहुधा शिक्षयामासुः । "अहो ! स्वकुटुम्बं परित्यज्य किं धूर्त्तान् पुष्णासि ? एते च साक्षात् तव वैरिण्यस्त्वां बहुधा विडम्बयिष्यन्तीत्यादि ।" तथाऽप्यसौ कार्मण-नियन्त्रितो न किञ्चित् तद्वचः प्रतिपेदे । तदा तैर्धनिभिः सम्भूय गुणानुरूपं तस्य बठरगुरुरिति नाम चक्रे । अथ यथा यथा ते धूर्त्तास्तं बठरगुरुं नाना-प्रकारैर्नर्त्तयन्ति, तथा तथाऽसौ मोदते । तस्मिन् ग्रामे चत्वारः पाटकाः सन्ति । तत्र प्रथमे पाटके भग्नघट-कर्परं हस्ते दत्त्वा बठरगुरुं ते भिक्षयन्ति, ये च तत्रत्या लोकास्तेऽपि धूर्त्ताणां सम्बन्धिनस्ततो यष्टि-मुष्ट्यादिभिस्तं विडम्बयन्ति । न च भैक्ष्यलवमपि वितरन्ति । एवं भग्ने घटकर्परे पुनस्ते सरावं तद्-हस्ते दत्त्वा द्वितीये पाटके भिक्षयन्ति । तत्रत्या अपि लोका आक्रोश-तर्जन-ताडनादिभिस्तं बठरगुरुं विडम्बयन्ति । पुनः सरावे भग्ने ताम्रभाजनं दत्त्वा तृतीये पाटके तं भिक्षयन्ति, तत्राऽसौ किञ्चिद् अधिकां भिक्षां लभते,

तस्मिन् भाजने भग्ने पुनस्तथैव ते भ्रामयन्ति । इत्थं ते धूर्त्तास्तं बठरगुरुं बहुधा विनाटयन्ति, स्थाने स्थाने भिक्षयन्ति, स्वमठे स्वयं प्रवेशमपि नाऽऽप्नोति, स्वकुटुम्बमवसीदति, धूर्त्ताश्च सम्पदं विलसन्ति, लोका उपहसन्ति, तथाप्यसौ बठरगुरुः कार्मणवशीकृतो धूर्त्तानेव मित्रीयति, तत्कृता विडम्बना अपि सुखत्वेनाऽध्यवस्यति ।

एवं हे राजन् ! अत्राऽप्युपनयोऽयं, संसारोऽयं ग्रामः, आत्मस्वभावो ज्ञानादिरत्नपूर्णः शिवालयमठो, आत्मा सारगुरुः, कर्मरूप-धूर्त्तसङ्गेन मोहोन्मादादिकार्मणै र्विकलीभूतः स्वाभाविक-गुणरूप स्वकुटुम्बमुपेक्षते, मोहो धूर्त्ताधिपः आत्मस्वभाव-शिवालयं स्वायत्तीकुरुते । सद्गुरुरूपव्यवहारिभि-र्बोध्यमानोऽपि बोधमनाप्नुवन् आत्मैव बठरगुरु-रित्युच्यते । अथ ते कर्मधूर्त्ताः नारक-तिर्यङ्-नरा-ऽमरायू-रूपाणि चत्वारि भाजनानि दत्त्वा गतिचतुष्करूप-पाटकचतुष्टये विषयभिक्षां कारयन्ति । तत्र यातनाशतान्यनु-भवन्नपि न कथञ्चिदप्युद्विजते । तदेवं राजन् ! सर्वेऽपि संसारिणो मोहोन्मादादिकार्मण-परवशाः संसारकष्टं जानन्तोऽप्यज्ञा इव तत्रैवाऽऽसज्जन्ति, ये केचनाऽपि लघुकर्माणो गुरूपदेशं सम्यगवबुध्य मोहादिधूर्त्तांस्तिरस्कृत्य सहजकुटुम्बं पुष्यन्ति, ते स्वसम्पत्-साम्राज्यकलिताः सुखिनो भवन्त्यपि" इत्यादि-देशनां श्रुत्वा पुनर्नृपः प्राह- "भगवन् ! भवादृशा यत्र बोधं कर्त्तारस्तत्र बुध्यन्त्येव भव्यप्राणिनः, परं भवद्भिः कस्योपदेशेन केन हेतुना वा व्रतमाददे ? तत्कथनेनाऽस्मान् पावयन्तु भवन्त इति ।"

## बुधाचार्यस्य आत्मकथनम्

सूरिः प्राह- "शृणु नृप ! पृथिवीतलनाम्नि पुरे शुभविपाको राजा, निजसाधुता तस्य राज्ञी, तयो-र्बुधनामा सुतः, सकलगुणपात्रम् । अथ शुभविपाकस्य भ्राता अशुभविपाकः तस्याऽसाधुता राज्ञी, तयोर्मन्दनामा सुतोऽशेषदोषास्पदम् । इत्थं तौ द्वावपि पितृव्या-ऽऽत्मजौ भ्रातरौ बुध-मन्दौ क्रमेण प्रवर्धमानौ स्तः । अन्यदा बुधस्तु निर्मलमानस-पुराधीश-शुभाभिप्राय-नृपकन्यां धिषणाभिधां परिणीतवान् । तया सह सुखमनु-भवतस्तस्य विचारनामा पुत्रो जज्ञे ।

## घ्राणेन्द्रियकृता कदर्थना

अथैकदा बुध-मन्दौ द्वौ बन्धू स्वक्षेत्रे ललाटनाम्नि पर्वते गतौ । तत्राऽपवरक-द्वययुतां नासिका-नाम्नीं गुहां वीक्ष्य यावत् तद् गर्भे दृष्टिं कुरुतस्तावद् दृष्टैका बालिका ताभ्यां, नामादि-पृष्टा सा प्रोवाच- "अहो ! सुपुरुषौ यदा युवां असंव्यवहारपुरात् निर्गत्यैकेन्द्रियपुरे कियत् कालमुषित्वा विकलेन्द्रियपुरे त्रीन्द्रियाख्य-पाटके समायातौ तदा कर्मपरिणाम-राजेन घ्राणनामा सहचरो युवयोः समर्पितो बभूव । स भवतोश्चिरन्तनसखाऽत्र गुहायां

निवसति । अहं तु तत्-परिचारिका भुजङ्गता नाम्नी भवदादेशादेवाऽत्र निवसामि । ततश्चिरन्तनस्नेहं संस्मार्य सम्भाव्यतां तन्मित्रम् अहं चेति । तद्वाक्यात् मुदितो मन्दो घ्राणं भुजङ्गतां च समाश्वास्य तयोरतिस्नेहं दधौ, बुधस्तु मध्यस्थभावेन घ्राणमित्रमपालयत् भुजङ्गतां तु अधम-स्त्रीयं न मे सङ्गतिकरणार्हेति ध्यात्वा निरकासयत् ।

अथ मन्दो भुजङ्गता-प्रेरितः कर्पूरकेसर-सुगन्धि-पुष्पादि-सुरभिद्रव्यैर्घ्राणं पुष्णाति, किमपि विगन्ध-वस्तु दृष्ट्वा घ्राणमाच्छादयति जुगुप्सते च । बुधस्तु सुगन्धि-द्रव्येषु विगन्धिद्रव्येषु च समचित्त एव प्रवर्त्तते । एवं गतानि कतिचिद् दिनानि । अथ बुधस्य पुत्रो धिषणाङ्गजन्मा विचारनामा पूर्वं कौतुकार्थी देशदिदृक्षायै गतोऽभूत्, स कियद्भिर्दिनैः पुनरायातो बुधसमीपे घ्राणमवलोक्य प्राह- "तात ! घ्राणोऽयं दुष्टमित्रं, न सङ्गतिकरणार्हः । एतस्योत्पत्तिं सम्यगहं जानामि, यतोऽहमितो भ्रमन् प्राप्तो भवचक्रपुरं, तत्र यावदहं राजमार्गे स्थितोऽस्मि तावदेका स्त्री मां दृष्ट्वा सहसैवाऽऽनन्दिता सती मामाश्लिष्य बाष्प-प्लुत-नेत्राऽवोचत्- "अहो वत्स ! अहं मार्गानुसारिताख्या त्वन्मातुर्धिषणायाः प्रियसखी, त्वं तु लघुस्ततो मां न लक्षयसि, अहं ते मातृष्वसा त्वं मम भागिनेय इत्यतस्तिष्ठ त्वं वत्स ! सुखेन मत्पार्श्वे । दर्शयामि ते नानाविध-भवचक्रकौतुकानि, युक्तमेव धिषणा-ङ्गजस्य ते विविध-देशचरित्रावलोक-चातुर्यमिति" श्रुत्वा प्रमुदितोऽहं स्थित-स्तदुपान्ते ।

## संयम-मोहयुद्धम् ।

अथ तया दर्शितं मे विविधाश्चर्यमयं सम्पूर्णं भवचक्रपुरं, ततो विवेकपर्वतं वीक्षितुं गच्छद्भ्यामावाभ्यां तदुपत्यकायां दृष्टः कश्चिद् भटो गाढप्रहारजर्जराङ्गः कतिचित् मनुष्यैः स्कन्धे कृत्वा नीयमानो बहुमनुष्य-वेष्टितश्च । तं दृष्ट्वा मया पृष्टं- "मातः ! कोऽयं ?" तदा मार्गानुसारितयोक्तं- "वत्स ! चारित्रधर्म-ज्येष्ठ-पुत्रस्य यतिधर्म-कुमारस्य भटोऽयं संयमनामा क्रीडार्थं बहिर्निर्गतो मोहसैनिकैर्मिथ्यात्वाद्यैर्घातितो निजभटैर्गृहं नीयते, वयमपि यामस्तत्र विलोकयामः कौतुकमिति" कृत्वा गतावावां विवेकशैलोपरिस्थमप्रमत्तपुरं दृष्टस्तत्र चित्तसमाधानमण्डपे चारित्रधर्मनृपः सपरिवारः, उपलक्षिताश्चेमे प्रत्येकं नामग्राहं सभासदो मार्गानुसारितया तावत् संयमोऽपि तदवस्थः समानीय दर्शितो नृपाय । कथितं च तैर्मोहसैनिकानां दर्पोत्कटत्वम्, अथ तदाकर्ण्य यावत् नृपः सभां विलोकते, तावदुदायुधाः सन्तोष-दया-क्षमा-ब्रह्मचर्यादयो भटाः समुत्थाय हुङ्कारान् मुञ्चन्तोऽब्रुवन्- "आदिशतु देवोऽस्मान् मोहमभिषेणयितुं, क्षिपामो वयं क्षणमात्रात् समस्तमपि मोहसैन्यं, ततो न युज्यतेऽत्र विलम्बितुं, नोपेक्षितव्योऽयं प्रसर्पन् व्याधिरिव विपक्ष" इत्यादि-शौर्यवाक्यानि तेषामाकर्ण्य नृपः सद्बोधाऽमात्याऽभिमुखं दृष्टिं दत्तवान् ।

अथ सद्बोध-सम्यग्दर्शनौ मिथो मन्त्रयित्वा नृपं प्रोचतुः- "स्वामिन् ! नृपाणां तावत् स्वाम्यमात्य-सुहृत्-कोश-राष्ट्र-दुर्ग-बलानीति सप्तराज्याङ्गानि तथा प्रभुत्वोत्साह-मन्त्रजास्तिस्रश्च शक्तयः, एतेषां बलाऽबलं विचिन्त्य तदनु विजिगीषुणा नृपेण साम-दाम-भेद-दण्डानामन्यतमेनोचितोपायेन यथासम्भवं सन्धि-विग्रह-याना-ऽऽसन-द्वैधाऽऽश्रय-रूपाणां षण्णामन्यतमे प्रवर्त्तितव्यमिति नीति-स्थितिस्ततो न युक्तं समय-मन्तरा सहसैवाभिषेणनं, ततः सन्धिकरणार्थं प्रेष्यते कश्चित् तावद् दूत इति ।"

## चारित्रनृपदूतस्य मोहसमीपे गमनम्

अथ राज्ञा तथेति प्रतिश्रुत्य सत्यनामा दूतः प्रहितो मोहं प्रति, प्राप्तः क्रमेण स चित्तवृत्त्यटव्यां प्रमत्तता-तटिनी-तटस्थमोहनृपस्कन्धावारं, तत्र चित्तव्याक्षेपमण्डपस्थं सपर्षदं मोहमहीपालं प्रतिस्फुटं स्वस्वाम्यादिष्टमवदत्- "अहो मोहराज ! चित्त-वृत्त्यटवीयं तु तावत् न युष्मदीया न चाऽस्मदीया । अस्यास्तु स्वामी भवजन्तुरेव । वयं यूयं कर्म-परिणामादयश्च सर्वेऽपि भवजन्तोरेव सेवकाः स्म, एवं सत्यपि युष्माभिस्तं भवजन्तुमकिञ्चित्करं कृत्वा स्वयं तद्-राज्यं जगृहे, तथापि वयं किमपि न ब्रूमः तदुपर्यपि यद्-यूयमुदीर्योदीर्य-विग्रहं कुरुथ, तन्न युक्तं कुरुथ ।" इत्यादि-सत्योक्तान्याकर्ण्य मोहराज-पत्नी महामूढताऽतिक्रुद्धा- "रे रे दूताधम ! मोहराजादयोऽपि भवजन्तोः सेवकाः किमेवमसमञ्जसं प्रलपसि" इत्याद्याक्रोशवाक्यानि व्याजहार । तावत् सर्वेऽपि मोहराजभटा भ्रुवं नर्त्तयन्तः कोपाध्माताः समुत्थिताः सत्यं प्रहर्तुम् ।

अथाऽसौ भयवेपमानतनुः कथञ्चित् ततः पलाय्य वेगादागतश्चारित्रधर्मनृपसमीपम् आह च "स्वामिन् ! मदोद्रिक्तोऽसौ महामोहमहीपालस्त्वां न मन्यते तृणायाऽपीत्यादि ।" अथ तच्छ्रुत्वा क्रुद्धश्चारित्रधर्मो रणभम्भां वादयित्वा सर्वं स्वसैन्यमादाय प्रस्थितः सङ्ग्रामार्थम्, इतश्च मोहराजोऽप्युत्कट-कटक-परिवृतोऽभिमुखमागत्य स्थितः । अथोभयोः सैन्ययो-श्चित्तवृत्त्यटव्यां सङ्ग्रामः प्रावर्त्तत, प्राहरंश्चाऽन्योऽन्यं नाना-प्रहरणैर्भटाः । इत्थं महातुमुले जायमाने दुष्टाभिप्रायादिकैर्मोहसैनिकैः शुभाभिप्रायाद्या-श्चारित्रधर्मभटाः प्रहारशिथिलाङ्गा अक्रियन्त, निर्मथितं च समस्तमपि तत्सैन्यम् । अथ स्वसैन्य-पराजयं विलोक्य चारित्रधर्मनृपः ससैन्योऽपसृत्य पुनर्जैनपुरं प्रविष्टः । मोहराजोऽपि जितकाशी सन् स्वस्कन्धावारेण तं समन्ततो वेष्टयित्वा स्थितोऽस्तीत्येवं समस्तमपि चारित्र-मोहराजयोः सैन्यस्वरूपं दर्शितं मे मार्गानुसारितया । तद्विलोक्य प्रत्यावृत्तः क्रमेणाऽत्रा-ऽऽगतोऽहं, मार्गानुसारिताऽपि पृष्ठे समायातीति ।

## धवल-विमलयोः दीक्षा

तत्र घ्राणोऽयं विषयाभिलाष-मन्त्रिसुत इति मे मार्गानुसारितया दर्शितोऽभूत्, तद् वर्ज्योऽयं सर्वथेति विचारवाक्याद् यावद् बुधो घ्राणसङ्गत्यागोपायं विचिन्तयति, तावन्मार्गानुसारिताऽपि तत्राऽऽगता, तन्मुखादपि तथैव घ्राणोत्पत्तिं श्रुत्वा बुधोऽत्यन्तं तत्-त्यागोत्सुकोऽभवत् । अथ मन्दस्तु भुजङ्गता नुन्नो यत्र तत्र सुगन्धि-लोलुपो भ्रमन्नेकदा देवराजपत्न्या लीलावत्या गृहे गतः । अथ तत्र लीलावत्याः पुत्रस्य मारणार्थं तत्-सपत्न्या एका विषमिश्रिता गन्धपुटी देहल्यां मुक्ताऽस्ति । तत्राऽऽयातेन मन्देन भुजङ्गता-पारवश्यात् सा गन्धपुटी आघ्राता, तद्-विषावेशात् मृतोऽसौ क्षणमात्रात् । इत्थं मन्दविषयं घ्राणसङ्ग-दुर्विपाकं वीक्ष्य विरक्तो बुधो निजसाधुता-शुभविपाकौ माता-पितरौ धिषणां प्रियां विचारं सुतं मार्गानुसारितां श्यालिकां च इत्थं समग्रमपि कुटुम्बं सार्थे गृहीत्वा सद्गुरुपान्ते दीक्षामग्रहीत्, जातोऽल्पकालेन सर्वसिद्धान्तपारगः । दत्तं च गुरुभिः सूरिपदं, ततः शृणु धवलमहिपाल ! सोऽहं बुधसूरिरिदं च मे व्रतादान कारणम् । अथैवं देशनामाकर्ण्य परमवैराग्य-संवेगाधिष्ठितो नृपो विमलं प्रत्याह- "वत्स ! गृह्यतां राज्यभारः संयमग्रहणेन भवेम वयं भवमुक्ता इत्याकर्ण्य विमलः प्राह- "तात ! न मे धर्म-प्रत्यूहभूतेन राज्येन किमपि प्रयोजनं, न चैवं दुरित-निदान-राज्यदानेन भवति भवतोऽपि पुत्र-वात्सल्यम्, अहं तु प्रागेव व्रतायोत्कण्ठितोऽस्मि" इति श्रुत्वा विमलभ्रात्रे कमलकुमाराय राज्यं दत्त्वा पुरान्तश्चैत्येऽष्टाहिका महोत्सवं विधाय श्रीबुधाचार्योपान्ते राज्ञा विमलकुमारेण च अन्यैरपि बहुभिः पौरैर्दीक्षा जगृहे ।

अथाऽगृहीतसङ्केते ! बुधसूरिदेशनामेवं श्रुत्वाऽपि माया-स्तेयवशात् न किञ्चिदपि प्रबुद्धोऽहम्, प्रत्युत विमलस्य व्रतग्रहणावसरे विमलो मां बलात्कारेण दीक्षां ग्राहयिष्यतीति विचिन्त्य ततः पलायितस्तदनु विमलेन सेवकैर्गवेषितोऽपि यदाऽहं क्वापि न लब्धस्तदा तेन गुरुं प्रति पृष्टं- "स्वामिन् ! भवद्देशनया प्रबुद्धाः सर्वेऽप्येते जना यथाशक्ति धर्मोद्यममकार्षुः, परं मम मित्रं वामदेवस्तु श्रुत्वाऽपि न किञ्चित् प्राबुधत्, साम्प्रतं तु क्वापि गतो दृश्यते, किं तत्र कारणमिति ?" सूरिः प्राह- शृणु महाभाग ! यावदस्य पार्श्वे माया-स्तेयाभिधे दुष्टमित्रे स्तः तावत् न प्राप्नोत्ययं धर्मबोधम् । साम्प्रतमपि मा कारयतु बलात् मां संयमिनमिति पलायितोऽस्तीति, पुनर्विमलेन दुष्टमित्रत्यागोपाये पृष्टे सूरिरवक्- "निर्मलचित्तपुरेशस्य शिष्टाभिप्रायस्य शुद्धता-पापभीरुता नाम्न्यौ द्वे राज्यौ स्तः, तयोः क्रमेण सरलताऽस्तेयताऽभिधे द्वे कन्ये यदाऽयं परिणेष्यति, तदा माया-स्तेययोः सङ्गं त्यक्ष्यति इति श्रुत्वा मामयोग्यं विज्ञाय विमल उपेक्षते स्म ।

अथ धवल-विमलादिषु गुरुभिः सार्द्धमन्यत्र विहृतेषु पुरमागतोऽहं पूर्वकृतस्तेयाद्यपराधात् पुरजनैरूपद्रूयमाणो निःस्वामिकतया तत्र स्थातुमक्षमो देशान्तरं प्रस्थितः, तत्र क्वचित् पुरे सरलनाम्नो वणिजो हट्टे स्थितः, पृष्टं तेन मे नामाऽन्वयादिकम्, उक्तं मयाऽपि यथास्थितं, तेनाऽपि पितृनाम्ना मां कुलीनं विज्ञाय "वत्स ! अत्र मद्‌गृहे सुखेन तिष्ठे" त्यादिरादरः कृतः, मयाऽपि माया-प्रणयमुद्भाव्याऽद्य मे तात-दर्शनं जातमित्यादि-कपटवाक्यैर्वशीकृतोऽसौ मां गृहे समानीय स्वपत्नीं बन्धुमतीमित्युवाच- "प्रिये ! आवयोरपुत्रयोर्भाग्येनाऽऽनीतोऽयं वामदेवस्तत् पुत्र एव मन्तव्य" इति स्थितोऽहं तत्र, दर्शितं च तेन सर्वं धनादिकं, गतानि कतिचिद् दिनानि ।

अन्यदा बन्धुलनामा सरलस्य सखा षष्ठी-जागरणोत्सवे सरलमाकारयितुमागतस्तदा सरलेन मां प्रत्युक्तं-वत्स ! त्वया सावधानेन हट्टे शयितव्यम्, अहं तु जागरणार्थं यामि। मयोक्तं-"तत्राऽहमेकाकी बिभेमि, ततो गृह एव शयिष्ये" इति स्थितोऽहं गृहे, गतः सरलो मित्रगृहे।

अथ निशीथे स्तेयेन प्रेरितोऽहं शनैर्गृहादुत्थाय गतो हट्टे, ततो धनं गृहीत्वा क्वाऽप्यन्यत्र क्षिप्त्वा यावत् निवर्त्ते, तावद् दृष्टो यामिकैः, गृहीतश्च चौर इति कृत्वा जातो भूयान् जनकोलाहलः तदाकर्ण्याऽऽयातस्तत्र सरलोऽपि पृष्टं तेन "वत्स ! किमेतत् ?" तदा मयोक्तं "तात ! त्वां विना गृहे सुप्तस्य मे निद्रा नाऽऽयाता, तदा मया ध्यातं हट्टे गत्वा पितुः शयनीये शये, यदि कथञ्चित् निद्राऽऽयाति, इति कृत्वा यावदत्राऽऽगतस्तावद् विवृतद्वारं हट्टं वीक्ष्य विलक्ष इव स्थितः । दैवात् तदैवाऽऽयातैर्यामिकैरहमेव चौरबुद्ध्या धृत" इत्याकर्ण्य निवारिता सरलेन यामिकास्तेऽपि "ज्ञातोऽस्ति चौरः प्रगे प्रादुष्करिष्यामः" इत्युक्त्वा साकूतं मदभिमुखं विलोक्य गताः ।

अथ तेषु गतेषु मया ध्यातं, यदेते यामिकाः प्रातः सलोप्त्रं मां गृहीष्यन्ति, ततो नश्याम्यधुनैवेति तस्यामेव निशि तद्धनमादाय नष्टो, दैवात् तैरेव यामिकैर्दृष्ट्वा गृहीतः सलोप्त्रो, यष्टि-मुष्ट्यादिभिर्जर्जरीकृत्य गाढं बद्ध्वा चाऽऽनीतो नृपान्तिकं, यावद् राजा मारणायाऽऽदिशति तावत् पुनः तत्राऽऽयातेन सरलेन "स्वामिन्! मम पुत्रोऽयमित्यादि-विज्ञप्त्या मोचितस्तदा नृपेणोक्तं- "हे सरल ! दुष्टोऽयं त्वत्पुत्रः, न त्वद्-गृहे रक्षणोचितस्ततो वयमेनं रक्षिष्याम इति राज्ञा रक्षितोऽहं स्वमन्दिरे गृहदास्यकरणार्थम्, अन्यदा केनचिद् विद्याबलेन राजकोशाद् धने हृते पदावलोकादिभिः कथञ्चिदपि चौरमप्राप्य नृपो मामेव चौरं निश्चित्य सर्वथा पुण्योदये निष्ठिते बहुविडम्बना-पूर्वकं व्यापादयामास।

अथ तद्भववेद्यगुटिका-क्षये पुनरन्यां गुटिकां दत्त्वा प्रेषितोऽहं भवितव्यतया पापिष्ठनिवासाख्यनगरे, तत्र चिराय बहु-दुःखशतान्यनुभूय पुनस्ततो निर्गत्य प्रायः स्त्रीवेदतया क्लीबतया क्वाऽपि च पुंस्त्वेन नानाजाति-योनि-कुलादिष्वनन्तं कालं यावद् विडम्बितोऽहं भवितव्यतया । इत्थं बहुधा विडम्ब्य विडम्ब्य साऽन्यदा किञ्चित् प्रसद्य मामुवाच- "आर्यपुत्र ! बहुशः काष्टान्यनुभूतानि त्वया, ततोऽधुना मदादिष्टं पुण्योदय-सहायमादाय याहि मनुष्यगतिनगरमिति प्रतिश्रुत्य प्रस्थितोऽहम् ।

इत्थं माया-स्तेय- घ्राणेन्द्रियादिसङ्गसम्भवानर्थं मत्वा भविनस्तेषामासिक्तं त्यजत सुखवृद्ध्यै ॥

इत्युपमितकथोद्धारे मायास्तेय घ्राणेन्द्रियादिविपाक-दर्शनाख्य
स्तृतीयोऽधिकारः ॥ ३ ॥

# अथ चतुर्थाधिकार :

## लोभपरवशस्य धनशेखरस्य प्रवृत्तयः

संसारि-जीव आह-अथाऽऽकर्णयाऽगृहीतसङ्केते ! मम मनुष्यगतिनगरागमनवार्त्तां तथाहि-

आनन्दपुरे दृप्यत्-प्रत्यर्थि-द्विपघटा-मदोन्मूलने केशरीव-केशरी नामा नृपः, तद् राज्ञी जयसुन्दरी, [1]तत्र पुरे धनोपार्जयाभिध-श्रेष्ठिनः पत्न्याः धनमञ्जरी-नाम्न्याः कुक्षौ तद्भववेद्यकर्मरूपगुटिकां दत्त्वा भवितव्यतयावतारितोऽहम् । अथ यदा तया मे पुण्योदयः सखा दत्तस्तदाऽन्योऽपि सागराभिधः सखा दत्तोऽभूत्, ततः पूर्णे गर्भकाले प्रसूतोऽहम् । पुण्योदय-सागराख्य-मित्रद्वययुतः पित्रा महोत्सवपूर्वकं धनशेखर इति ममाऽभिधा चक्रे । क्रमेण वर्द्धमानस्य मे सागरमित्रानुभावात् मनस्येवं विकल्पा जायन्ते यत्-संसारे धनमेव सर्वाधिकं, येन तेनोपायेन धनमेव सञ्चितव्यमित्यादि-चिन्तयन् समये पठितः कलाः, जातो वाणिज्यकुशलः । एकदा मया तातं प्रत्युक्तं- "हे तात ! भवदाज्ञा भवति चेत् तदाऽहं व्यापाराय देशान्तरं व्रजे" तच्छ्रुत्वा पिता प्राह- "वत्स ! त्वमेक एवाऽस्माकं प्राणाऽवलम्बन-यष्टिभूतः पुत्रः विदेशगमनं त्वपायशतहेतुभूतं ततो नाऽनुजानीमो वयं देशान्तरं गन्तुम् । भूयोऽपि विद्यतेऽस्मद्गृहे वित्तम् । कुरु यथेच्छं दान-भोगादि-समीहितं तद्व्ययेनेति।" पुनर्मयोक्तं- "तात ! अनुपार्जनया विकीर्यमाणा हि सागरप्राया अपि कोशाः क्षीयन्ते, तर्हि कियदेतद् धनम्? अन्यच्च 'यः प्राप्त-तारुण्योऽपि पितृसत्कां लक्ष्मीं भुनक्ति, स स्वजननीमेव भुनक्ति' इति लोकोक्तिः ततोऽनुजानीत यूयं, विदेशे गत्वा नानोपायैर्धनमर्जयित्वा स्वल्पकालेनैव गृहमागमिष्याम्यहमि" त्यादि-वचोभिः पितरं मातरं च कथञ्चिदनुज्ञाप्याऽथ चलितोऽहं दक्षिणोदधि-तीरदेशान् प्रति, प्राप्तश्च समुद्रतटस्थं जयपुरम् ! तत्-परिसरे किन्नु प्रवहणमारुह्य यामि रत्नद्वीपे किन्नु चण्डिकादि-देवान् रुधिरादिबलिभिः प्रसाद्य धनमर्थये, किंवा केनचिच्छलेन कञ्चित् नृपं हत्त्वा, तद्राज्यं लामि? किमुत गुफादौ प्रविश्य रसकुम्पिकामानयमि ? किं वा धातुवादं प्रयोजयामि ? किमथवा पातालं खनामीत्यादि नाना-धनार्जनोपायान् विमृशन्

१. तत्र पुरे सोमदेवाभिधश्रेष्ठिनः पत्न्याः कनकसुन्दरीतिनाम्न्याः-D ॥

यावद् यामि तावदेकं किंशुकं सप्ररोहं वीक्ष्य धातुवादवाक्यात् नूनमत्र निधानं भविष्यतीति "ॐ नमो धरणेन्द्राय" इत्यादि-मन्त्रं-पठित्वा निखातं मया तद्भूतलं, निर्गतं ततो दीनार-सहस्र- भृतमेकं ताम्रपात्रम् । तद्गृहीत्वा प्रहृष्टोऽहं, जातश्च प्रबलः सागरः ।

अथ प्रविष्टोऽहं जयपुरं, तत्र तिष्ठतो मे बहुलव्यवहारिणा सह परिचयो बभूव । तेन कुलशीलादिगुणान्वितं मां विज्ञाय स्वपुत्री कमलिनी परिणायिता । तया सह भोगान् भुञ्जानस्य मे गतानि कतिचिद् दिनानि । अन्यदा सागरमित्र-नुन्नेन ध्यातं मया किमहो! निश्चितः सन्नुदरपूरणं करोमि ? द्रव्यार्जनमन्तरा भोगोऽयं विडम्बना-प्रायस्तदेते श्वसुरादयो वृथैव मे धनार्जनान्तरायकारिण इत्येवं मां विलक्षचित्तं दृष्ट्वा बहुलेनोक्तं- "वत्स ! एतत् मदीयं धनादि-सर्वस्वं तवैवाऽस्ति, ततस्तिष्ठ यथासुखं, भोगान् भुङ्क्ष्व कृतं धनार्जन-चिन्तयेति ।" तदा मयोक्तं- "तात ! यद्यप्येवमस्ति तथाप्यहं पृथक् स्वकीयं व्यापारं करिष्ये, इत्युक्त्वा प्रारब्धस्तत्र मया पृथग्-व्यापारः । ततो लोभासक्ततया नष्टा मे धर्मबुद्धिः, दूरं गता दया, पलायितं पापभीरुत्वम्, आदृतानि रस-केश-विष-दन्त-लाक्षादिवाणिज्यानि, प्रवर्त्तितानि च पञ्चदशकर्मादानानि । इत्थं नाना-पाप-व्यापारैरर्जितं दीनार-सहस्रं, जाता तदा द्वे स्वर्णसहस्रे नीवी, पुनः प्रवृद्धः सागरः प्रारब्धानि पाप-बहुल-वाणिज्यानि, वाहिताश्चाऽरघट्टादयः कृतश्चाऽन्त्यजादिषु व्यवसायः । मुक्त्वा भोजनादिस्वादम्, त्यक्त्वा वस्त्रमाल्यालङ्काराद्युपभोगं, विस्मार्य च प्रियास्नेहम्, अगण-यित्वा च श्रमं, दिवानिशं व्यवसाय-व्याकुलः पर्यटामि । एवं कियद्भिर्दिनैर्जातं दीनाराणां सहस्रदशकं, पुनः कियद्भिर्दिनैः कृतं लक्षं, एवं जातानि दश लक्षाणि, तथापि कोटिलाभार्थं प्रेरितः सागरेण, ततः पूरितानि प्रवहणानि, ग्रहीताश्च शौल्किकादयो राजनियोगाः, प्रवर्त्तिता महारम्भमया कुव्यापाराः, इत्थं च पुण्योदय-सहाय-बलाद् दीनारकोटिरपि मेलिता । पुनः सागरेणोक्तं- "अहो ! रत्नराशयो नोपार्जिता चेत् तर्हि किमर्जितं ?" ततः प्रवृद्ध-तृष्णेन मया बहुलं प्रत्युक्तं- "तात ! गच्छाम्यहम् रत्नदीपं, मेलयामि रत्नोत्करान् ।" तच्छ्रुत्वा बहुलेनोक्तं- "वत्स ! अद्यापि कोटीश्वरस्य ते किं न्यूनमस्ति ? यद्-रत्नद्वीपं जिगमिषुरसि ?" मयोक्तं- "तात ! कोटिश्वरत्वेऽपि लक्ष्मी-लाभार्थमुद्यमः कर्त्तव्य एव । यदुक्तं

उद्यमवशा हि लक्ष्मीः, परिहरति निरुद्यमं गुणाढ्यमपि ।
अपि सर्वाङ्ग-सुरूपं क्लीबं व्युत्पन्न-वनितेव ॥ १ ॥ (आर्या)

इत्यादि-वाक्यैस्तं निरुत्तरीकृत्य बलात्कारेण च प्रियामनुज्ञाप्य नाना-क्रयाणकैः

प्रवहणान्यापूर्य्य प्रस्थितो रत्नद्वीपं, सम्प्राप्तश्च कुशलेन, प्रसादितो विविधोपायनैस्तन्नृपो नीलकण्ठनामा, प्रारब्धं चाऽनेकधा-रत्न-वाणिज्यम् ।

## हरिकुमारेण धनशेखरस्य मैत्री

अथैकदा काचिदर्धजरती मद्गृहमागत्य मां प्राह- "अहो धनशेखर ! आनन्दपुरे केशरिनृपस्य जयसुन्दरी-कमलसुन्दरी नाम्न्यौ द्वे राज्ञ्यौ अभवतां, राज्यलोलुपोऽसौ नृपः प्राह- "पुत्रो मां हत्वा मा ग्रहीन्मे राज्यमिति" कुबुद्ध्या जात-मात्रानेव पुत्रान् निहन्ति । एकदाऽऽपन्नसत्त्वा कमलसुन्दरी सुतव्यापादनभीत्या मां वसुमतीं प्रियसखीं सहादाय निशीथे प्रणष्टा दैवाद् विषमाटव्यां पतिता । तत्र श्वापदादि-बूत्कारान् श्रुत्वा भीतया प्रसूतस्तदैव तया पुत्रः । पुत्रप्रसवानन्तरमेव च मृता, ततो दुःखिताऽहं यथाकथंचित् रत्न-करण्डमिव तं सुतमादाय क्रमेणाऽत्राऽऽगत्य कमलसुन्दर्या भ्रातुर्नीलकण्ठनृपस्य पुरः कथितो व्यतिकरः, अर्पितश्च पुत्रः ।

अथ स्वसृ-मरण-श्रवण-दुःखितो नृपः पुनः देवकुमारोपमं भागिनेयं दृष्ट्वा प्रमुदितो हरिरिति नाम कृत्वा तं प्राणाधिक-यत्नेनाऽवर्द्धयत्, साम्प्रतं तारुण्यप्राप्तोऽसौ हरिकुमारस्त्वामानन्दपुरादागतं श्रुत्वा स्वपुरवास्तव्यं मत्वाऽतिप्रणयेन त्वदाकारणाय मां प्रैषीत्, तदेहि त्वरितमिति," तदाकर्ण्य गतोऽहं कुमारसमीपे, तेन बहुमान-पूर्वकं पृष्टाः स्वपुरवार्त्ताः । कथितश्च मया तत्रत्य वृत्तान्तः ।

इत्थं नित्य-परिचयाज्जाता मे कुमारेण सह मैत्री, सोऽपि मां बन्धुत्वेन पश्यति, अथाऽन्यदा मधुसमये मदन्वितो हरिकुमारः प्रिय-वयस्य-गण-परिवृतः क्रीडार्थमुद्यानं प्राप्तः। तत्र यावद् वयं नाना-विनोदावलोकनपराः स्मस्तावदेका वृद्धा तापसी तत्राऽऽयाता साऽऽशीर्दानपूर्वकं चित्र-लिखित-स्त्रीरूपं कुमारस्य हस्ते दत्त्वा क्वापि गता, तच्चित्र-रूपं विलोकयन् कुमारोऽपि चित्रलिखित इव बभूव । तदा मन्मथ-मित्रेणोक्तं- "कुमार ! किमेवमेकतानेन भाव्यते ? कुमारस्त्वाकारगोपनं विधाय तदाक्षिप्तचित्तोऽप्याकूतमनाविष्कुर्वन् अहो ! चित्रकारस्य चातुर्यमित्यादि प्रत्युत्तरं ददौ । ततो मन्मथ-पद्मकेशर-विभ्रम-कपोलादिमित्रैर्नाना-प्रहेलिका-समस्यादिवार्त्तारसै-र्यथाकथञ्चित् तद्विस्मृतिं नीतोऽसौ पुनर्मुहूर्त्तान्तरे चक्रवाकीं विलोक्य स्मृत-तदुरोजसौन्दर्यः क्वापि रतिमनाप्नुवन् सर्वान् सखीन् विसृज्य मां गृहीत्वा एकस्मिन् लता-गृहे सुष्वाप । तत्राऽपि तप्त-सिकता-पतित-मीन-इव विलुठन् मत्कृतशीतोपचारैरपि न क्षणं रतिं लेभे । अथ मन्मथादयोऽपि विनोदात् निलीय स्थिता अभूवन् । तैरपि दृष्टतद्-व्यतिकरैस्तत्रागत्य

सोपहासं कुमार ! श्यामा-सेवनेन ते तापः शाम्यतीत्यादि-चिकित्सोपदेशाऽपदेशेन भूयान् विनोदश्चक्रे । ततः कुमारः सर्वमित्रसमक्षं स्वाभिप्रायमाविष्कृत्य तां तापसीं विलोकयितुं मां प्रेषयामास । अथ यावदहं पुराभिमुखं यामि, तावत् मिलिताद्धमार्गे सा तापसी । मया प्रणम्य चित्रस्वरूपं पृष्टा सा प्राह- ''अद्याऽहं भिक्षार्थं नीलकण्ठनृपौकसि गताऽभूवम्, तत्र शिखरिणीं राज्ञीं चिन्तार्त्ता वीक्ष्य पृष्टं मया चिन्ताकारणं, तदा तयोक्तं- प्राणप्रिया मे मयूरमञ्जरी सुताऽद्य-ग्रहग्रस्तेव हस्तन्यस्तमुखाऽन्यगदृष्टिर्निःश्वासान् सृजन्ती व्यग्रीभूय स्थिताऽस्तीति चिन्तार्त्तास्मि । तदा मया लग्नं विलोक्य भाषितं- यदेतस्या मनसि पुरुषचिन्ताऽस्तीत्याकर्ण्य मत्पादौ प्रणम्य राज्यूचे- ''भगवति ! सत्यमेतद् यतो मयूरमञ्जर्याः प्रियसख्या लीलावत्या उक्तमभूत्-यद् मित्रवृन्दवृतो हरिकुमारोऽनया यत्-प्रभृति दृष्टोऽस्ति, तत्प्रभृत्येवं म्लानवदना विलक्षीभूय स्थिताऽस्ति इति ।'' ततो राज्याऽभ्यर्थिताऽहं मयूरमञ्जर्याः चित्रपटं कृत्वा कुमारस्य दत्त्वाऽगाम् ।

अथाऽगृहीतसङ्केते ! तापस्या मुखात् तद्वृत्तान्तं श्रुत्वा प्रहृष्टोऽहं कुमारान्तिक-मागत्योचिवान् तदश्रद्दधानोऽपि कुमरः शपथादिभिर्मया प्रत्यायितः । किञ्चित् स्वस्थीभूय मित्रगणवृतो गृहं जगाम । अथ राज्ञ्या सुताया अभिलाषो नृपाय ज्ञापितः, नृपेणाऽपि समुचितोऽनयोर्योग इति कृत्वा महामहैर्मयूरमञ्जरी हरिकुमारेणोद्वाहिता । ततो हरिकुमारः पुण्यप्राग्भारोद्भवं मयूरमञ्जर्याः सङ्गं लब्ध्वा नानाविलासान् विलसन्नपि क्षणमात्रं मां न व्यस्मरत् । अहं तु सागर-कुमित्रवशात् अहोऽत्राऽपि वाणिज्यान्तरायकरः कुमारोऽयं मे कुतोऽप्युपस्थितः । अस्य गोष्ठी-वैयग्र्येण न किञ्चित् क्रय-विक्रयादि कर्त्तुं प्रभवामीत्येवं चिन्तयन् शनैः शनैः तदासक्तिं मुक्त्वा स्वकार्यासक्तोऽभवम् । अथाऽहं रत्नान्युपार्ज्योपार्ज्य हृष्यामि, न च कञ्चिद् विश्वसिमि, न च निश्यपि सुखं निद्रामि । इत्थं मेलिता मया नानाजातीयानां रत्नानां समूहाः ।

## यौवन-मैथुनसङ्गेन धनशेखरस्य कामप्रवृत्तयः

अत्राऽन्तरे कर्मपरिणामनृपपत्न्या कालपरीणत्याऽऽदिष्टौ यौवन-मैथुननामानौ द्वौ भटौ मदन्तिकमागतौ, मयाऽपि सत्कारपूर्वकं यौवनाऽऽख्यो देहगेहे निवासितोऽन्यश्च हृदि वासितः। अथ यौवन-मित्रानु भावादहं वक्रं विलोकयामि । मुख-नेत्रविकाररूप-गर्वादीन् करोमि, मैथुनवशाच्च स्त्रीशत-रतेनाऽपि न तुष्यामि । तथा चक्षुरिन्द्रिय-पारवश्याद् यां यां [1]सुरूपस्त्रियं पश्यामि, तां तां रिरंसुर्नानाचेष्टाः करोमि । यद्यपि सागरो

१. स्वरूप- V L1 ॥

वित्तव्ययभयात् मैथुनसङ्गं मां निषेधयति, तथापि तत्स्नेह-परवशोऽहं स्वल्प-द्रविणदानेन बालरण्डा-भिक्षुकी-प्रोषितभर्त्तृकाद्याः स्त्रीर्भजामि । इत्थमकार्यं कुर्वन् लोके लघुतास्पदं जातस्तथापि हरिकुमारबलेन न कोऽपि मां पराभवति ।

अथ समस्तजनपद-प्रख्यात-पराक्रमं महौजसं हरिकुमारं विलोक्याऽन्यदा नीलकण्ठनृपश्चिन्तयाञ्चकार-यदहो! वशीकृतसर्वपौरः प्रवृद्धप्रतापोऽयं हरिकुमारो माम-पुत्रं हत्वा मा ग्रहीत् स्वयं राज्यमिति । ततः सुबुद्धिमन्त्रिणं रहस्याकार्य स्वभावमावेद्य यथाकथञ्चित् मारितव्योऽयमित्यादिदेश । अथ मन्त्री आज्ञा-पारवश्यात् तन्नृपवचस्तथा-ऽस्त्विति प्रतिश्रुत्य गृहमभ्येत्य व्यमृशत् 'अहो ! धिगस्तु राज्यलोभं, यदयं नृपः स्वपालितं पुत्रप्रायं भागिनेयं कृतजामातरं च हरिकुमारमपि निरागसं जिघांसति, महदसमञ्जसमेतत्। यद्यपि लोभान्धो नृपोऽनर्थं न पश्यति तथापि मया रक्षणीयोऽयं कुमार इति ध्यात्वा रहसि नृपस्य दुष्टाशयं कुमाराय न्यवेदयत् । ततो निर्यामिकैः समं मन्त्रयित्वा कनक-रत्नादिभिः प्रवहणान्यापूर्य मयूरमञ्जरीं वसुमतीं च गृहीत्वा कुमारः केनाऽप्यलक्षितो निशीथे पोतमारुह्य स्वदेशं प्रति चचाल ।

## मित्रद्रोहफलं, समुद्रे पतनं, कुप्रवृत्तयः

अथ तदवसरे वाणिज्यलोभाद् गन्तुमनिच्छन्नपि अत्याग्रहात् कुमारेणाहमाकारित एकं रत्नभृतप्रवहणमादाय कुमारेण सह प्रचलितः । पवनगतिपोतारूढा नानाकौतुकान् पश्यन्तो यावद् वयमर्द्धपथमागतास्तावत् सागर-मैथुनाभ्यां प्रेरितेन मया ध्यातं-"अहो ! हरिकुमारस्यैषाऽपरिमिता समृद्धिः, इयं च साक्षात् पौलोमीव मयूरमञ्जरी प्रिया, ततो यद्येनं मारयामि तदा सर्वमप्येतत् मदायत्तं भवतीति कुधिया केनचिच्छलेन महासमुद्रे क्षिप्तो मया कुमारः, समुच्छलितः पोतमध्ये जनकोलाहलः तदैव च मामनर्थकारिणं मत्वा दूरं गतो मे पुण्योदयः, हरिकुमारस्तु स्वपुण्योदयमाहात्म्यात् समुद्रदेवतया गृहीत्वा पुनः पोतमध्ये मुक्तः अहं तु क्षीणपुण्योदयस्तयैवाऽतिकोपेन भृशं ताडयित्वा, क्षमस्वाऽपराधं क्षमस्वाऽपराधमिति हरिकुमारे वदत्येव क्षिप्तोऽहं समुद्रे । हरिकुमारोऽथ कुशलेन स्वल्पदिनैः पयोधि-पारं प्राप्तस्तत्र लोकवार्त्तया पितृमरणं श्रुत्वा, आनन्दपुरे गत्वा, स्वपितृसत्कं राज्यमलञ्चकार । मदीयं रत्नप्रवहणं तेन मत्-पितुर्दत्तं, अहं तु लोल-कल्लोलैर्विक्षिप्यमाणो यादोभिर्भक्ष्यमाणो यातना-शतान्यनुभवन् भवितव्यतावशात् मृतप्रायः सप्तमेऽहनि पारावरपारं प्राप्तः । तत्र शीतलवायु-सम्पर्कात् सचेतनीभूतः क्षुत्-तृड्-पीडित इतस्ततः पर्यटितुं लग्नस्ततः किञ्चिद् वनफलादि भक्षयित्वा शनैः शनैर्भ्रमन्

प्राप्तः किञ्चित् पत्तनं, तावत् मिथ्याऽभिमानेन वशीकृतस्ततो ध्यातं मया कथमेवं दुर्विध इव यामि स्वगेहं श्वशुरालयं वा ? तदत्रैव स्थित्वा पुनर्धनमर्जयित्वा गृहं यास्यामीति पुनः प्रेरितः सागरेण प्रवृत्तो नानाऽर्जनोपायेषु, परं पुण्योदयाभावात् न भवति कुत्राऽप्य-र्थप्राप्तिः । कृषिकरणे भवत्यवृष्टिः, सेवायां यतस्ततः प्रहारजर्जरो भवामि, शकटवाहने म्रियन्ते वृषभाः, एवं यं यमुपायमालम्ब्य प्रवर्त्ते प्रत्युत स सोऽनर्थायैव भवति । तदा दैवमवलम्ब्य स्थितः पदप्रसारिकां कृत्वा, पुनः सागरेणोक्तं- "अहो! किमेवं निश्चिन्त-स्तिष्ठसि ? धनार्थिनस्तु निघ्नन्ति मातृपित्रादीनपि, कुर्वन्त्यकार्य-शतानि । ततो मया गलपाशादिभिर्व्यापादिताः पथिनः, कृतं च नानाप्रकारैः स्तेयं, क्रीडितो द्यूतं, कृतान्येवं कुकर्मशतानि । न प्राप्तस्तथापि काणवराटकः । प्राप्तश्च तत्र वध-बन्धनादि-यातनाः । इत्थं दुःखस्थोऽप्यन्तरान्तरा मैथुन-प्रेरितोऽन्त्यजादि स्त्रीषु चाटुकारान् विदधामि, परं निःस्वत्वात् न कापि स्त्री मामभिलषति ।

## संसारीजीवस्य हिता-ऽहितकारकस्वरूपम् ।

अथैकदाऽऽनन्दपुरोद्याने उत्तमसूरयः समवसृताः, हरिनृपः सपरिकरो वन्दितुं गतो, दत्ता गुरुभिर्धर्मदेशना, ततो देशनाऽन्ते पृष्टं नृपेण- "भगवन् ! अहं धनशेखरेऽति-प्रेमासक्तोभूवं, कथं च तेनाऽहं समुद्रे क्षिप्तः ?" सूरिराह- "धनशेखरस्तु स्वभावेन चारुरेवाऽस्ति, परं सागर-मैथुनाभिध-कुमित्रद्वयवशात् तेनैवमकार्यमनुष्ठितं, यदा च शुद्धचित्तपुराधीश-शुभाशयराजस्य प्रधानता-देव्याः कुक्षि-सम्भवे निर्लोभता-ब्रह्मरति-नाम्न्यौ द्वे कन्ये पाणौ करिष्यति, तदा सागर-मैथुनाभ्यामसौ वियोक्ष्यते ।" इत्यादि श्रुत्वा पुनर्नृपेण पृष्टं- "भगवन्! कथमेवं नानाविधाः प्राणिनो भवन्तीति ?" ततो गुरुराह- "शृणु राजन्! कर्मपरिणामो नृपः, कालपरिणतिश्च तद्-देवी, समस्तमपि विश्वं तयो रेव सन्ततिः । परमविवेकादिप्रधानैर्दृष्टिदोषभिया तयोर्दम्पत्योर्वन्ध्या-निर्बीजत्व-प्रवादः प्रवर्त्तितोऽस्ति । किञ्च एकदा सर्वजनहितकृद् यथार्थवादी सकलवस्तुतत्त्ववेत्ता सिद्धान्त-नामाचार्योऽप्रबुद्धाभिधशिष्येण जीवानां सुख-दुःख-प्राप्तिकारणं पृष्टोऽवोचत्-" शृणु वत्स! अप्रबुद्ध! जीवोऽयं ज्ञानादिशक्ति-कलितश्चित्तवृत्त्यटव्यां स्वभाव-साम्राज्यं भुनक्ति तस्य च चारित्रधर्मनृपो हितकृदस्ति । सात्त्विकमानस-जैनपुरादि-नगराणि तदायत्तानि सन्ति, यतिधर्म-गृहिधर्मनामानौ चारित्रधर्मस्य पुत्रौ, सम्यक्त्व-सद्बोधाभिधौ चाऽमात्यौ, सत्य-सन्तोषादयो भटाश्चैवं सर्वोऽपि चारित्रधर्मपरिच्छदः संसारिजीवस्य हितं वाञ्छति।

अथ तत्र घातिकर्म-विषय-कषायादि-चौरा अपि वसन्ति । तेषु कर्मपरिणाम-

मोहाभिधौ द्वौ लुण्टाकनायकौ स्तस्ताभ्यां विमृष्टमेकदा यदावयोः पराक्रमस्य पुरतः कोऽसौ संसारिजीवः ? कश्च चारित्रधर्म ? इति ततः प्रसह्य संसारिजीवं स्व-स्वभाव-साम्राज्यात् प्रच्याव्य विकलरूपं कृत्वा चित्तवृत्त्यटवीं स्वायत्तीकृत्य राजसचित्तादिपुराणि वासयित्वा महामोहः, स्वयं नृपो जज्ञे । कर्मपरिणामस्तु स्वानुजे न्यस्तराज्यभारः स्वयं भवजन्तुकृत-नृत्यावलोकन-परस्तस्थौ । कर्मपरिणामो हि बलिनः प्रत्यर्थिनो ह्येते इत्याशङ्क्य कदाचित् किञ्चित् संसारिजीवस्य चारित्रधर्मादीनां चाऽनुकूलतया प्रवर्त्ततेऽपि मोहस्तु गर्वाध्मातः स्वदर्पेण विश्वमपि तृणीयन् आत्मानमेव सर्वोपरि मन्यते, एकान्तेन संसारिजीवं पीडयति, चारित्रधर्माद्याँश्च त्रासयति ।

अत्राऽन्तरेऽप्रबुद्धने पृष्टं- "स्वामिन् ! इदानीं संसारिजीवः किंविधोऽस्तीति ?" सिद्धान्ताचार्यः प्राह- "साम्प्रतं त्वसौ परमवैरिणोऽपि मोहादीन् हिततया मन्यते, ये च हिताश्चारित्रधर्मादयस्तान् वैरितया गणयति । तथा सागर-मैथुनासक्तो भवचक्रे भ्रमति। इत्येष सामान्य-प्रकारः ।

## कर्मपरिणामस्य षट्पुत्राः

अथ वत्स ! अप्रबुद्ध ! विशेषप्रकारं, कर्मपरिणामस्य यद्यप्यनन्ताः सुताः सन्ति तथापि षट्पुत्रा जगति प्रसिद्धाः सन्ति । तथाहि- प्रथमो निकृष्टनामा पुत्रः, एकदा कर्म-परिणामेन तस्य राज्यं दत्तं, स तु प्रकृत्या क्रूरः पापात्मा दुर्भगः कुरूपस्त्रिवर्गबहिष्कृतः सर्वथैव शुभाध्यवसाय-वर्जितोऽविदितशुभलेश्योऽविज्ञात-पञ्चविषयसुखः, केवलं भूभारकारी। एवंविधं तं विलोक्य मुदिता मोहादयोऽस्माकं पोषकोऽयमिति । तथा विपक्ष-वशोऽयमिति प्रणष्टाश्चारित्रधर्मादयः, प्रहृष्टा राजस-चित्तादिपुरवास्तव्यपौराः जातानि च शोकसङ्कुलानि सात्त्विकमानसादीनि पुराणि । ततोऽसौ मोहादिभिर्विकली-कृत्य विडम्ब्यमानो राज्ये प्रवेशमप्यनाप्नुवन् रुष्टेन कर्मपरिणाम-नृपेण प्रेषितः पापिष्ठनिवासपुरे, इत्थं 'निकृष्टो' राज्यस्य कुविधिपालनात् परमापदां पदं बभूव । लुब्धक-कैवर्त्त-शौकरिक-वागुरिकादयः क्रूरकर्माणः सर्वजनाधःकृता इहलोके दुःखशताभिभूताः सर्वाधमकर्मकरणात् प्रेत्य नरकगामिनस्तेऽस्य निदर्शनम् ।

अन्यदा कर्मपरिणामेन द्वितीयोऽधम-नामा पुत्रो सोऽपि स्वभावतो निकृष्टसम एव, परं स किञ्चिदर्थ-काम-भोगोपेतः समुपहसति धार्मिकान्, अवगणयति देव-गुरु-धर्मान्, न मन्यते पुण्य पाप-परलोकादीन्, पश्यति च केवलं संसारसुखमेव सारतया । पञ्चेन्द्रिय-पारवश्याद्रमते चाण्डालीप्राया अपि स्त्रियः, सेवते चाऽभक्ष्याऽपेयाऽगम्यादीनि, इत्थं

सोऽपि पूर्ववत्-मोहादीन् पोषयित्वा चारित्रधर्मादींश्च विडम्ब्य स्वराज्यसुखगन्धमप्य-नवाप्य रूष्टकर्मपरीणामनृपादिष्टः पापिष्ठनिवासं प्राप्तः । लोके तु नटविट्द्युतकार-तस्कर-वेश्यादयो बहिर्मुखलोकाः प्रायोऽस्य निदर्शनम् ।

ततस्तृतीयो विमध्यमनामा सूनुः कृतो राजा कर्मपरीणामेन । स तु मोहराजादिषु नित्यासक्तोऽपि कदा कदा चारित्र-धर्मादीनपि सम्भावयति । प्रकृत्या भद्रकः सेवते देवबुद्ध्या सर्वदेवान्, कुरुते च सरलतया दानादीनि, मन्यते च पुण्यपाप-परलोकादीन्, स्पृहयति धर्माय, बिभेति पापात्, तथापि मिथ्यादर्शनमन्त्र्यादि-विप्रतारितोऽसौ स्वभुक्तिभूमिं प्रवेष्टुं नाऽशकत् । इत्थं च सामान्यगुणं तमालोक्य प्रेषयति कर्मपरिणामः कदाचित् पशुसंस्थानपुरे, कदापि मानवावासे, कदापि विबुधालयपुरे, इति लोकेऽपि राजानः क्षत्रिया ब्रह्मणा ये केचना-ऽन्येऽपि प्रकृतिभद्रका धर्मार्थिनोऽप्यप्राप्त-सद्गुरुसंयोगाः अविदित-सर्वज्ञाऽऽगमत-त्त्वलेशाः सद्गुरुयोगेऽपि कुग्रहग्रस्तत्वाद् यथास्थितधर्मादितत्त्वमश्रद्दधानाः सावद्यदान-चान्द्रायणव्रत-होम-यज्ञादिकर्माणि धर्मबुद्ध्याऽऽद्रियन्ते ते प्रायोऽस्य निदर्शनं, ततः कृतः कर्मपरीणामेन चतुर्थपुत्रो मध्यम-नामा नृपः । स च प्रकृत्या हिताहित विवेकज्ञश्चारित्र-धर्मादीन् स्वहितान् विज्ञाय तान् पुरस्कृत्य मोहादीन् वैरिभूतान् मत्वा किञ्चित् पीडयति, ततो जाता म्लानमुखा मोहादयः, किञ्चिदुल्लसिताश्चारित्रधर्मादयः यद्यपि सेवतेऽसौ यथायथं धर्मा-ऽर्थ-कामान् तथापि धर्ममेव बहु मन्यते, जानाति च मोक्षमेव परमार्थं, तथाविधशक्त्यभावेऽपि यथाशक्ति [१]तर्जयति मोहादीन् शनैः शनै-र्दमयतीन्द्रियगणं, कुरुते च कषायादि-विजयम् ।

अथाऽस्त्येकस्तत्र सिद्धान्तनामा महत्तमः समस्तराज्यस्थितिवेत्ता तमापृच्छ्या ऽवधारिता तेन कियती स्वराज्यस्थितिः प्रवृत्तश्च यथावीर्यं तदनुसारेण, इत्थं वशीकृताऽनेन कियती स्वभुक्तिभूमिः । लब्धा च किञ्चित् स्वराज्य-सुखवर्णिका । एवं तस्य मध्यमगुणैः किञ्चित् तुष्टः कर्मपरीणामः प्रेषयति विबुधालयपत्तनं, सम्यग्दृष्टयः श्रावका यथाशक्ति गृहीतव्रताः साधवस्तेऽस्य निदर्शनम् ।

अथ पञ्चम-सुतस्योत्तमाभिधानस्य कर्मपरीणामेन राज्यं दत्तं, स च स्वभावत एव मोहादीनां विध्वंसकः, पक्षपाती चारित्रधर्मादीनां, ज्ञाता हिताऽहितानां, सदोद्युक्तः स्वराज्यवास्युपाये, ततः कम्पिता मोहादि-चरटाः क्षुब्धश्च राजस-चित्तादिपुरवास्तव्यो जनः, जाताः प्रमोदमेदुराश्चारित्र-धर्मादयः, प्रवृत्तः सात्त्विक-मानसपुरादिषु महानुत्सवः।

१. तर्जयति यथाशक्ति L1 ॥

## निर्वृत्तिपुरिगमनमार्गः

अथाऽनेनाऽन्यदा स्वराज्यावास्युपायं पृष्टो यथार्थवादी सिद्धान्तनामा महत्तमः प्राह-[१]महाभाग ! घटत एव भवविरक्तस्य विषयविमुखस्य मोक्षैकतानस्य ते [२]राज्यावाप्त्युपायपृच्छा तदाकर्णय तदुपायं तथाहि आन्तरङ्गराज्यसुखेच्छुना त्वया पूर्वं सेव्याः सद्गुरवः, सम्यगनु-ष्ठेयस्तदुपदेशो, विमर्शनीयः शास्त्रभावार्थोऽनुशीलनीयास्तदुक्त- क्रियाः, कार्यः सत्सङ्गो, हेयश्चाऽसत्सङ्गः, वर्जनीयानि हिंसानृतादत्त-मैथुनानि, विधेयो बाह्याभ्यन्तर-परिग्रह-त्यागः, धारितव्यो यतिवेषो, यापनीयो नवकोटि विशुद्धाहारोप-धिशय्यादिना देहः, प्रतिक्षणं विचिन्त्यः संसारकटुविपाकः, विजेतव्याः पञ्चापि विषयाः, वर्द्धितव्यः स्वाध्याय-सत्य-सन्तोष-तपः-प्रभृतिषूद्योगः, एवं कुर्वतस्ते भविष्यति स्वराज्ये प्रवेशः, ततो गृहीतव्यस्त्वयाऽभ्यासनामाऽन्तरङ्गस्वाङ्गिक-सहायस्तथा चारित्रधर्मसैन्यान् मिलिष्यति अन्योऽपि ते वैराग्यनामा सहायः, ततस्ताभ्यां सहितेन प्रवेष्टव्यं त्वया पूर्व-द्वारेण भूत्वा स्वराज्ये, तत्र च वामभागे महामोहदिसैन्याधारभूतानि ग्राम-नगर-ऽऽकर-पर्वतादीनि सन्ति, दक्षिणदिग्भागेभ्यः चारित्रसैन्यनिवासभूतानि ग्रामादीनि सन्ति । सर्वेषां चैषामा-धारभूता चितवृत्यटव्येव, तस्याः पर्यन्ते पश्चिमदिग्विभागे निर्वृत्तिनाम-पुरी, तत्रगतस्य ते पूर्णराज्यफलं भावि । ततस्त्वयाऽनवरत प्रयाणैश्चरित्रधर्मसैन्यातिवल्लभेन महामोहसैन्याऽसं-स्पृष्टेनौदासीन्य-नाम्ना राजमार्गेण प्रस्थातव्यम्, तत्राऽन्तराले आयास्यत्येकोऽध्यवसायनामा महाहृदः, स च कलुषितः सन् भवति प्रकृत्यैव मोहसैन्य-पोषाय, चारित्रधर्म-सैन्यस्य तु पीडनाय, स्वच्छीभूतस्तु चारित्रधर्म-पोषाय, मोहसैन्यपीडनायेत्यतस्तद्वैशद्यार्थं नियोज्यास्तया मैत्री-मुदिता-करुणोपेक्षाख्याश्चतस्रो देव्यः ततस्ताभी रक्षिते प्रसन्नीभूते च तस्मिन् ह्रदे, पुष्टीभूतेषु च चारित्रधर्मादिषु स्वाङ्गिकनृपेषु, कर्षितेषु महामोहादि-तस्करगणेषु पुनरग्रतो गन्तव्यं त्वया, आयास्यति चाऽग्रतस्ततो महाहृदात् प्रवृत्ता धारणा नाम्नी नदी । सा च स्थिरसुखयानाऽऽसनोपविष्टे-नोल्लङ्घनीयाऽतिवेगगत्या प्रत्याहार [३]सावधानेन त्वया, तदग्रे द्रक्ष्यसि धर्मध्यान-नामकमेकमतिसरलं दण्डोलकं, तेन दण्डोलकेन गच्छन्नग्रतो लप्स्यसे सबीजयोगाख्यं महापथं, तेन भूत्वाऽग्रतो व्रजतस्ते तिरोभविष्यन्ति, मोहादिशत्रवः, प्रबलीभविष्यन्ति चारित्रधर्मादयो हिताः, विशदी-भविष्यति च समस्ता राज्यभूमिः, आयास्यति चाऽग्रे शुक्लध्यानाख्यं दण्डोलकं, तत्र व्रजतस्ते भविष्यति विमल-केवलालोकस्ततोऽग्रे निर्बीजयोगाख्यं महापथं प्राप्य विषमरिपुसमीकरणाय कर्त्तव्यस्त्वया केवलि-

---

१. वत्स ! DL-1 ॥ २. VL1 । वशीकारपृछा-DL2 ॥ ३. सावहितेन L2D ॥

समुद्घाताख्यः प्रयत्नो, निहन्तव्या योगाख्यास्त्रयो दुष्टवेतालास्ततः शैलेशी-नाम्नीं वर्त्तनीमनुसृत्य गन्तव्यं निर्वृतिपुरे, एते सर्वेऽपि व्यतिकरा औदासीन्यनामकं राजपथममुञ्चत एव ते सम्पत्स्यन्ते, अन्यच्च तत्र गच्छता त्वया गृहीतव्या यथावस्थितसकलपदार्थसार्थ-दर्शिका समता-नाम्नी योगनालिका, तन्निवेशितदृष्टेः तव भविष्यति सकलपदार्थज्ञानं, ज्ञास्यसि च प्रतिपदं स्वयमेव यथोचितं कृत्यमित्यादिकां सिद्धान्तोक्तहितशिक्षा-मवधार्योत्तमस्तथैव प्रवर्त्तमानः क्रमेण मोहादि शत्रून् निहत्य कर्मपरीणामं पितरमपि निर्जित्य प्राप्तो निर्वृतिपुरं स्वराज्यसारभूतं, तत्र गतोऽसौ बुभुजे शाश्वतानन्दसुखं विशुद्धसंयमाराधकाः साधवो मोक्षैक-बद्धकक्षा गणधरादयस्तेऽस्य निदर्शनम् ।

अथ षष्ठो वरिष्ठ-नामा कर्मपरीणामपुत्रो राजा जातस्तदागमे जाता हतौजसो मोहाद्याः, प्रकृष्टा-श्चारित्रधर्मादयो यद्यप्युत्तमस्येवाऽस्याऽप्यखिलो वृत्तान्त-स्तथाऽप्ययं विशेषः । यदस्य प्रागेव सिद्धान्तेन सह परिचय आसीत्, तदसौ सिद्धान्तमपृष्ट्वैव सर्वां राज्य-स्थितिमसाधयत्, अन्यच्चैतस्य गुणैराकृष्टा बहिरङ्ग-भूभुजो गणधरनामानः पदातिभावं भजन्ति, तेभ्योऽयमुपकारीति मत्वा सिद्धान्तं निरूपयत्यसौ । अथ ते गणधराः सिद्धान्तमुपलभ्य स्वशक्त्या तदङ्गोपाङ्गानि पुनः समारचयन्ति । इत्थमसौ सिद्धान्तो वस्तुतोऽजरामरोऽपि तदुपदिष्टतया लोके वरिष्ट-गर्भकालात् मति-श्रुता-ऽवधिलक्षण-ज्ञानत्रयकलितः कृतोऽयमिति किंवाऽयं भगवान् ख्यातिं याति किञ्चाजन्मत एवाऽति-शय-चतुष्टयोपेतो लोकोत्तरगुणगणनिधिः सर्वाद्भुतरूपसौभाग्यः सकलसुरासुरेन्द्रा-दिमहितः, व्रतानन्तरमेवोत्पन्नतुर्यज्ञानो घातिकर्माणि घातयित्वा प्राप्तकेवलज्ञानः कर्मक्षयोत्थैरेकादशातिशयैः सुरकृतैश्चैकोन-विंशत्यतिशयैः, अष्टभिः प्रातिहार्यैः प्रकाशितत्रिभुवनसाम्राज्यः पञ्चत्रिंशद्गुणोपेतया योजनगामिन्या सार्वजनीनया वाण्या धर्ममुपदिशन् पावयति स्वविहारेण पृथ्वीतलं, ततोऽसौ भगवान् नाशयित्वा मिथ्यात्व-तमः, कृत्वा च मुक्तिमार्गं सुप्रकाशं, स्थापयित्वा धर्मतीर्थं, पूर्वोक्तक्रमेण निर्वृतिपुरीं प्राप्तो भुञ्जते शाश्वतानन्तस्वसाम्राज्य-सुखमिति । एतन्निदर्शनं त्वतीतानागतवर्तमानकाल-भाविनस्तीर्थंकरा एवेति । अथेत्थं षट् पुरुषदृष्टान्तश्रवणादप्यलब्धपरमार्थोऽप्रबुद्धः सिद्धान्तगुरुणा विचारसहचरं दत्त्वाऽन्तरङ्गपुरेषु प्रेषयित्वा षण्णामपि राज्यस्थितिं साक्षाद् दर्शयित्वा प्रबोधित-स्तदेवं नराधिप ! यथा निकृष्टाऽधमविमध्यमानां दुष्पालितं राज्यं केवलं परमदुःखाय, भवत्, मध्यमस्य पालनाभिमुखत्वात् स्वल्पदुःखाय उत्तम-वरिष्ठयोस्तु सुपालितं सदनन्तसुखायैवाऽभवत् तथा सर्वेषामपि जीवानां स्वराज्यमेव सुपालितं सुखाय, दुष्पालितं च दुःखाय स्यादिदमेव च प्राणिनां नानात्वकारणमित्यादि-

देशनामाकर्ण्य यथाविधि स्वभावराज्य-पालनोन्मुखो हरिनृपः शार्दूलकुमारं राज्ये प्रतिष्ठाप्य, मयूरमञ्जर्यादि-अनेकस्वजनगणसहितो व्रतं जगृहे ।

अथाऽगृहीतसङ्केते ! अहं तु लोभ-मैथुन-परवशो भ्रमन्नन्यदा क्वापि वने गतस्तत्र सप्ररोहं बिल्वतरुमालोक्य धनाशया तद्भुवं खनितुं लग्नस्तावत् तन्मूलात् निर्गतेन भीषण-भुजङ्गेन दष्टस्ततस्तद्भव-वेद्यगुटिकाक्षये अन्यां गुटिकां वितीर्य भवितव्यतया प्रेषितः पापिष्ठनिवासायाः सप्तमपाटके । तत्र महादुःखान्यनुभूय त्रयस्त्रिंशत्-सागराऽन्ते निर्गतः पुनरनन्तं कालं यावदेकेन्द्रियादि पुरेषु भ्रान्तो, भुक्तानि च तत्राऽनन्तानि दुःखानि। पुनः किञ्चित् प्रसन्नतया भवितव्यतया पुण्योदयं दत्त्वा समादिष्टो मनुष्यगतिनगरीं प्रति, तत् तथेति प्रतिपद्य चलितोऽहमपि ।

एवं लोभस्य फलं, मैथुन-नेत्रेन्द्रियादि-सक्तेश्च सम्यक् समीक्ष्य सुधियः प्रयतध्वं तज्जयाय दृढम् ।

इत्युपमिति-कथोद्धारे

लोभ-मैथुन-चक्षुरिन्द्रिय-विपाकवर्णनाख्यस्तूर्योऽधिकारः ॥ ४ ॥

# अथ पञ्चमो अधिकारः

पुनः सदागम-भव्यपुरुष-प्रज्ञाविशालानां समक्षं संसारिजीवोऽगृहितसङ्केतां सम्बोध्य कथयति । अथ शृणु अगृहगीतसङ्केते ! मानवावास-पत्तने साल्हादपुरे जीमूतो राजा, लीलावती च तद्राज्ञी, तस्याः कुक्षौ कर्मरूपगुटिकाप्रयोगेण भवितव्यतयाऽवतारितोऽहं, समये जातः पुण्योदयान्वितः, पित्रा महामहेन कृतं धनवाहन इति मन्नाम । अथ जीमूत-नृपस्य नारदनामा कनिष्ठबन्धुरस्ति, तत्पत्नी पद्मावती, मज्जन्मावसरे तयाऽपि पुत्रो जातस्तस्य चाऽकलङ्क इत्यभिधा चक्रे, एवं आवां द्वावपि भ्रातरौ क्रमेण प्रवर्द्धमानौ जातावष्टवार्षिकौ, कलाचार्यान्तिके शिक्षितौ च शस्त्र-शास्त्रकलाः सकलाः, प्राप्तौ च क्रमेण तारुण्यं, अकलङ्कस्तु लघुकर्मत्वात् प्रकृत्या दयालुः, क्षमा-सत्य-सन्तोषादि-युतः, परोपकारी गुणरागी चेत्येवमनेकगुणान्वितः, अहं तु निःस्नेहो हीनसत्त्वः पर-च्छिद्रापेक्षीत्येवं नाना-दोषाश्रयस्तथाऽप्यकलङ्को मयि निबिडस्नेहं वहति ।

एकदाऽऽवां बुधनन्दनोद्याने क्रीडार्थं गतौ, तत्र मध्याह्ने एकं जिनप्रासादं वीक्ष्य घर्मापनोदर्थं स्थितौ, तत्राऽकलङ्क-साहचर्यात् मयाऽपि जिनदर्शनं कृतं, यावदावां बहि-र्मण्डपमायातौ तावद् दृष्टास्तत्राऽनेके साधवो, विहिताऽष्टमीतिथ्युपवासाः, जिनवन्दनानन्तरं पृथक् पृथक् सिद्धान्त-स्वाध्यायं कुर्वाणाः । अकलङ्कस्तान् विलोक्य, नत्वा चैकस्य साधोः पुरो धर्मश्रवणार्थं स्थितस्ततोऽहमपि अकलङ्कानुरोधात् तत्रोपविष्टः ।

## संसार-अग्नि स्वरूपम्

अथाऽकलङ्केन स साधुः पृष्टः "स्वामिन् ! भवतः किं वैराग्यकारणम् ?, यतस्तारुण्य एव व्रतमनुष्ठितम् ?" तदा मुनिराह- "शृणु कुमार ! मे वैराग्यकारणम् ! अहं लोकोदर-ग्रामवास्तव्यः कुलपुत्रोऽभवं, तत्रैकदा रात्रौ प्रदीपनं लग्नं, प्रकटिताः करालाः ज्वालाः, धूमेनाऽऽच्छादितं समस्तं पुरं, जातो व्याकुलो वास्तव्यजनः, प्रवृत्तः स्त्री-बालकादीनां कोलाहलरवः, पङ्गु-अन्ध-क्लीबादयो दह्यमाना भृशमारटन्ति, मुष्णान्ति चौरा लोकसर्वस्वं, हृष्यन्त्यनेके धूर्त्त-लुण्टाकादयस्तदवसरे प्रबुद्धेनैकेन मान्त्रिकेणात्मीय-वचःशक्त्या चत्वरे मण्डलमेकमालिख्याऽऽहूताः सर्वेऽपि पौराः "अहो ! मण्डल-मेतदाश्रयत, न भविष्यत्यत्र भवतां दाहदुःखलवोऽपीति," तदाकर्ण्य स्तोकाः केचित्

तन्मण्डलं प्रविष्टा, अन्ये तु जातोन्मादा इव मान्त्रिकवचोऽवगणय्य तृण-काष्ठ-घृतादिभिर्वह्निं शमयितुं प्रवृत्ताः । यथा यथा ते शमनोपायं कुर्वन्ति तथा तथाऽधिकं प्रवर्धते, तद्-दृष्ट्वा पुनर्मान्त्रिक आह- "अहो मूढा! जलनिर्वाप्यस्याऽग्नेर्नाऽयं घृतादिसेकः शमनोपाय इति, तथाऽप्युन्मत्ता इव ते मान्त्रिक-वचो निन्दन्तस्तथैव कुर्वन्ति ।

अत्राऽन्तरेऽहमपि भाग्यबलात् मान्त्रिकवचः प्रमाणीकृत्य ज्वलद्गृहं त्यक्त्वा प्रविष्टस्तस्मिन् मण्डले, ततो ये मण्डलमाश्रितास्ते तु न दग्धाः, ये तु मान्त्रिकवचोऽवगण्य बहिःस्थितास्ते सर्वेऽपि भस्मसाद् भूतास्तद्-दृष्ट्वा जातवैराग्येण मया व्रतमाददे । इति तत्-साधुवचःश्रुत्वा लब्ध-परमार्थोऽकलङ्कः प्रमुदितः सन् उत्थायाऽन्यमुनिसमीपं व्रजन्मार्गे मां पप्रच्छ- "मित्र धनवाहन ! त्वया कश्चिदपि भावार्थोऽवधारितो ? मयोक्तमहं तु न कमपि तत्त्वं लब्धवानिति" ततोऽकलङ्कः प्राह- "शृणु मित्र ! संसारोऽयं नगरं, तत्र वास्तव्यजनाः संसारिजीवाः, मोहमयी रात्रि, रागद्वेषपरिणामः प्रदीपनं, तामसभावो धूमः, राजसभावो ज्वालाकलापः, कषाया बालकानि, कुलेश्याः स्त्रियः अविरता ज्ञानहीनसत्त्वाः प्राणिनः पङ्ग्वन्धक्लीबरूपाः, इन्द्रियाणि चौराः सुकृतसर्वस्वं मुष्णान्ति, पाखण्डादयो धूर्त्ताः ।

अथ तीर्थकृन्मान्त्रिकस्तीर्थरूपमण्डलमासूत्र्य देशना-शब्दैर्जनानाकारयति । तत्र केऽपि कल्याण-भाजस्साधु-साध्वी-श्रावक-श्राविका-लक्षणास्तीर्थमण्डलमाश्रित्य दाहमुक्ता भवन्ति, अन्ये तु मोहोन्माद-परवशा रागाग्निं कामभोगादिघृताहूतिभिः सिञ्चन्ति, ते च रागाग्निना भस्मसाद्-भवन्ती" त्येवं श्रुत्वा मयोक्तं "मित्र ! मुनिस्तु वक्रोक्त्या कथयति तत् तु कथमवबुध्यते ?" ततोऽकलङ्केनोक्तं- "भ्रातः! मुनिस्तु सम्यगेवोपादिशत् परं त्वमेवाऽज्ञानबलाद् भावार्थं नाऽज्ञासी" रित्यादिवार्त्तापरौ गतौ द्वितीयमुनेः समीपं, तं नत्वाऽथाऽकलङ्केन पृष्टं तस्याऽपि वैराग्यकारणम् ।

## संसार-मद्यशालावर्णनम् ।

मुनिराह- "शृणु कुमार ! अहं मद्यशालायां मद्यपोऽभवं, ततो ब्राह्मणेन प्रबोधितः सन् वैराग्याद् व्रतमुपेयिवानिति ।" तदाऽकलङ्केनोक्तं-भगवन् ! सविस्तरः कथ्यतामयं व्यतिकरस्ततो मुनिः प्राह- "अस्त्यनन्तमद्यपाकीर्णैका मद्यशाला नानाविधमद्यपूर्णा, तत्र पीतासवा लोकाः केचिद् भूमौ लुठन्ति, केचिद् जिघ्रयाऽपि किमपि लिहन्ति, केचिद् घ्राणेनाऽपि किमप्याजिघ्रन्ति, केचित् चक्षुषाऽपि किमपि पश्यन्ति, केचिच्च श्रोत्रेण शृण्वन्त्यपि, इत्थं केचिदेकमेव विषयं सेवन्ते, केचिच्च द्वौ त्रीन् चतुरो वा, केचिच्च पञ्चापि विषयान् युगपत्सेवन्ते इत्थं ते मद्यविडम्बिताः केचिदङ्गना कण्डे विलगयन्ति

केचिन्नृत्यन्ति केचिच्च हसन्ति, केचित् क्रन्दन्ति, एवं नानाचेष्टाः कुर्वन्ति, तन्मध्येऽहमपि विविधं विचेष्टमानो-ऽभवं, मद्यपारवश्याच्च स्तेय-परदारहरणाद्यनेकानन्यायान् विदधन्, नाना-कष्टकदर्थना अन्वभवम् ।

अन्यदा ब्राह्मणैस्तथाविधं मां करुणापात्रं वीक्ष्य प्रतिबोधो दत्तः, महाप्रयत्नेन प्रतिबोध्य ब्राह्मणः कृतः, क्रमेण च श्रमणो जातोऽद्याऽपि च तन्मद्याजीर्णं मे विद्यत एव, परं गुरूक्तौषधसेवनात् तदपयास्यतीति मे वैराग्यकारणम् ।''

अथेमं वृत्तान्तं मुनिमुखादाकर्ण्य जात-वैराग्योद्रेकोऽकलङ्को जातिस्मृतिमवाप, अहं तु समीपस्थितोऽपि न किञ्चिदपि तत्त्वमवबुद्धः । ततोऽकलङ्केन पृष्टं- ''भ्रातः! धनवाहन! ज्ञातस्त्वया कश्चिद्-भावार्थः ?'' मयोक्तं- ''नाऽहं तु किमपि वेद्मि ।'' ततोऽकलङ्कः प्राह- ''शृणु बन्धो ! संसारोऽयं महती मद्यशाला, तत्राऽनन्ता जीवा मद्यपा, अष्टविध-कर्मसमुदाया मद्याङ्गानि, कषायास्तदासवाः, घाति-कर्मप्रकृतयो मद्यानि, आयुः पात्रं, देहाश्चषकास्ततः पीततन्मद्यास्ते विविधं चेष्टन्ते । एकेन्द्रियादि पञ्चेन्द्रियान्तभवेषु एकादि पञ्चान्तान् विषयान् यथासम्भवं सेवते ।

अथ तत्र त्रयोदशविधा लोका सन्ति । तथाहि-

प्रथमेऽसंव्यवहारसूक्ष्मनिगोदनामानः ॥ १ ॥

द्वितीया व्यवहारबादरनिगोदाख्याः सूक्ष्मवनस्पतिकायाः ॥ २ ॥

तृतीया पृथिव्यप्-तेजो-वायुबादरवनस्पतयः ॥ ३ ॥

चतुर्था द्वीन्द्रियाः ॥ ४ ॥ पञ्चमास्त्रीन्द्रियाः ॥ ५ ॥

षष्ठाश्चतुरिन्द्रियाः ॥ ६ ॥ सप्तमा असञ्ज्ञिपञ्चेन्द्रियाः ॥ ७ ॥

अष्टमा नारकाः ॥ ८ ॥ नवमाः सञ्ज्ञिपञ्चेन्द्रिय-तिर्यञ्चः ॥ ९ ॥

दशमा मनुष्याः ॥ १० ॥ एकादशाश्चतुर्निकायदेवाः ॥ ११ ॥

द्वादशा ब्राह्मणाः साधव इत्यर्थः ॥ १२ ॥

त्रयोदशास्तुत्यक्तमद्याः सिद्धजीवाः ॥ १३ ॥

तत्राऽयं साधुः प्रथमलोकमध्येऽनन्तानन्तं कालमुशित्वा भवितव्यता-वशात् ततो निर्गत्य दशसु भेदेषु बहुधा विडम्बनामनुभूयाऽनन्तेन कालेन ततो निर्गत्य द्वादशभेदं चारित्राध्यवसायं प्राप्तस्ततः साधुभिः संसाररूपमद्यशाला-स्वरूपं सम्यक् प्रबोध्य दीक्षितः, शमौषधसेवनाद् घातिकर्मशेषलक्षणं मद्याजीर्णमपनेष्यतीति भावार्थः। शृणु अगृहीतसङ्केते ! इत्थं जातिस्मृतिवशात् लब्धतात्पर्यार्थेनाऽकलङ्केनाऽहं सम्यक् बोधितोऽपि

न किञ्चिच्छ्रद्दधौ, पुनर्गता तृतीयमुनिसमीपं, तमपि प्रणम्याऽपृच्छदकलङ्को वैराग्यकारणम्।

## संसार-अरघट्टदर्शनम् ।

मुनिरुवाच- "अरघट्टदर्शनमेव वैराग्यकारणमिति" पुनरकलङ्केन भावार्थे पृष्टे मुनिराह- "शृणु कुमार ! संसारोऽयमरघट्टस्तत्र राग-द्वेष-मनोभाव-मिथ्यात्वाऽभिधाश्चत्वारः कर्षकाः महामोहाख्यः स्वयं कृषिकपतिः । अथ तमरघट्टं घास-पानीयाद्यनपेक्षाः कषायलक्षणाः षोडश बलीवर्दा नित्यं वहन्ति । हास्य-शोक-भयाद्याः कर्मकराः रत्यरत्याद्याश्च कर्मकार्यः, अविरति-जलपूर्णोऽसंयतजीवितव्यरूपः कूपो, जीवलोको घटीयन्त्रं, दुष्टयोग-प्रमादाभिधे द्वे तुम्बे, विलास-विभ्रमाद्या अरकाः, मरणाख्यै-र्घटीसङ्घट्टखाट्कारैरेष दूरादपि विवेकिभिर्वहन् विभाव्यते । मिथ्याभिमानाख्यं चाऽत्र दार्वटिकं आत्मनोऽज्ञान-मलिनता सा जलग्राहिणी प्रणालिका । सङ्क्लिष्ट-चित्तरूपः खालः, भोगलालसा कुल्या, जन्मान्तराणि केदारपरम्परा । तत्र जीवपरि-णामाख्यो वप्ता, कर्म-बीजानि वपति तान्यसद्ज्ञानाख्यः कर्मकरः पाययति, ततो दुःखरूपं शस्यं निष्पद्यते । अथैवंविधे क्षेत्रेऽहं सुप्तोऽभूवं, ततोऽनेन सूर्यप्रतिमेन मद्गुरुणा प्रबोध्य भाषितो 'यदहोऽनभिज्ञत्वमेवैतत् क्षेत्रोद्भवस्य दुःखरूपधान्यफलस्य भोक्ता भविष्यसि। ततः सावधानीभूय त्यज शीघ्रमस्यारघट्टस्य स्वामित्वं,' ततो जातवैराग्येण मया तन्ममत्व-मुन्मुच्य व्रतमाददे," इत्याकर्ण्याहं तु शून्यचित्त एवाऽऽसम् । अकलङ्कस्तु परमवैराग्यमापन्नः ।

## संसार-मठस्य वर्णनम् ।

पुनश्चतुर्थसाधुं नत्वा पृष्टं तद्वैराग्यकारणम् । साधुरुवाच- "एकस्मिन् मठे छात्रा वसन्ति, अहमपि तत्र वसन्नभूवम्। अन्यदा मत्कुटुम्बभूतं मनुष्यपञ्चकं तत्राऽऽयातं, तत् तु साक्षात् वैरिभूतमपि मया हितकृदेव-गणितम्, एकदा तेन कुटुम्बेन साग्रहं सर्वे छात्रा भोजनं कारितास्तद्भोजनवशाद् वयं सर्वेऽपि जाताश्चैतन्यविकलाः प्रवृत्ताश्च नानाकुचेष्टाः कर्त्तुं प्रवृद्धः सन्निपातः, प्रकटिताश्च घर्घरगलरोधतापादयः । ततो भवितव्यता-बलेन तथाविध दुरवस्थो दृष्टोऽहमनेन महात्मना मद्गुरुणा भेषजदानेन सज्जीकृतश्च । पुनर्भाषितं च- 'यथैते वराका विषान्न-भोजनात् सर्वे कष्टमनुभवन्ति तथा त्वमप्यभूः, परं मया भेषजबलेन सावधानः कृतोऽसि, ततोऽद्य प्रभृति नैतत्कुटुम्बं विश्वसीः । अद्यापि किञ्चिदजीर्णजन्यः सन्निपातोऽस्ति, ततो मदुक्त-भेषजं सेवस्वेति' गुरुवचसा वैराग्याद् व्रतमाश्रितोऽहमिति एवं साधुमुखादाकर्ण्याऽकलङ्को मां प्रति भावार्थमाह- "संसारोऽयं मठः, तत्र लोह-शलाका इवाऽन्योऽन्य-सम्बद्धाः सर्वे जीवाश्छात्राः । प्रमादाऽविरति-

मिथ्यात्व-कषाय-योगाभिध-पञ्चमानुषाणि कुटुम्बं, यद्यप्येतद्वैरिभूतं तथापि मोहवशाज्जीवा हिततया मन्यन्ते, तद्वत्तेन कर्मरूपभोजनेन स्वभाव-विकलीकृता अनभिग्रह-मिथ्यात्व-सन्निपाताभिभूता एकेन्द्रियादिषु विविधं विचेष्टन्ते । केचिच्च दुष्टाभिनिवेशोन्माद-पीडिताः उत्सूत्रप्ररूपणरूपघर्घरादिभिर्विडम्ब्यन्ते, तदेवंविधोऽयं भवितव्यता-वशाद् गुरुणा वैद्येन सम्यक्त्व-भैषजप्रयोगेण सचेतनीकृतः, भाषितं च सर्वप्राणिनां कर्मोन्मादस्वरूपं, दत्तं च कर्माऽजीर्णाऽपोहनं संयमभेषजमिति तदकलङ्कोक्तं भावार्थं श्रुत्वा न किञ्चिदप्यहमवाधारयम्,

## सोपनया चतुर्वणिक्-कथा ।

ततः पञ्चमस्य मुनेः पुरो गत्वा प्रणम्य पुनरकलङ्केन पृष्टं तद्-वैराग्यनिदानम् । स मुनिः प्राह-"शृणु नृपात्मज ! गुरूक्तां नाना-निदर्शनमयी-कथामाकर्ण्य प्राप्तवैराग्येण मया व्रतं गृहीतं, त्वमप्याकर्णय तां कथां तथाहि- वसन्तपुर-वास्तव्याः चारु-योग्य-हितज्ञ-मूढनामानश्चत्वारो वणिजः सुदुस्तरं समुद्रमुल्लङ्घ्य रत्नार्जनार्थं रत्नद्वीपं प्राप्ताः। तत्र चारुः स्वयं रत्नपरीक्षा-निष्णातः सन्ततोद्योगयोगादर्जयन् भूयांसि बहुमूल्य-रत्नान्युपार्जयत् योग्यस्तु रत्नपरीक्षां जानन्नपि क्रीडाविनोदासक्तत्वात् बहुकालक्षेपेन स्तोकरत्नान्यर्जितवान्, हितज्ञस्तु स्वयं परीक्षां न जानाति क्रीडाद्यासक्तः स्वल्पोद्यमं च कुरुते, इत्थमसौ परीक्षामजानन् धूर्त्तादिभिः विप्रतारितः कांश्चित् काचमणीन् रत्नबुद्ध्याऽमेलयत् । मूढस्तु परीक्षां न वेत्ति, न च व्यवसायोद्यमं कुरुते, केवलं धूर्त्तादिभिः सम्भूय कालक्षेपमेवाऽकरोत् ।

अथ चारुः स्वल्पकालेन बहुरत्नान्यर्जयित्वा महानन्दपत्तने गत्वा महासौख्यमनु बभूव। योग्योऽपि चारुणा हितशिक्षां दत्त्वा रत्नार्जनाय प्रेरितः, कौतुकाद्यासक्तिं मुक्त्वा पुनर्विहितार्जनोद्योगः। कियता कालेनाऽर्जितरत्नसम्भारो महानन्दपत्तने गत्वा सुखं बुभुजे। हितज्ञस्तु बहुकालं यावत् काचमणीन् सङ्गृह्य सङ्गृह्याऽपि निदाने काचस्वरूपे ज्ञातेऽकृतकृत्यतया विषण्णः सन् चारुणा कथञ्चिद् रत्नपरीक्षां शिक्षितः। पुनर्महोद्यमेन रत्नार्जनं कृत्वा महानन्दपुरं प्राप। मूढस्तु धूर्त्तादिसङ्गाऽऽसक्तत्वेन चारुशिक्षामकृत्वा नानाऽकार्याणि कुर्वन् तत्रत्य नृपेण विडम्बना-पूर्वकं क्षिप्तोऽपारसागरे सुचिरं दुःखभाग् बभूव ।

इत्येतां साधूक्तां कथामाकर्ण्याऽकलङ्को मां प्रत्याह- शृणु बन्धो धनवाहन ! अस्या भावार्थ- सूक्ष्मनिगोदो वसन्तपुरं, तत्र चित्र-भवितव्यतया कृतयथार्थ-नामानश्चतुर्विध-जीवास्ते चत्वारो वणिजः संसारविस्तरोऽपारपारावारः, नरभवो रत्नद्वीपः, विषयाः कौतुकस्थानीयाः धूर्त्ताः कुतीर्थिनः, कुधर्माश्च काचमणयः । तत्त्वज्ञानं रत्नपरीक्षा, ज्ञान-

दर्शन-चारित्रादीनि रत्नानि, जिनोक्तधर्मः प्रवहणं, मुक्तिर्महानन्दपुरं, कर्मपरिणामो नृपः। ततश्चारुस्थानीयाः साधवस्तत्त्व-ज्ञानेन ज्ञानाद्यर्जयित्वा जिनधर्माश्रयात् मुक्तिं लभन्ते । तथा योग्यस्थानीयाः श्रावका विषयप्रमादाद्यासक्ता अपि साधु-वचसा तत्त्वज्ञानमवाप्य तदासङ्गं हित्वा ज्ञानाद्यर्जयित्वा कालेन महानन्दमप्याप्नुवन्ति । ये च प्रकृति-भद्रकास्ते तु हितज्ञस्थानीयाः विषयाद्यासक्ताः कदाचित् कथञ्चिद् विहित-धर्मोद्यमा अपि कुतीर्थविप्रतारिता सत्यज्ञान-विकला कुधर्ममर्जयित्वाऽप्यकृतकृत्याः पुनः कदाचिदपि साधुवचसा तत्त्वज्ञानमवाप्य भूयसा कालेन स्वार्थं साधयन्ति । ये चाऽभव्या दूरभव्याश्च ते तु मूढस्थानीयाः केवलं विषयाद्यासक्ता व्यसनाद्यधीनतया-ऽकार्यशतानि कुर्वन्ति, हितोपदेष्टारं च द्विष्यन्ति, ते पुनः कर्मपरिणामनृपेण दुस्तरे संसारसागरे क्षिप्यन्ते। यद्यप्येषां कदाचित् कथञ्चिद् द्रव्यसाधुत्वं द्रव्यश्रावकत्वं वा सम्पद्यते तथापि तत्त्वाऽश्रद्धानात् केवलं भवाभिनन्दित्वाच्च मोक्षरूप-पुरुषार्थं न साधयन्तीति'' भावार्थं श्रुत्वा किञ्चिल्लब्ध-परमार्थोऽहं क्षणमात्रं तदास्वादमास्वाद्य पुनः शून्यचित्त इवाऽतिष्ठम् ।

## संसार-हट्टश्रेणिस्वरूपम्

ततो गतावावां षष्ठमुनिपार्श्वे, प्रणम्याऽकलङ्केन पृष्टं तद्वैराग्यकारणं, मुनिनोक्तं- ''हट्टश्रेणिदर्शनं मे वैराग्यकारणम् ।'' पुनरकलङ्केन भावार्थं पृष्टः स प्राह- ''शृणु महाभाग ! संसारनगरे जन्म-परम्परा-हट्टश्रेणिस्तत्र भवजन्तवो वणिजः, सुख-दुःखभेद-भिन्नानि नाना-क्रयाणकानि पुण्य-पाप रूप-निष्क्रयाभ्यां क्रमाल्लभ्यन्ते । इत्थं क्रयं विक्रयं च कुर्वन्तः केचिल्लाभमर्जयन्ति, केचिच्च नीवीं धारयन्ति, केचिच्च प्रत्युत नीवीमपि हारयन्ति। तत्र पुरे महामोहो दुर्गपालः काम-कोपाद्याश्च तत्सेवकास्तेऽकारण-मपि लोकान् विडम्बयन्ति । अहमपि तत्र वणिगभवम्, एकदाऽनेन मद्गुरुणा सम्यक्त्व-योगाञ्जनप्रयोगेण मार्गं प्रदर्श्य नीतोऽहं स्वमठे, ज्ञापितं च हट्टश्रेण्या असारत्वं, ततोऽनन्तसुखास्पदशिवालय-वर्णिकां दीक्षां दत्त्वा पञ्चेन्द्रियरूप-गवाक्ष-पञ्चकोपेत-देहाऽपवरकमध्ये मनोमर्कटं मे दर्शितं, पुनरनेनोक्तोऽहं- 'वत्स ! एतन्मर्कटं त्वया यत्नेन रक्षणीयं सुरक्षितमेतत् तव महानन्दाय भविष्यति, ततो यथैतत्-कषाय-मूषकैर्न दृश्यते, नोकषायरूपैर्वृश्चिकैर्नोत्पीड्यते, आहार-संज्ञादि-मार्जारीभिर्न पराभूयते, राग-द्वेषाभ्यां कोलोंदुराभ्यां नोपद्रूयते, महामोहरूप-वन-बिडालेन न भक्ष्यते, परीषहरूप-दंशमसकैर्न तुद्यते, दुष्टाभिप्रायादिमत्कुणैर्न व्यध्यते, चिन्तारूपगृहगोधादिभिर्न व्याकुलीक्रियते, प्रमादशरटैर्नाभिभूयते, अविरतिरूप-षट्पदीभिर्न विडम्ब्यते, यथा च मिथ्यात्वतमसा नाऽन्धीक्रियते तथा रक्षितव्यं, यतः पूर्वोक्तोपद्रवैरुपद्रुतं सद् एतद् वेदना-व्याकुलं

पञ्चेन्द्रियरूप-गवाक्ष-द्वारा निर्गत्य रौद्रध्यानरूपाऽग्निकुण्डे, आर्त्तध्यानरूप-महाऽवटे वा निपतति, अन्यच्चाऽस्य देहापवरकस्य पञ्चष्विन्द्रियगवाक्षद्वारेष्वेकैको विषयरूप विषयवृक्षोऽस्ति, ततो यदा यदा तं विषयवृक्षमाजिघ्रति, पश्यति, आस्वादयति, स्पृशति, स्मरति वा तदा तदा एतत् तद्विषमूर्च्छितं महापदं लभते, तत् तेभ्यो विषयवृक्षेभ्यो दूर एव रक्षणीयमिति ।''

अत्राऽन्तरालेऽकलङ्केनोक्तं- ''स्वामिन् ! सुष्ठु निवेदितमेतन्मनोमर्कटरक्षणं यतो भवान्तरे ममाऽपीत्थमेव गुरुभिर्मनोमर्कटरक्षणं निवेदितमभवदिति'' उक्त्वा जातिस्मृति-स्मृतः पूर्वाभ्यस्त-चारित्रमार्गः सर्वोऽपि मुनेः पुरः प्रकाशितः, मुनिनाऽपीत्थमेवैतदिति प्रमाणीकृत्य पुनरुक्तं- ''शृणु महाभाग! यत् पुनरपि मद्गुरुणोक्तं-तथाहि-देहापवरकेऽस्मिन् कृष्ण-नील-कापोताख्या-स्तिस्रो दास्यः सन्ति, तास्तु मनोमर्कटस्य दुःखादायिन्यः सन्ति, यद्यस्यैताः परिचारिकाः क्रियन्ते तदा त्वेतन्मर्कटं सर्वोपद्रवास्पदं भवति, तथा तेजः-पद्म-शुक्ललेश्याख्यास्तिस्रस्त्वेतस्य हितकारिण्यः सन्ति, तदेता एवास्य रक्षणे नियोक्तव्याः ।

## मनोमर्कट रक्षणोपायाः ।

अथैताभिरेव शिवालयमठाधिरोहाऽर्थं देहापवरके परिणामनामा एको दर्दरः कृतोऽस्ति, तदुपर्येताभिरेवाऽध्यवसायस्थानकाऽभिधान्यसङ्ख्यानि सोपानफलकानि कृतानि सन्ति । ततः प्रथम-लेश्या-त्रयकृतसोपान-श्रेणीमधिरोहतोऽस्य मर्कटस्य विविधोपद्रवाः पराभवन्ति । तदुपरि च तेजोलेश्यादिकृतसोपानक-पङ्क्तौ यथा यथोद्र्ध्वमारोहति तथा तथा निविर्त्ततेऽस्य विषयविषावेग-चापल्यं, क्षीयते च सर्वेऽप्युद्रवाः । धर्मध्यानरूप शीताऽनिलस्पर्शात्तनूभवन्ति, पूर्वोत्पन्नाः कर्मरोगाः । पुनस्तत्र शम-दम-सन्तोष-संयम-सद्बोधादि-वानर-शोभितं, धृति-श्रद्धा-सुखासिका-विविदिषा-विज्ञप्ति-स्मृति-बुद्धि-क्षमादि-वानरीभिः कलितं, धैर्य-वीर्य-शौर्य-गाम्भीर्य-ज्ञान-दर्शन-तपः-सत्याद्यनेकलघुमर्कटाकीर्णं, विशुद्ध-धर्माख्येनैकेन महावानरेण सुरक्षितं महदेकं वानर-यूथं सङ्गच्छति। तेन संङ्गतमेतन्मनोमर्कटमपि त्यक्तोपद्रवं शुक्लध्यान- रूप-चन्दनच्छटाभिरपगत-कर्मरोगं सुखेनोच्चैः सोपानमधिरोहति । तदेवमुक्तमार्गेण मनोमर्कटे यत्नेनोच्चैः पदं प्रापिते तेन सह त्वमपि तत्स्थानमारोक्ष्यसि । ततो मनोमर्कटं तद्वानरयूथं च तत्रैवोन्मुच्य शैलेशीकरणाख्योत्पातेनोत्प्लुत्याऽऽनन्तानन्दमयं शिवालय-मठं व्रजेरिति गुरूक्तमार्गेण साम्प्रतं मनोमर्कटरक्षणं करोमीति'' श्रुत्वाऽकलङ्केनानुग्रह-बुद्ध्या सम्यक् तद्भावार्थं प्रबोधितोऽहम् ।

## संसारिजीवपार्श्वे सदागमस्य आगमनम् ।

अथाऽत्राऽन्तरे यदभूत् तदुपयोगं दत्त्वाऽऽकर्णयाऽगृहीतसङ्केते ! पूर्वं वामदेवभवे बुधसूरिचरित्रमध्ये धिषणाङ्गजेन विचारेणोक्तमभूत् यत् संयमघातनवैराच्चारित्रधर्म-मोहराजयोर्युद्धं बभूव। ततो मोहराजेन पराभूतश्चारित्रधर्म पलाय्य जैनपुरं प्रविष्ट इति। तदनु स्वपराजयदुःखितेन चारित्रधर्मेण सद्बोधमन्त्री कर्त्तव्योपायं पृष्टः सन्नुवाच- "स्वामिन् ! न कश्चिद् विषादो विधेयो, यतः संसारिजीवोऽस्माकं स्वामी स यावदस्माकं दूरे भविता तावदेव वयं रिपुभिः पीड्यामहे । किञ्चेदानीं तु चित्तवृत्त्यटवी मनाक् स्वच्छावलोक्यते, ततो जानेऽहं सोऽस्मत्-स्वामीनः समीपे भविष्यति, ततः कर्मपरिणाम-नृपमापृच्छ्य कश्चिन्मनुष्यस्तदन्तिके प्रेष्यते यतस्तस्य बहुशो गतागतादि-परिचयेन सोऽस्मान् सम्यगुपलक्षिष्यति[1]" इति सद्बोधवचोऽङ्गीकृत्य चारित्रधर्मेणोक्तं- "मन्त्रिन् ! सम्यग्दर्शन-महत्तमः सदागमश्चैतौ द्वौ सन्नीतिनिपुणौ तत्समीपे प्रहीयते ।" तदा पुनः सद्बोधेनाभिहितं- "स्वामिन्निदानीं नाऽवसरः सम्यग्दर्शनस्य, ततः पूर्वं सदागमः प्रहीयते, यदा चाऽसौ सदागम-वचसाऽस्मद्विषये रागवान् भवति तदनन्तरं समये सम्यक्त्व-महत्तमोऽपि प्रेषितव्यस्तदिदानीं तु सदागम एव तत्र प्रेषणोचित इति कृत्वा कर्मपरिणाममापृच्छ्य मां धनवाहन-भवस्थितं मत्वा सदागमो मदन्तिकं प्रेषितः । तदा सदागमः समागत्य मदन्तिके स्थितः ।

अथ शृणु भद्रे! सदागमस्य सान्निध्यानुभावात् तत्-षष्ठ-साधूक्तवार्तामाकर्ण्याऽकल-ङ्कोक्तं भावार्थं च सम्यगवबुध्य प्राप्तं मया श्रुतज्ञानं, जातश्चाऽऽह्लादमयः । ततोऽकलङ्को मां सदागमाश्रितं मत्वा प्रहृष्टः पुनः सर्वसाधुनायकं कोविदसूरिनामानं सप्तमं महानुभावं प्रणम्य धर्मं पप्रच्छ, गुरुणा सविस्तरं धर्मस्वरूपं कथितं, तच्छ्रुत्वाऽकलङ्केन मां प्रत्युक्तं- "भ्रातः ! धनवाहन ! अस्य महानुभावस्य समीपे सदागमः सामस्त्येन परिवसति, ततो यद्येतन्मुखात् किञ्चिदपि श्रुताभ्यासं कुर्यास्तदाऽहं हृष्यामीत्यकलङ्कानुरोधात् पठितं मया किञ्चिन्नमस्कारादि-श्रुतं, क्रमेण किञ्चिद् द्रव्यश्रावकमार्गाभिज्ञोऽपि जातः । अकलङ्कस्तु जातिस्मृत्या प्राप्तपरमवैराग्यः पितरावनुज्ञाप्य श्रीकोविदसूरिसन्निधौ संयममाददे ।

## संसारिजीवपार्श्वे मोहपरिग्रहागमनम्

अथ सदागमाधिष्ठितं मां वीक्ष्य क्षुब्धो ज्ञानावरणनृपो महामोहसमीपे गत्वा भवजन्तुः सदागमेन सह मिलितोऽस्तीत्यादि-वार्त्तां न्यवेदयत्, तदाकर्ण्य क्रुद्धो मोहराजः जाताश्च रागद्वेषादि-तस्सैनिका रोषातुराः । अथ मोहराजो रणोद्यतान् सर्वसैनिकान् निवार्य स्वपौत्रं

१. लक्षयति-D L1.

रागकेशरि-सुतं सागरस्यानुजं परिग्रहनामानं सहादाय स्वयं मम पार्श्वे आजगाम । मयाऽपि तौ पूर्वपरिचयादतिस्नेहास्पदीकृत्य रक्षितौ ।

अत्राऽन्तरे मत्-पिता जीमूतनृपः परलोकं ययौ, ततस्तस्यौद्ध्र्वदेहिकं विधाय जातोऽहं नृपः, प्रवर्त्तिता स्वाज्ञा । अथ सदागमो मां प्रति ''अनित्यमेतत् सर्वं पौद्गलिकं धन-यौवन-राज्यादिकं क्षण-क्षयित्वात् नाऽत्र मोहः कार्य'' इत्यादिशति । मोहस्तु ''भुङ्क्ष्व विषयान् मनोऽभीष्टान्, केन दृष्टः परलोकः ? क्व सन्ति पुण्यपापादीनि ? यदाहुश्चार्वाकाः-

पिब खाद च चारुलोचने !, यदतीतं वरगात्रि ! तन्न ते ।
न हि भीरु ! गतं निवर्त्तते, समुदयमात्रमिदं कलेवरम् ॥ १ ॥ [ ]
तथा आलिङ्गनं भुञ्ज निपीडत बाहुमूलं,
भुग्नोन्नतस्तनमनोहरमायताक्ष्याः
भिक्षोपवास-नियमार्कमरीचिदाहै
र्देहोपशोषणविधिः कुधिया क्व वैषः ? ॥ १ ॥ [ ]''

इति नास्तिकमते प्रेरयति । तथा परिग्रहोऽपि कोशादिवृद्ध्यर्थं प्रेरयति, इत्थं तेषां त्रयाणामपि पृथक् पृथक् वाक्यानि आकार्ण्याऽति-परिचयवशात् मोह-परिग्रहयोर्वचः प्रमाणीकृत्य सदागमवचोऽवाजीगणम् । ततः प्रभृति मुक्तं मया नमस्कार जाप-देवार्चादि-सुकृतानुष्ठानम् ।

ततः पुनर्ज्ञानावरणनृपोऽप्यागत्य मामाश्रितः, सदागमस्तु कुमित्रासक्तं मामयोग्यं मत्त्वा दूरं गतः, ततः सुपात्रदान-सङ्घार्चा-साधर्मिकवात्सल्यादि सर्वं परित्यज्य केवलमर्थ-कामलुब्धोऽभूवम् । अन्यदाऽकलङ्कादि-बहुशिष्यपरिवृताः श्रीकोविदसूरयस्तत्राऽऽजग्मुः । अकलङ्क-दाक्षिण्यादहं वन्दनार्थं गतस्ततो मां मोह-परिग्रहासक्तं त्यक्तसदागमं वीक्ष्याऽ-कलङ्केन मत्प्रतिबोधार्थं प्रेरिता गुरुवो, देशनायां स्वचरित्रकथनेन सदागमं वर्णयाञ्चक्रुः ।

## कोविदसूरि-आत्मकथा, सदागमस्वरूपम् ।

तथाहि- भूतलनगरे मलनिचयो नाम राजा, तस्य मलानुभूतिः पत्नी, तयोः कोविद-बालिशौ द्वौ पुत्रौ, तन्मध्ये कोविदस्तु जातिस्मृति-बलात् पूर्वपरिचितं सदागमं समुपलक्ष्य परमाभीष्टबुद्ध्या सेवते, बालिशायाऽपि सदागम-गुणान् कथयति परं स न मन्यते । अथाऽनयोः कर्मपरिणामनृपेण पूर्वजन्मनि श्रुतिनाम्नी कन्या परिणायिताऽभूत् साऽन्यदा सङ्गदासाऽन्विता प्रेषिता, ताभ्यां च स्वदेह-नामपर्वतस्य मस्तकाख्यशिखरस्थिताऽपव-रक-द्वयमध्ये रक्षिता । सङ्गदासस्तु कोविदेन सदागमवाक्यादधमोऽयमिति ज्ञात्वा

दूरीकृतो, बालिशेन तु रक्षितः, ततः कोविदः शुभाशुभेषु शब्देषु तोषं द्वेषं वा न धत्ते, बालिशस्तु सङ्गदास समनुन्नोऽनिष्टशब्दं द्वेष्टि, इष्टशब्दे प्रीतिं याति ।

## श्रुतिपरवशस्य धनवाहनस्य दुर्दशा, अकलङ्कमुनेः निष्फलाः प्रतिबोधनप्रयत्नाः।

एकदा तुङ्गशिखराख्यबाह्यगिरौ कोविद-बालिशौ क्रीडार्थं गतौ, तत्रैकस्यां गुहायां किन्नरमिथुनगानमाकर्ण्य श्रुतिपरवशात् कोविदेन निषिद्धोऽपि बालिशस्तच्छ्रवणार्थं गुहायां प्रविष्टः। ततो मर्मावलोकन-कोपाद् रुष्टेन किन्नरेण हतो बालिशः, तद्-दृष्ट्वा प्राप्तवैराग्येन कोविदेन सदागममापृच्छ्य संयमं जगृहे । शृणु धनवाहननरेश ! सोऽहं कोविदः सदागमसेवनात् प्राप्तः स्व-स्वभावजं परमशर्म, ततोऽन्येनाऽपि सुखैषिणा सदागमसेवापरेण भाव्यमित्यादि-गुरुवचनादकलङ्कानुराधोच्च पुनरधीतं मया चैत्य-वन्दनादिकं किञ्चिच्छ्रुतम् । आदृता काचिद् द्रव्यश्रावकक्रिया, इत्थं मां मार्गे स्थापयित्वा अकलङ्कादिमुनिकलिताः सूरयोऽन्यत्र विजह्रुः । कियद् दिनान्तरे पुनरपि मोह-परिग्रह-नुन्नेन त्यक्तो मया सदागमः, परिणीतानि स्त्रीणां शतानि, प्रवर्त्तितानि राज्यवृद्धि-तृष्णया महापापानि। दैवादत्राऽन्तरे मम प्राणेभ्योऽतिवल्लभा मदनमञ्जरी पट्टराज्ञी मृता, ततो मोहराजभटेन शोकनाम्नाऽऽक्रान्तोऽहं, तद्वशाच्छिरोघात-रुदन-विलापादिकर्त्तुं प्रवृत्तः । परिहृतखान-पाना-ऽलङ्कारादिपरिभोगो निःश्वासैरेव दिनानि गमयामि ।

अथैवं मां शोकाक्रान्तं श्रुत्वाऽकलङ्कमुनि-र्गुरुमापृच्छ्य मत्प्रतिबोधायाऽऽगत-स्तेनाऽनित्य-भावनामया नानोपदेशा दत्ताः, परं तेऽन्धदीप-न्यायाद् विफलीभूताः, पुनस्ते-नोक्तं- "हे धनवाहन ! मरणं प्रकृतिः शरीरिणां, विकृतिर्जीवनमुच्यते बुधैः । क्षणमप्य-वतिष्ठन्ते श्वसन् यदिजन्तुर्ननु लाभवानसौ ॥ १ ॥ तन्न युक्तमनित्यवस्तुनि शोककरणं इत्याद्यनेकोपदेशश्रवणात् मन्दीकृतो मया शोकः, किञ्चिदपसृतौ च तदा मोह-परिग्रहौ, पुनरागतो मदन्तिके सदागमः, स्मृतं च पूर्वाधीतं श्रुतं, ततः कारितानि मया जिनभवन-बिम्बप्रतिष्ठा-तीर्थयात्रा-स्नात्रोत्सवादि-द्रव्यस्तवकृत्यानि, परिहृतानि च परपराभव-कोप-दुर्जनसङ्ग-मृषाभाषण-स्तेय-मिथ्याभिमान- परदाराभिलाष-पराऽवर्णवादादीनि, आदृतानि च दया-ऽनुकम्पा-गुणानुराग-सुकृताऽनुमोदन-परोपकार-देवगुरुपूज्य-स्वजना-नुवर्त्तन-शासनप्रभावन-दान-शीलादीनि, न करोमि कुलमर्यादातिक्रमं, नाऽऽचरामि लोकविरुद्धं, नोद्घाटयामि परमर्मादि, करोमि साधुसेवा श्रुताभ्यास-पुस्तक पूजा-शास्त्र-श्रवणादीनि, जपामि परमेष्ठिनमस्कारं, विदधामीन्द्रियजयोद्यमं, निन्दामि दुष्कृतं, सुकृतं चाऽनुमोदयामि, प्रवर्त्तयामि स्वदेशे न्याय-नीतिम् ।

अथाऽगृहीतसङ्केते ! ममेवं लब्धश्रावकत्वं वीक्ष्य तुष्टोऽकलङ्कमुनिः । पुनरत्रान्तरे भवितव्यता-वशात् माया-सागराभ्यामालिङ्गितोऽहं, तदनुभावाच्चिन्तितं 'यदहो ! अकलङ्कमुनिरयं द्रव्यस्तवोपदशात् प्रचुरं वित्तव्ययं मेऽकारयत् कारयित च, तत् केनचिदुपायेनैनं विहारयामीति' ध्यात्वाऽकलङ्कं प्रति मयोक्तं- "स्वामिन् ! भवता शोकपङ्कादुद्धृतोऽहं श्रुतदानेनाऽनुगृहीतश्च । ततः साम्प्रतं पूर्णो मासकल्पः, क्रियतां सुखेन विहारकर्म, नो चेदस्मान् गुरव उपालभिष्यन्ते इति" ततो ज्ञातमदीयकपटा-भिप्रायोऽकलङ्कमुनिर्विजहार । तद्-गमनानन्तरमेव विस्मृतो मया सदागमः, स्फुरितं च मोह-परिग्रहाभ्यां, पुनस्तथैव महारम्भ-महापरिग्रहासक्तं मां श्रुत्वाऽकलङ्कमुनिना पुनर्मत्-प्रतिबोधार्थमापृष्टाः सूरयः प्रोचुः- "हे मुने ! नाऽसौ धनवाहनस्त्वदुपदेशशतेनाऽपि प्रतिबोधं लप्स्यते, ततो बधिरस्य कर्णजापवदन्धस्य नृत्यदर्शनवद् उखरभूमेः कर्षणवदस्य प्रतिबोधन-श्रमो निष्फलो भविता" इति श्रुत्वा पुनरप्यकलङ्कमुनिना प्रतिबोधोपाये पृष्टे गुरवः प्रोचुः- "सम्यक्त्वामात्यस्य सुतां विद्याऽभिधां कन्यां यदा धनवाहनोऽयं परिणेष्यति तदा मोह-परिग्रहौ त्यत्क्वा प्रतिबोधयोग्यो भविष्यति । तत्-कार्यं तु कर्मपरिणाम-कालपरिणत्याद्यधीनं काले भविष्यति, ततः साम्प्रतं कृतमेतच्चिन्तया, साधय साधो! स्वार्थमेवेति" गुरुवचसाऽकलङ्कमुनिर्मामुपेक्षते स्म ।

## मोहाधीनस्य भवजन्तोः भवभ्रमणम् ।

अथ शृणु भद्रे ! पूर्वं रिपुदारण-भवमध्ये विचक्षणसूरि चरित्रावसरे चित्तवृत्त्यटव्यां चित्तव्याक्षेप-मण्डपे स्थितं समस्तं मोहसैन्यं विमर्श-प्रकर्षाभ्यां यद्-वर्णितमभूत् तत्सर्व-मप्यागत्य मत्पार्श्वे स्थितं, ततो महामूढतानुभावात् संसार एवाऽऽसक्तो[illegible]वम् । मिथ्या-दर्शनवशाद् धर्मबुद्ध्या पापकर्माणि अकार्षम्, इष्टेषु शब्दादिविषयेषु रागवानभूवम् । अनिष्टेषु च द्वेषमधार्षम् । इत्थं मिथ्याभिमान-धनगर्व-हर्ष-विषादादयोऽपि स्व-स्वविषये वीर्यं स्फोरयामासुः । षोडशाऽपि च कषाया भृशं दिदीपिरे, दुष्टाभिप्रायेन युक्ते आर्त्त-रौद्रध्यानेऽनिशं समाश्लिष्ये चतस्रस्तु ज्ञानावरणादयः सप्ताऽपि नृपा प्रवृद्धौजसो मामावृत्य तस्थुः । ततः कामदेवोऽपि रति-विषयाभिलाष-भोग-तृष्णा-पञ्चेन्द्रिया-दिपरिवारान्वितो मां भृशं व्यडम्बयत्, तद् वशाद् गृहीता मया बलात्कारेण परयोषितः, तीव्राभिलाषेण सेविताः पञ्चाऽपि विषयाः, सेवितानि द्यूत-मृगयादीनि सप्ताऽपि व्यसनानि, पीडिता-श्चातिकठोरदण्डेन समस्ताः प्रजाः एवंविधमहानर्थकारिणं मां विलोक्य दूरं गतो मे पुण्योदयस्ततो विरक्तो मयि सर्वोऽपि राजवर्गः प्रजालोकश्च ।

अथाऽन्यदाऽमात्यादिभिर्मिथो मन्त्रयित्वा मां कुलकलङ्ककरं कारागारे क्षिप्त्वा स्थापितो मत्पदे मद्भ्राता नीरदवाहनः । अहं तु तत्र बुभुक्षा-पिपासादि-बाधितो दुःख-शतान्यनुभूय तद्भववेद्यगुटिका-क्षये ततो मृत्वा गतः पापिष्ठनिवासायाः सप्तमे पाटके, तत्र त्रयस्त्रिंशत्सागराणि महादुःखानि भुक्त्वा निर्गतः पुनर्भवितव्यतया घूक-मार्जार-गोधा-शरटादि-प्रायेषु नाना-हिंसकभवेष्वनन्तं कालं यावद् विनाटितः । अथाऽन्यदा मोहादिषु किञ्चिद् विरलीभूतेषु भवितव्यतयाऽवतारितोऽहं मानवावास-पत्तनस्य भरताख्यपाटके साकेतपुरे-नन्द-वणिजो गृहे धनसुन्दर्यास्तत्पत्न्याः सुतत्वेनाऽमृतोदरनामा क्रमेण प्राप्तो यौवनं, पुनस्तत्र सदागमो मदन्तिकमायातः, तद्वशात् सुदर्शन-साधुसमीपे शिक्षितो नमस्कारादिश्रुतं, ततः किञ्चिद् द्रव्यश्रावकत्वमाराध्य गुटिकाक्षये मृत्वा गतो विबुधालयपुरम् ।

अथ विबुधालये भवनपति-व्यन्तर-ज्योतिष्क-वैमानिकनिवासाख्याश्चत्वारः पाटकाः सन्ति, तत्र प्रथमो दश, द्वितीयोऽष्टधा, तृतीयः पञ्चधा, तुर्यस्तु द्वादश-चतुर्दश-प्रभेदकलितो द्विधाऽस्ति, तत्राऽहं तु प्रथम एवा पाटके द्व्यर्धपल्योपमायुर्देवत्वेनोत्पन्नः, पुनस्ततश्च्युत्वा मानवावासनगरे बन्धुदत्त-वणिग् गृहे प्रियदर्शनायास्तत्पत्न्याः पुत्रत्वेन जातः, बन्धुरिति नाम दत्तं, यौवने सुन्दरनाम्नो मुनेः समीपे द्रव्यसाधुत्वं प्रपद्य मृत्वा व्यन्तरदेवो जातः । एवमनन्तं कालमनन्तान् नराऽमरतिर्यगादिभवान् भ्रान्तस्तत्र क्वचित् सदागमं, क्वचिद् द्रव्यश्राद्धत्वं, क्वचिद् द्रव्य-श्रामण्यं चाऽपि प्राप्य देवत्वं नरत्वं वा प्राप्तः । क्वचिच्च कुतीर्थिक-पाखण्डादिमतमासेव्य बहुभवभ्रमणमकार्षम् । इत्थं गतागत-परम्पराभिः किञ्चित् निर्मला जाता मे चित्त-वृत्त्यटवी, ततः स्वावसरं वीक्ष्य चारित्रधर्म-सद्बोधादीनाऽऽपृच्छ्य सम्यग्दर्शनाऽमत्यः प्रस्थितो मदन्तिकमागन्तुं सद्बोधस्तु विद्याकन्यां गृहीत्वा प्रस्तावे योग्यतां विज्ञायाऽहमागमिष्यामीति कृत्वा स्थितः ।

अथाऽहं जनमन्दिरपुरे आनन्द-नन्दिन्योः सुतो वैरोचननामाऽभूवम् । तारुण्ये धर्म-घोषसूरिदेशनां श्रुत्वा सदागमपरिचयमकार्षम् । ततोऽवगत-जीवा-ऽजीवादितत्त्वेन स्ववीर्योल्लासात्मया कर्मपरिणामप्रदत्ताऽपूर्वकरणाख्य कुठारेण कर्मग्रन्थिं विभिद्य विलो-कितो सम्यग्दर्शनामात्यस्तद्दर्शनात् प्रकटितो मे आसंसारमननुभूतपूर्वः कश्चिल्लोकोत्तरः प्रमोदः, साक्षाल्लक्षितास्तदा शुद्धदेव-गुरु-धर्माः, विलीना मोहादयस्ततः श्राद्धधर्मोऽप्युप-स्थितो, गृहीतानि मया कानिचिच्छ्रावकव्रतानि, यच्च धनवाहनादिभवेष्वप्यकलङ्का-दिवचसा मया सदागम-श्राद्धत्वाद्याराधनं चक्रे, तत् तु श्रद्धानशून्यमेवेति । अत्र तु श्रद्धानसनाथमेतत्, एवं तत्र भवे सम्यक्त्वमूलं श्राद्धधर्ममाराध्य गुटिका-क्षये पुन-

रन्यगुटिकामादाय सौधर्मकल्पे महर्द्धिकः सुरोऽभूवम् । तत्र जय जय नन्देत्यादि सुरी वचांस्याकर्ण्य दत्तज्ञानोपयोगो वैरोचनभवं व्यलोकयम्, पुनः प्रकटितौ सम्यग्दर्शन-सदागमौ, ततः शाश्वताऽर्हत्बिम्ब-पूजा-जिनकल्याणकोत्सवादिद्रव्यस्तवमकार्षम् । किञ्चित् न्यूनसागरद्वयं यावद् दिव्यान् भोगान् भुक्त्वा गुटिका-क्षये ततश्च्युत्वा मानवा-वासे रेखा-मदनयोः सुतः कलन्दनामाभीरः समभवम् । प्रकृतिभद्रक-पापभीरुत्वादि-गुणोपेतस्ततश्च्युत्वा ज्योतिषिको जातस्ततः सम्यक्त्व-सदागमाभ्यां त्यक्तः पुनर्मोह-परिग्रहाभ्यामाक्रान्तः पुनः ततश्च्युत्वा पञ्चेन्द्रियपशुसंस्थाने दर्दुरत्वं प्राप्तः, पुनर्भवितव्यतया बहुकालं यावत् नाना-रूपं कृत्वा विडम्बितोऽन्यदा नीतो मानवावासे ।

तत्र काम्पिल्यपुरे वस्तुबन्धुनृप-धराराज्योः पुत्रत्वेनोत्पन्नो वासव इति नाम दत्तं, क्रमात् प्राप्ततारुण्यः शांतिसूरिसविधे धर्ममाकर्ण्य सम्यक्त्व-सदागमौ प्राप्तः, पुनर्देवत्वं प्राप्याऽऽयुःक्षये पुनः काञ्चनपुरे नरत्वं प्राप्तस्तत्र प्रवृद्धौ मोह-परिग्रहौ, सम्यक्त्व-सदागमौ दूरं गतौ, पुनरहं भ्रान्तो बहुभवान् । एवमसङ्ख्यवारान् सम्यक्त्व-सदागमौ मदन्तिकमा-गत्यागत्य गतौ केवलः सदागमस्त्वनन्तशः समागत्यागत्य गतः यदा यदा तौ समीप-माजग्मतुस्तदा तदा मोहाद्या दूरं विलिल्यिरे, पुण्योदयश्च प्रकटीबभूव । यदा यदा च मोहाद्याः प्रबलीबभूवुस्तदा तदा च तौ दूरं व्रजतुः पुण्योदयोऽपि च ननाश, इत्थमनन्त-कालं सांसारिकसुख दुःखान्यनुभूयाऽनुभूयाऽन्यदा सौपारकपुरे शालिभद्रपत्न्याः कनक-प्रभायाः कुक्षौ पुत्रत्वेनोत्पन्नस्तत्राऽहं विभीषणनामा प्राप्तयौवनः, कस्यचित् सूरेर्वचः श्रुत्वा सम्यक्त्व-सदागमौ प्राप्य द्रव्यतः श्रामण्यं प्रपन्नः । पुनः प्रबलीभूता मोहादयः सम्यग्दर्शनस्तु दूरं गतस्ततस्तीर्थकरनिन्दादिमहाशातनाः कृत्वाऽनन्तभवान् भ्रान्तः ।

अथैवं नाना-भव-गहनविषमं संसारिजीवस्यवृत्तान्तं श्रुत्वाऽगृहीतसङ्केता सम्यग-लब्ध-परमार्थत्वाद् विस्मयस्तिमितनेत्रा सती तस्थौ । अत्राऽन्तरे प्रज्ञाविशाला दध्यौ-'अहह ! दारुणो भव-प्रपञ्च सुदुर्जयाः खलु मोहादयः । यतो नन्दिवर्धनादिभवेषु त्वदृष्ट सम्यक्त्वत्वाद्भवजन्तुं मोहादयः पीडयन्त्येव परं वैरोचनादिभवेषु तु लब्धसम्यक्त्वमप्येवं विडम्बयामासुः, ततोऽचिन्त्या शक्तिर्बत मोहादीनामित्यादि-विचारमग्ना यावदास्ते तावद् भव्यपुरुषः प्राह- "मातः ! किमेवं विस्मृतिं यासि ? सावधानीभूय निशामयाऽ-ग्रेतनसम्बन्धमिति ।" प्रज्ञाविशाला प्राह- "वत्स ! नाऽहं विस्मृतिं यामि, किन्त्वेतत्-स्वरूप-विभावनैकतानाऽस्मीति ।" ततः पुनः संसारिजीवः प्राह- "शृणु भद्रे ! तदनु भद्दिलपुरे स्फटिकनृपपुत्रो जातोऽहं विमलानन्द-नामा, यौवने सुप्रबुद्धसूरिवचसा सम्यक्त्व-सदागमावुपलक्ष्य श्रावकधर्मं गृहीतवान्, श्रावकत्वं प्रपाल्य गुटिका-प्रयोगेण

गतस्तृतीय-देवलोके, तत्राऽपि मिलितौ मे सम्यक्त्व-सदोगमौ, शाश्वतजिनार्चादि-द्रव्यस्तवमाराध्य दिव्यसुखमनुभूय च च्युत्वा नरत्वं प्राप्तः, पुनस्तत्राऽपि देशविरतिमनुपाल्य गतस्तुर्य-स्वर्गे, इत्थं सम्यक्त्व-सदागम-देशविरति-प्रभावाद् द्वादशसु कल्पेषु सुर-सौख्यान्यन्वभूवम् । तदन्तरं भवितव्यतया तद्भववेद्य-गुटिकां दत्त्वा प्रेषितोऽहं मानवावासपत्तने पुण्योदयान्वितः ।

इत्थं मोह-परिग्रह-श्रुतिसङ्गान् दुःख दायिनस्त्यक्त्वा,
ज्ञात्वाऽपि च सद्दर्शनमेकान्त सुखप्रदमभजत ॥

इत्युपमिति-कथोद्धारे
मोह-परिग्रह-
श्रुतीन्द्रियादिविपाकवर्णनाधिकारः पञ्चमः ॥ ५ ॥

# अथ षष्ठोऽधिकारः

## गुणधारणस्य मदनमञ्जर्या सह लग्न : ।

अथाऽग्रतः शृणु भद्रेऽगृहितसङ्केते ! सप्रमोदाख्यपुरे मधुवारणनामा नृपः, सुमालती तद्राज्ञी, तस्याः कुक्षावतीर्णोऽहं समये जातः पुण्योदयान्वितः पितृभ्यां गुणधारण इति ममाऽभिधा चक्रे । तत्रैव पुरे विशालनामा मत्-पितुर्वयस्योऽस्ति, तत्पुत्रः कुलन्धराभिधस्तेन सह बाल्यादेव मे मैत्री बभूव । क्रमेण शिक्षितावावां कलाचार्यान्तिके कलाः प्राप्त-तारुण्या-वेकदाऽऽह्लादमन्दिरोद्याने क्रीडार्थं गतौ, तत्रैका स्वरूपसौन्दर्याऽधरीकृत-सुरीनिवहा काचिदङ्गना सख्या सह सञ्चरन्ती दृष्टा, तद्रूपाऽऽक्षिप्तचित्तोऽहं तरलदृशा पुनस्तदभिमुखमपश्यम् इति, साऽपि मयि जातानुरागा मुहुर्मुहुर्मन्मुखे सविकारं कटाक्षानक्षिपत । ततः कुलन्धरेण सविकारं मां मत्वा मन्मुखे दृष्टिः कृता, तल्लज्जितोऽहमाकारगोपनं कृत्वा कुलन्धरेण सह गृहमायातः, परं तदाक्षिप्त-चित्तत्वादनेक-विकल्पाकुलस्य मे क्वापि रतिर्न बभूव। कृच्छ्रेणेत्थं युगप्राया सा रात्रिर्गमिता । प्रातर्मया कुलन्धरं प्रत्युक्तं- "मित्र! व्रजामः साम्प्रतं तद्वनमिति," ततः सस्मितं कुलन्धरः प्राह- "मित्र ! जानाम्यहं ते सर्वं कुचेष्टितमिति," ततो मयाऽपि सद्भावमावेद्य प्रोक्तं- "मित्र ! यदि सा परिणीता भविष्यति तदा तु तां परस्त्रियमुच्छिष्टप्रायामनर्थखानिं स्वप्नेऽपि नेच्छामि, यदि च कन्या भविष्यति तदा तूपायशतेनाऽपि तामुद्वहिष्यामि । तत्-निर्णीयते तत्र गत्वेति गतौ तत्रोद्याने समन्ताद्, विलोकिता सा न दृष्टा क्वाऽपि, ततो जातोऽहं भृशं दुःखार्त्तः, कुलन्धरोऽपि च यावदित्थं तच्चिन्तापरावेकस्य तरोस्तले स्थितौ स्तस्तावदेका स्त्री तत्राऽऽऽगत्याऽऽशिषं दत्त्वा कुलन्धरं रहस्याकार्य प्रोवाच- "अहो! सुभग ! वैताढ्यगिरौ गन्धसमिद्धपुराधीशः कनकोदरनामा खेचरचक्री, तत्-प्रियाऽहं कामलता । आवयोरनेकोपयाचितैरायाता सकल-कलाविलास्-सदनमेका मदनमञ्जरी नाम्नी सुताऽस्ति । अन्यदा तामुत्कटयौवनां वीक्ष्याऽनुरूपवरप्राप्ति-चिन्तार्त्तो नृपः क्वाऽपि योग्यं वरमपश्यन् स्वयंवरणमण्डपं कारयित्वा सर्वखेचरनृपानमेलयत् । अथ तेषु प्रत्येकं प्रत्येकं निरीक्ष्यमाणेषु नैकोऽपि तस्याः कन्यायाश्चित्तं समाचकर्ष । ततः सा विषण्णा सती पुरुषद्वेषिणी भूत्वा स्वमन्दिरं ययौ । राजानोऽप्यहोऽवगणिता वयमिति द्वेषं वहन्तो यथागतं

गताः । ततः कनकोदरनृपस्तु वज्राहत इव विलक्षो बभूव, तथाऽहमपि सञ्जातपरमदुःखा रोदितुं लग्ना, ततः कुमार्याः प्रियसख्या लवलिकाख्ययाऽऽगत्य 'मातः! किं खेदेन ? अहमेव कुमार्या मनोऽभिप्रायं गृहीष्यामीत्यादिवाक्यैराश्वासिता ।' अथ तस्यामेव निशि राज्ञः स्वप्ने द्वाभ्यां पुरषाभ्यां स्त्रीभ्यां चाऽऽगत्य प्रोक्तं- 'राजन्! अस्माभिश्चतुर्भिः सम्भूय महाभाग्यनिधिर्मदनमञ्जर्या वरो निर्धारितोऽस्ति । ततो न त्वया शोचितव्यमत्राऽर्थे' इत्येतत्-स्वप्न-दर्शनात् नृपः किञ्चित् स्वास्थ्यमाप ।

अथाऽन्येद्युर्लवलिकया मदनमञ्जरी पृष्टा- 'सखि ! यदि कोऽपि नरस्ते न रोचते तर्हि कोऽस्ति तवाऽभिप्राय इति ?' सा प्राह- "सखि ! न पश्यामि कमपि तथाविधं पुरुष-पुङ्गवं, यत्र मनो मे स्निह्यति यदा तं लप्स्ये तदा वरिष्ये" इति तल्लवलिकया मां प्रत्युक्तं, मया राज्ञे निवेदितं, ततो नृपेणाऽपि भवत्वेवं, विलोकयतु कुमारी स्वयमेव वरमित्यादिष्टं, ततः पितुरादेशात् मदनमञ्जरी लवलिकां सहाऽऽदाय विद्याबलाद् गगनाध्व-चारिण्य-नेकपुराण्यवलोकयन्ती गतेऽह्नि एतदुद्यानं समागता सती त्वन्मित्रममुं कुमारं विलोक्य सहसा प्रकटित-स्नेहातिरेक-प्रवर्द्धित-मिलनोत्कण्ठा मन्मथव्यथित-हृदया गृहमागता । ततो लवलिकामुखता् तद्-विज्ञाय मुदमुद्वहन्त्या मया राज्ञे निवेदितं, प्रमुदितो नृपस्त-च्छ्रुत्वा, ततः कुमारीं समाश्वास्याऽत्र समागताऽहं भवतोः शुद्ध्यवलोकनार्थं, तदनगृह्णातु कुमारोऽयं मत्पुत्रीं पाणिग्रहणेनेति" तस्या वचः श्रुत्वा प्रहृष्टेन कुलन्धरेणाऽऽगत्य मह्यं कथितम् । अथ मया "तथाऽस्तु" इति तद्-वचस्यङ्गीकृते प्रहृष्टा कामलता । "श्वः समा-गमिष्यामोऽत्र वयम्" इत्युक्त्वा स्वस्थानं गता : आवामपि प्रीतमनस्कौ गृहमाजग्मतुः ।

अथ द्वितीयेऽह्नि यावदावां तत्रोद्याने गतौ तावदागतस्तत्र रत्नादिसमृद्ध्या विमानमापूर्य मदनमञ्जरीं विवाह-सामग्रीं चाऽऽदाय कामलतादिपरिजनान्वितः कनकोदरखेचरपतिरपि, ततः प्रागवगणितखेचरेभ्यो मा भूदत्र कार्ये कश्चिद् विघ्न इत्याशङ्क्य तेन त्वरित-त्वरितं विवाहचारं कृत्वा परिणायितोऽहं मदनमञ्जरीं, दत्तं च रत्नादि बहु यौतकम् ।

अथ क्षणाऽन्तरादागता भूयांसः पूर्वाऽवगणिताः खेचरनृपाः सङ्ग्रामार्थं, परं मत्पुण्योदयानुभवात् ते मां विलोक्य, "योग्योऽयं राजहंस" इत्युक्तिभाजः कोपं विहाय मां कनकोदरं च समाश्लिष्य तस्थुः । तावद् विज्ञात-तद्वृत्तान्तो मत्-पिता मधुवारणनृपोऽपि ससैन्यस्तत्राऽऽगतः, प्रमुदितः सर्वोऽपि परिजनः । अथ ते कनकोदरादयः खेचरा मत्-पितरं मां चाऽनुज्ञाप्य स्व-स्व-स्थानं गताः, वयमपि महामहेन स्वपुरं प्रविष्टास्ततोऽहं मदनमञ्जर्या सह मनोऽभीष्टान् दिव्यभोगान् भुञ्जानो विचरामि ।

## मुनेः देशना, श्रावक धर्मप्राप्तिः

अन्यदा कुलन्धरस्य स्वप्ने त्रयः पुमांसो द्वे च स्त्रियावागत्येति प्रोचुः- "अहो! कुलन्धर! यदसौ गुणधरो नानासुखानि विलसति, तदस्माकं पञ्चानामेवानुकूलताभावादिति" तत् कुलन्धरेण मां प्रत्युक्तं, तदा मया विमृष्टं- 'यदहो ! पूर्वं कनकोदरनृपेण चत्वारि मानुषाणि दृष्टानि, साम्प्रतं तु पञ्च, तत् कोऽत्र विभेदः ?' कानि चाऽमूनि इत्यादि-सन्दिग्धमना यावत् कुलन्धर-मदनमञ्जर्यादियुतः क्रीडार्थमाह्लादमन्दिरोद्याने गतस्तावद् दृष्टस्तत्रैकः कन्दनामा महर्षिस्तं नत्वा सपरिकरो निविष्टोऽहं धर्मश्रवणार्थं, मुनिना देशना दत्ता, तदाकर्णनमात्रात् सम्यक्त्व-सदागमौ मदन्तिकमागतौ, निर्मलीभूता मे चित्तवृत्त्यटवी, क्षोभं प्राप्ता मोहादयस्ततश्च चारित्रधर्मनृपेण सद्योत्थायाऽऽदिष्टं- "यदेनां विद्या-कन्यामादाय साम्प्रतं यात यूयं भवजन्तुसविधमिति ।" ततः सद्बोधेनोक्तं- स्वामिन् ! अधुनाऽपि भवजन्तोः पार्श्वे पुण्योदय-सातोदयौ स्तस्ततः कालविलम्बः कर्त्तुं युज्यते, तावत् प्रेषयत गृहिधर्म-गुणरक्तताऽभिधौ दम्पती तदुपान्ते, इति मन्त्रिवचसा राज्ञादिष्टौ तौ दम्पती स्वपरिवारभूत-द्वादश-मानुषसहितौ मदभ्यर्णमायातौ, ततः कन्दमुनिमुखेनाऽङ्गीकृतो मया सम्यक्त्वमूल-द्वादशव्रतरूपः श्राद्धधर्मः । मदनमञ्जरी-कुलन्धरावपि सम्यक्त्वमापतुः ।

अथ तदवसरे मया स्वप्नभावार्थं पृष्टः कन्दमुनिराह- "राजन् ! गम्भीरोऽस्त्येतत्-स्वप्नार्थस्ततः मम गुरवो निर्मलसूरिनामानः केवलिनः सन्ति, तानापृच्छ्याऽहं ते कथयिष्यामि । यदि वा विश्वोपकार-कारिणो हि ते विहरन्तोऽत्रैवाऽऽयास्यन्तीति श्रुत्वा मुनिं नत्वा स-परिकरोऽहं गृहमायातः । कन्द-मुनिरप्यन्यत्र विजहार ।

## निर्मलसूरिदेशना

अथ मां राज्येऽभिषिच्य मत्-पिता मधुवारण-नृपः परलोकमशिश्रयत् । ततोऽहं प्रकृष्टां राज्यलक्ष्मीं भुञ्जानोऽपि-सम्यक्त्व-सदागमा-ऽनुभावाच्छ्राद्धधर्मं सुविशुद्धं पालयामि। इत्थं कतिपय-दिनान्तेऽन्यदा कन्दाद्यनेकसाधुसहिताः श्रीनिर्मलसूरयः पुरोद्याने समावासरन्, ततः कल्याणनाम्ना उद्यानपालकेन सूरिसमागमे कथिते हृष्टेन मया तस्मै दीनारलक्षं प्रीतिदानं दत्तं, महर्द्ध्या च वन्दनार्थं गतः । पञ्चाभिगमपूर्वकं त्रिप्रदक्षिणीकृत्य वन्दिता गुरवः । अथ यथोचितस्थानं निविष्टे सकलसभाजने स्वर्ण-पद्मासनाऽऽसीनाः श्रीनिर्मलसूरिकेवलिनो देशनामारेभिरे- "'अहो भव्याः ! शृणुताऽस्मिन् भवचक्रनगरे प्राणिनां जैनधर्मं विना नाऽन्यत् किमपि शरणमस्ति । यतो यत्र जन्म तत्र मरणं ध्रुवम्।

संयोगाः सम्पदस्तत्र विपदोऽपि, रोगानुगता भोगाः, जराग्रस्तं यौवनं, शोकान्वितो हर्षः। इत्थं जगति रागाद् यद्-वस्तु प्राणिनः सुखकारणतया मन्यन्ते, परमार्थतस्तदेव दुःख-कारणमस्ति । ततो ये संसारसुख-विमुखाः स्वभावसुख-मुदिताः केवलिनः त एव तत्त्वतः सुखिनस्तत् सुखप्राप्ति-कारणं तु चारित्रधर्मस्ततः स एव हितार्थिभिः शरणी-कर्त्तव्य" इत्यादि-धर्मदेशनां श्रुत्वा पीयूषसिक्त इवाऽहं प्रीतचित्तोऽभूवम् । ततो देशनान्ते मया स्वप्नार्थं पृष्टाः सूरयः प्रोचुः- "राजन् ! भूयान् वृत्तान्तोऽस्त्ययं तदेकतानो भूत्वाऽऽकर्णय मूलतः ।" ततस्तथेति कृत्वा स्थितोऽहं स्थिरमनास्तां श्रोतुम् ।

## भवजन्तुभ्रमणसंक्षेपः, उपसंहारश्च ।

अथ गुरुभिरसंव्यवहारनगरादारभ्या-ऽऽमूलादुक्तं सविस्तरं मम पूर्वचरितं, पुनरुक्तं च श्रृणु राजन् ! तव चित्तवृत्त्यटव्यामनेकान्तरङ्गनगरमयमान्तरङ्गं महाराज्यमस्ति, परं तत् तु प्रबलीभूतेन महामोहनाम्ना लुण्टाकनायकेन त्वां त्वद्-हितांश्चारित्रधर्मादींश्च दूरे व्यपास्य प्रसह्य स्वयं गृहीतमस्ति । अन्यच्च पूर्वं कर्मपरिणाम-नृपस्त्वयि प्रतिकूलोऽभूत्, साम्प्रतं तु सोऽनुकूलोऽस्ति, तथा कालपरिणतिस्तद्-राज्ञी स्वभावनामाऽमात्यस्तथा भवितव्यताभिधाऽनादि-कालीना त्वत्पत्नी, इत्थमेते चत्वारोऽपि त्वय्यानुकूल्यं बिभ्रति, यदि प्रागप्येभिरेव चतुर्भिरन्तरान्तराप्रसन्नीभूतैः पुण्योदयं सहायं दत्त्वा तव सुखमुत्पाद्यते, तथापि यत्-प्रभृति सदागमादिभिः सह त्वं मिलितस्तत्-प्रभृति तु विशेषतोऽनुकूलैरेभिः पूर्वजन्मसु स्वर्गसौख्यानि दत्तानि । इह च मदनमञ्जरी मेलिता एत एव च कनकोदर-स्वप्नम् आगताः । किञ्च पुण्योदयोऽपि शुभकार्ये कारणतां वहत्यतस्तत्-प्रादुष्करणार्थं कुलन्धरस्य पञ्च मानुषाणि दर्शितानि ।

अथ यत् तव नन्दिवर्धनभवे कनकमञ्जर्याः प्राप्तिस्तथा रिपुदारणभवे नरसुन्दर्या-प्तिर्वामदेवभवे विमलमित्रप्राप्तिर्यच्च धनशेखरभवे रत्नाद्यर्जनं हरिकुमार-मैत्री च । तथा धनवाहनभवेऽकलङ्कमैत्री, इह जन्मनि च मदनमञ्जर्याः सङ्गः, सङ्ग्रामोन्मुखेष्वपि खेचरेषु प्रणयपेशलत्वं, तथाऽन्यान्यप्यन्तराऽन्तरा यानि यानि सुखकारणानि बभूवुस्तत्र सर्वत्राऽपि पुण्योदय एव कारणं, परं त्वया तु विवेक-विकलेन पुण्योदयं विस्मृत्य ये हिंसा-वैश्वानर-मृषावाद-शैलराज-माया-स्तेय-सागर-मैथुन-मोह-परिग्रहादयो महानर्थकारिणस्त एव तत् कारणतयाऽमन्यन्त ।

## सुख-दुःख करणादीनि

अथ श्रृणु भद्रे ! पुनरत्राऽन्तरे मया पृष्टं- "भगवन् ! यदि प्रागपि मदभ्यर्णे पुण्योदय आसीत् तर्हि कथं नाना विडम्बना मम जज्ञिरे ?" तदा सूरयः प्राहुः- "श्रृणु राजन् !

यद्यपि चित्तवृत्त्यटव्यास्त्वमेव स्वामी तथापि तत्रैकं मोहराज्य-सैन्यं, द्वितीयं चारित्रधर्मसैन्यं चैते उभे अप्यनादिकालीने परस्परविरोधिनी सदा तिष्ठतः । कर्मपरिणा-मस्तु डमरुकमणि-न्यायेनोभयोरपि पक्षयोर्मध्यवर्त्ती यदा यं पक्षं प्रबलं पश्यति तदा तमेवाऽनुसरति कर्मपरिणामस्य च पुण्योदय-पापोदयाख्यौ द्वौ सचिवौ स्तस्तत्र पापोदयस्तु त्वयि परम वैरं वहति, पुण्योदयस्तु तव हितकृदस्ति, किं वा संसारादारभ्य पापोदयस्तु त्वत्समीप एवाऽऽसीत् परं यदा यदा त्वद्विपक्षाणां मोहादीनां प्राबल्यमभूत्तदा तदा सोऽपि त्वामशरणं व्यडम्बयत् । यदा यदा च मोहादीनां शैथिल्यं चारित्रधर्मदीनां च प्राबल्यं तदा तदाऽसावलक्षितोऽतिष्ठत् । पुण्योदयश्च प्रकटीभूय सुखकृद् बभूव । तथा नन्दिवर्धनादि-भवेष्वपि भवितव्यतया नित्य-सहचरत्वात् तुभ्यं पापोदयो न दर्शितः, कदाचित्कत्वात् पुण्योदयस्तु दर्शितस्तदेवं राजन् ! यदनन्तं कालमनन्त-दुःखार्दितस्त्वं भ्रान्तो यच्च हिंसादीनि हितकृत्यतया प्रतिपन्नानि यच्च पुण्योदयोऽवगणितो यच्च त्वां चारित्रधर्मादींस्त्वद्धितांश्च दूरे व्यपास्य मोहराजेन चित्तवृत्त्यटव्या राज्यं गृहीतं, तदेतत् सर्वमप्यस्य दुरात्मनः पापोदयस्यैव दुर्विलसितं विद्धि ।

अत्राऽन्तरे पुनर्मया पृष्टं- "स्वामिन्! इदानीं कथमसौ दुष्टात्मा पापोदयो मद्दूरे गत इति ?" सूरयः प्राहुः- "नरा-धिप! नाऽसौ पापोदयः स्वतन्त्रोऽस्ति, किन्तु तस्याऽपि कर्मपरिणामादीनां चतुर्णां पारतन्त्र्यमस्त्येव तदिदानीं तैश्चतुर्भिरपि प्रसन्नीभूय पुण्योदयं त्वदुपान्ते मुक्त्वा पापोदयो दूरीकृतः । अन्यच्च नन्दिवर्धनादिभवेषु विचक्षणाचार्यादि-देशनाभिरपि यत्-सदागमा-दयस्त्वया नोपलक्षिता-स्तदप्येषामेव चतुर्णां प्रातिकूल्यात् पापोदयसान्निध्याच्च । यत् पुनरिदानीं सदागमादिभिस्ते परिचयो जातस्तदेषामेवाऽनुकूल्यात् पुण्योदयसान्निध्याच्च। ततो हे राजन् ! यद्-यत् किञ्चिच्छुभं कार्यं निष्पद्यते तत्तदेभिरेव चतुर्भिः पञ्चभिर्वा सम्भूयाऽनुकूलैः सद्भिः निष्पाद्यते, तथा प्रतिकूलैः सद्भिरशुभं निष्पाद्यत" इति श्रुत्वा पुनर्मया पृष्टं- "स्वामिन् ! यद्येवं भवद्भि शुभा-ऽशुभकार्येषु कर्मपरिणामादय एव कारणतयोच्यन्ते तदाऽहं तु किं तत्राऽकिञ्चित्कर एव किमुत किञ्चिदपि ते मत्सापेक्षाः सन्तीति ?" सूरिराह- राजन् ! सकल-कार्येषु त्वमेव प्रधानमसि यतस्ते कर्मपरिणामा-दयोऽपि तव योग्यता वशादेव कार्यं कुर्वते, अत एव च सकलशुभाऽशुभकार्य-कर्त्ता भवजन्तुरेवेत्यच्युते," पुनः पृष्टं मया- "स्वामिन् ! एतावन्त्येव कारणानि किमुता-ऽन्यदप्यस्ति किमपि कारणम् ?" ततो गुरुभिरुक्तं- यथा कर्मपरिणामादयश्चत्वारः पञ्चमो भवजन्तुश्चैवं पञ्च कारणानि सन्ति, तथाऽन्य-दप्यस्त्येकमुत्कृष्टं कारणं- तथाहि-

## जिनाज्ञा स्वरूपं महिमा च ।

मुक्तिनगरेऽनन्तज्ञानादि-परमैश्वर्यकलितः सुस्थितनामा नृपः सार्वभौमोऽस्ति । सोऽनेकरूपोऽप्येकरूप एव गीयते । तथा बुद्ध-विष्णु-महेश्वर-निष्कल- जिनब्रह्मादि-नाना-नामभिरपि स एवोच्यते । यद्यप्यसौ वीतरागत्वात् स्वयं न क्वाऽपि स्निह्यते, न च द्वेष्टि। तथापि स भवजन्तूनेवमाज्ञापयति- "यदहो भव्या ! यूयं चित्तवृत्त्यटव्या हेयवस्तून्यप्राकृत्योपादेय-वस्तून्यङ्गीकुरुध्वम् । तथा मोहादिप्रत्यर्थिना सङ्गं विहाय चारित्रधर्मादीनात्महितान् सेवध्वम्- इत्येवमादिरूपा हेयोपादेयगोचरा तदाज्ञैव प्राणिनां निःशेष-सुख-दुःखानां कारणं भवति । यतस्तस्य प्रभोराज्ञाऽऽराद्धा सती सकलसुख-कारणं भवति, विराद्धा तु दुःखकारणमिति । यदाहुः- 'आज्ञाऽऽराद्धा विराद्धा च शिवाय च भवाय च' [ वितरागस्तोत्र १९/५ ] इति ततो द्वादशाङ्गी-लक्षणाया आज्ञायाः कश्चनाऽक्षरमात्रमपि विरुद्धं भाषते, इति सोऽनन्तं कालं यावद् भवभ्रमणं करोतीति । त्वयाऽपि पूर्वं तदाज्ञा-विराधन-वशादेव महाऽऽपदोऽनुभूताः। साम्प्रतं तु तदाराधनाऽभिमुखस्यैतावान् सुखलेशः समजनि," इत्याज्ञा-स्वरूपं श्रुत्वाऽपि सञ्जातसन्देहेन पुनर्मया पृष्टं- "भगवन् ! अद्यापि यदि सुखलेश एवोच्यते भवद्भिस्तर्हि किमतोऽप्यधिकं जगति किमपि सुखमस्ति ?" केवल्याह- राजन् ! आसंसारं यत्त्वया नराऽमरादिभवेषु यच्चेह जन्मनि त्वया सुखमनुभूतं तत्सर्वमपि समुदितं सदाज्ञाजनित सौख्याऽनन्तभागमपि नाऽर्हति, परं तत्सुखं तु यदा त्वं क्षान्त्यादि-दश-कन्याः परिणेष्यसि तदाऽनुक्तमपि स्वयमेव ज्ञास्यसि ।"

## क्षान्तयादिदशधर्मपरिचयः ।

अत्राऽन्तरे कन्दमुनिनोक्तं- "भगवन् ! किं नाम्न्यस्ताः कन्याः" ततः सूरिराह- "चित्तसौन्दर्यपुरे शुभपरिणामो राजा तस्य निष्प्रकम्पता-चारुताऽभिधे द्वे राज्ञ्यौ, तयोः क्रमेण द्वे कन्ये क्षमा-दयाऽभिधे । तथा चोज्ज्वलमानसपुरे शुद्धाभिप्रायनृपस्तत्पत्न्यौ क्रमेण [१]सरलता-वर्यताऽऽख्यौ तयोः पुत्र्यौ नम्रता-सत्यता-नाम्न्यौ । तथा निर्मलचित्तपुरे शिष्टाभिप्राय-नृपस्तत्पत्न्यौ [२]वरेण्यता-प्रधानताख्यौ तयोः पुत्र्यौ ब्रह्मरति-मुक्तता-नाम्न्यौ। तथा सम्यक्त्वाऽमात्यस्य सुदृष्टिः पत्नी, तत्-पुत्री विद्या-नाम्नी । तथा चारित्रधर्मनृपस्य विरति नाम्नी राज्ञी, तत्सुता निरीहताख्या चेति । पुनः कन्दमुनिराह- "भगवन् ! एता भवदुक्ता दशाऽपि कन्या गुणधारणनृपोऽयं कदा परिणेष्यतीति ?" ततः सूरिराह- "श्रृणु

---

१. स्थिरता -वर्य ° D.L. १ ॥

२. शुद्धता-पापभीरुताभिधे तत्पुत्र्यौ क्रमेण सरलता-ऽचौर्यता नाम्न्यौ - L१ ॥

मुने ! यदा कर्मपरिणामनृपः कालपरिणत्या स्वपत्न्या स्वभावाऽमात्येन च सह विमृश्य भवितव्यताया अनुज्ञां गृहीत्वा पुण्योदयं पुरस्कृत्य कन्यानां जननी-जनकाननुकूलयित्वा ताः कन्या दापयिष्यति, तदा परिणेष्यति । कर्मपिरणामोऽपि अस्य नृपस्य योग्यतामपेक्षते। ततो यद्ययं सद्गुरुणाऽभ्यासेनाऽऽत्मनो योग्यतामुत्पादयति तर्हि कर्मपरिणामोऽपि सर्वां सामग्रीं मेलयित्वाऽस्मै ताः कन्याः दापयति।

अथैतदाकर्ण्य कन्दमुनिः प्राह- "स्वामिन् ! भवत्प्रसादेनैवाऽयं नृपो योग्यतां लप्स्यते, ततः कृपां विधाय यथाऽयं नृपस्ताः कन्याः परिणेतुं योग्यो भवति, तथोपायः कथ्यताम्।" अथाऽऽकर्णय भद्रे ! श्रीनिर्मलसूरयस्तदुपायमुपदिशन्ति, अहमेकाग्रमनाः शृणोमि तथाहि-

यः सर्वप्राणिषु मैत्रीं विचिन्तयति, परकृत पराभवं च सहते, कृतोपसर्गेऽपि पुंसि मम कर्मनिर्जरणसहायोऽयमिति मैत्रीमेव दधाति मनःस्थैर्यं च कुरुते तस्य क्षमा स्वयंवराभूत्वा गृहिणीभवति यश्च परोपतापं न विधत्ते, उपकारं च कुरुते, स्वात्मवत् सर्वजीवान् पश्यति, परदुःखं वीक्ष्य स्वयं दुःखितो भवति, स पुमान् दयां- वरीतुं योग्यो भवति ॥ १ ॥ तथा जात्यादिमदवर्जनं विनीतत्वं नवनीत्वच्चित्तसौकुमार्यम् इत्येष नम्रता परिणयनोपायः ॥ २ ॥ तथा परमर्म-परनिन्दा-पैशुन्य-कठोरोक्ति-नर्म-वक्रोक्त्यादिवर्जनं हित-परिमित-यथार्थवादित्वं चेत्येष सत्यता-परिणयनोपायः ॥ ४ ॥ अकौटिल्यं परवञ्चनवर्जनं चित्तनैर्मल्यं चेत्येष सरलता प्राप्त्युपायः ॥ ५ ॥ तथा पराबाधा-भीरुत्वं परद्रोहवर्जनं परद्रव्येऽनभिलाषः स्तेयदुर्विपाकचिन्तनं दुर्गति पाताद् भीतिश्चेत्येषोऽचौर्यता-परिणयनोपायः ॥ ६ ॥ तथा बाह्या-ऽभ्यन्तरपरिगृहेभ्य आत्मनः पार्थक्यचिन्तनं, अर्थ-कामाभ्यां विरमणं, स्वभाव-विभावयोर्भेदज्ञानमित्येष मुक्तता-प्राप्त्युपायः ॥ ७ ॥ तथा यः सर्वाः स्त्रीः मातृवत् पश्यति, स्त्री-पशु-पण्डकादियुते स्थाने न वसति, स्त्रीभिः सहाऽऽलापं त्यजति, स्त्रीणां स्तन-जघन-नितम्बाद्यवयवान् नाऽवलोकते, पूर्वरतं न स्मरति, सरसाऽऽहारमतिमात्राहारं च नाऽऽदत्ते, देहशोभां न विधत्ते, इत्यादिगुणोपेतं ब्रह्मरतिः स्वयं वृणीते ॥ ८ ॥ तथा देहादीनामनित्या-ऽशुचित्वचिन्तनं, स्वस्यैकत्वा-ऽन्यत्वचिन्तनं, सकल-कुविकल्पत्यागो यथास्थितवस्तुतत्त्वज्ञानं चेत्ययं विद्या-परिणयनोपायः ॥ ९ ॥ तथा मनोदुःखहेतुर्भोगाभिलाषो, नानाऽनर्थनिदानं विषयतृष्णा, मृत्युहेतुर्जन्म, वियोग हेतवः संयोगाः, इत्थं यद्-यदिष्टतया गृह्यते तत् तदनिष्टहेतुरेव ततः-संसारे प्रवृत्तिर्दुःखकारणं, निवृत्तिस्तु सुखकारणमित्यादि-परिणामो निरीहता-प्राप्त्यु-पाय इति ॥ १० ॥

तथा यदा भवजन्तुरेता दश कन्याः परिणयति, तदैव चारित्रधर्मसैन्यं प्रबलीभवति, मोहसैन्यं च क्षीयते । किञ्च कर्मपरिणामोऽप्यनेनैवोपायेनाऽनुकूलो भवति ।'' इत्याद्याकर्ण्य पुनः कन्दमुनिना पृष्टं- ''स्वामिन् ! एताः कन्या गुणधारणनृपः कियता कालेन परिणेष्यतीति ?'' गुरुराह- ''षड्-मासान्ते ताः परिणेष्यतीति'' श्रुत्वा मयोक्तं- ''भगवन् ! अहं त्वद्यैव संयमं गृहीतुकामोऽस्मि, तद्भवद्भिः किमेतावान् कालविलम्बः कथ्यते ?'' केवल्याह- ''राजन् ! अनन्तशस्त्वया पूर्वं द्रव्यलिङ्गानि गृहीतानि विमुक्तानि च परं न तेभ्योऽर्थसिद्धिरभूत्, ततोऽस्मदुक्तमार्गेण सम्प्रति गुणाभ्यासं विधेहि, ततो योग्यतां वीक्ष्य चारित्रधर्मामात्यः सद्बोधः स्वयमेव विद्याकन्यां ते परिणायिष्यति, ततः सर्वतत्त्वपरिज्ञानाद् भावविशुद्धौ सत्यां सर्वा अपि कन्या मिलिष्यन्ति अतोऽधुना काल-विलम्ब एव ते श्रेयस्कर'' इति तद्गुरुवचः प्रमाणमिति कृत्वा वन्दित्वा च सपरिकरोऽहं गृहमायातः ।

## विद्याकन्यया सह लग्नः, धर्मदृढता

अथाऽहं गुरूपदिष्टमार्गेण गुणाऽभ्यासं कुर्वन् अस्मि, गतानि कानिचिद् दिनानि, अन्यदा रात्रिशेषे यावदहं गुरूक्तदेशनां सम्यग् विचारयन्नस्मि तावत् सद्बोधाऽमात्यः समागत्याऽऽस्तिक्य-तत्त्वावगम-संवेगोपशमाद्यनेक-सौन्दर्यकलितां विद्यानाम्नीं कन्यां मां पर्यणापयत्, ततः प्रभाते गुर्वन्तिके गत्वा गुरुं नत्वा धर्मदेशनां यावदाकर्णयामि, तावद् गुरुभिरूचे- ''राजन् ! गतेऽह्नि कर्मपरिणामाद्यानुकूल्यात् त्वं विद्याकन्यां परिणीतवान्।'' मयोक्तं ''-सत्यमेतत् स्वामिन् ! भवत्-प्रसाद एवाऽत्र निदानं'' ततः केवल्याह- ''राजन् ! आकर्णयाऽस्य व्यतिकरं विद्यामादाय यावत् त्वदन्तिकमागच्छता सद्बोधेन सहान्तराले ज्ञानावरणनृपेण महायुद्धं कृतं, ततः पराजितेन तेन मोहराजस्य पुरो बुम्बा दत्ता, ततः क्रुद्धो मोहराजः सैन्यमादाय यावत्त्वदन्तिकमायाति तावत् कर्मपरिणामा-नुकूल्यात् प्रवृद्धौजसा चारित्रधर्मेणाऽन्तरा निपत्य मथितं समस्तमपि मोहसैन्यं, कृताश्च प्रहार-जर्जरा राग-द्वेष-पापोदयादयस्तद्भटास्ततो निर्विघ्नेन त्वया विद्या परिणीता, इदानीं ते मोहराजादयः सर्वेऽपि जीवितमात्रशेषाः कान्दिशीकाः प्रलाय्य क्वापि निलीय स्थिताः सन्ति । तथापि छिद्रान्वेषिणस्ते दुर्जनाः किमप्यन्तरालं प्राप्य त्वामुपद्रोतुमागमिष्यन्ति, परं ते त्वया सद्बोधवचसा चारित्रधर्मसैनिकान् पुरस्कृत्य विध्वंसितव्या'' इत्येवमादि-शिक्षामवधार्य देशनान्ते गुरुन् नत्वा गृहमागतोऽहम् । अथैवं मां धर्मे दृढीकृत्य पूर्णे मासकल्पे निर्मलसूरि-केवलिनोऽन्यत्र विजह्रुः ।

अन्यदा सद्बोधेन धर्मध्यान-शुक्लध्यानाभिधौ भटौ मह्यं दर्शितौ, तयोः परिचारकास्तेजः-पद्म-शुक्ललेश्याख्यास्तिस्त्रः स्त्रियश्च दर्शिताः, उक्तं च नित्यमेतत् सेवापरेण त्वया भाव्यं, ततो मया तेषां सेवा प्रारब्धा । पुनः सद्बोधेन विवेकाऽचल-सानुस्थ-जैनपुरनिवासिनः शुभाऽऽशयनृपाद्याः सर्वेऽपि चारित्रधर्मसैनिका मह्यं दर्शिताः जातः क्रमेण ममैतैः सह परिचयस्ततस्ते सर्वेऽपि मे हितकारिणो बभूवुः । इत्थं सद्बोधशिक्षया विचरतो मे व्यतीताः पञ्चमासाः, ततो योग्यतां वीक्ष्याऽनुकूलकर्म-परिणामादिप्रेरितैः शुभपरिणामादिनृपैः क्षमादि-कन्या-प्रदानार्थं लग्नानि निश्चिक्यिरे ।

अत्राऽन्तरे विषयाभिलाषमन्त्रिणा मोहराजं प्रत्युक्तं- "यदधुनाऽस्माकमुद्यमकरणा-वसरोऽस्ति तन्न युज्यते पाद-प्रसारिका, यतः कर्मपरिणामादिभिः सर्वैः सम्भूय भवजन्तुः क्षमादिकन्याः परिणाय्यते, परिणयनानन्तरं त्वसौ समूलमस्मत्कुलमुन्मूलयिष्यतीति". श्रुत्वा कम्पितो मोहराजः कर्मपरिणामान्तिकं गत्वाऽऽचख्यौ- "भ्रातः ! न घटते तवैवं गोत्रवृद्धस्यैतद् यद् विपक्षस्य भवजन्तोः पक्षपातं कृत्वा स्वगोत्रक्षयं कारयसीति ।" ततः कर्मपरिणामेनोक्तं- "भ्रातः ! किं क्रियते ? साम्प्रतं तु भवजन्तुरनुल्लङ्घ्यवीर्योऽस्ति। प्रस्तावमन्तरा तु न युक्तं विग्रहकरणं ततो मौनमेवाश्रयध्वमिति ।" ततो मोहादयो मौन-मवलम्ब्य तस्थुः ।

"अथाऽहं तु नित्यं सद्बोध-शिक्षया प्रवर्धमानवीर्योल्लासः क्षमादिदशकन्याः परि-णीय चारित्रधर्मनृपं सेवे" इत्यादिविचारपरो यावदस्मि तावद् भवितव्यता वशात् क्षणं मत्-सकाशात् सद्बोधः पृथक् गतस्ततो मया ध्यातं "यदहो ! दुष्करं खलु चारित्रकष्टं, दुस्त्यजाश्चैते नरलोकदुर्लभाः कामभोगास्तदधुना मदनमञ्जर्या सह भोगाननुभवामि, प्रान्ते चारित्रं ग्रहिष्यामी" त्येवं यावद् विकल्पाकुलोऽस्मि तावत् पुनरायातेन सद्बोधेनोक्तं- "मित्र किमेवं कुविकल्पान् विचिन्तयसि ? एतत् तु पाप-वेताल-दुष्टमनोयोग-पिशाचादिभिः प्रस्तावमुपलभ्य तव क्षमादि विवाहे विघ्नं कृतमस्ती" त्यादि शिक्षया पुनः स्थिरीकृतोऽहम्।

## क्षमादिभिः सह विवाहः, अष्टप्रवचनमातरः

अथ मां चित्तसमाधानमण्डपमानीय दर्शितः सद्बोधेन चारित्रधर्मनृपः सपरिकरः, तेनाऽपि बहु सत्कारपूर्वकमाभाषितोऽहम् । ततः प्रणष्टा मोहादयो जाता विशुद्धा मे चित्तवृत्त्यटवीं, प्रारब्धः सद्बोधेन दशानामपि कन्यानां विवाहोत्सवः । ततः पूर्वमष्टौ प्रव-चनमातरो निमन्त्रिताः, उक्तं च मां प्रति- "मित्र ! इयं प्रथमा ईर्या-समितिः सम्मानिता सती जैनानां युग-मित-भूम्यवलोकनादिकां गमनशुद्धिं करोति । १ । द्वितीया भाषासमितिरियं वचनशुद्धिं करोति । २ । तृतीयैषणासमितिरियमाहारशुद्धिं विधत्ते । ३ ।

चतुर्थी आदाननिक्षेपा समितिरयं वस्त्र-पात्रादि-प्रमार्जनादि-शुद्धिं करोति ।४। पञ्चमी पारिष्ठापनिका समितिरियं तु मल-मूत्रादि-परिष्ठापना-यतनां शिक्षयति ।५। षष्ठी मनोगुप्तिरियं मनः सुरक्षितं स्थिरं च करोति ।६। सप्तमी वागुगुप्तिरियं सावद्यवाग्-निषेधं करोति ।७। अष्टमी कायगुप्तिरियमसंवृताङ्गोपाङ्गचेष्टा निषिध्यति ॥८॥ इत्येता अष्टप्रवचनमातरो जैनपुराधिष्ठात्र्यः तदर्चयैतास्त्वमपीति ।

ततो मया यथाविधि-पूजिता-स्तास्तदनन्तरमुत्कट-वीर्यरूप-कुण्डे धर्मध्यानरूप-वह्निं प्रज्वाल्य तेजः-पद्मशुक्ललेश्यारूप कुलस्त्रीभिर्विहित-स्नानाऽङ्गरागादि संस्कारः। पुनस्ताभिरेव तथाऽशेषैर्धर्मसैनिकैर्विविधं भूषितः, तदेवं कृतसंस्कारं मां कुण्डाऽन्तिके निवेश्य सद्बोधः स्वयं पुरोहितीभूय कर्मेन्धनक्षेपात् प्रदीप्ते धर्मध्यानाग्नौ भावना-दर्वीभिः कुवासना-रूप-यव-तिलाद्याहुति-द्रव्याणि जुहाव ।ततः सदागम- सांवत्सरोद्दिष्टे वृषभ-लग्नांशे क्षान्तिकन्यायाः पाणिग्रहं कारितोऽहम् ।ततो हृष्टाः शुभपरिणामादयः, प्रमुदिता निष्प्रकम्पतादयः, भ्रांतानि च मण्डलानि, एवं च क्रमेण तत्रैव लग्ने शेषा अप्यष्टौ दयादिकन्याः परिणीता मया ।निविष्टश्चाङ्गनाभिः सह निजवीर्यनामनिविष्टरे, प्रमुदिता-श्चारित्रधर्मादयः ।अथ यद्यपि विद्या-पाणिग्रहणमात्रादेव महामोहो लीन एवाऽभूत् । तथापि क्षान्त्यादि-पाणिग्रहणानन्तरं तु ससैन्यः सपापोदयोऽसौ लीनतरतां प्राप्तः ।किञ्च तासां कन्यानामाश्लेष-सुखानुभव-सञ्जातस्वसंवित्ति-परमसुखप्राप्ति-द्वारेण मया तदा श्री गुरुवचः सत्यं मेने ।

अथाऽन्यदा श्री निर्मलसूरि-केवलिनः समागतः, वन्दनार्थं गतोऽहम्, देशनां श्रुत्वा व्रताभ्यर्थना मया कृता ।गुरुभिरूचे- ''राजन् ! यद्यपि क्षमादिपाणिग्रहणानन्तरं भाव-तस्त्वं साधुरेवाऽसि, तथापि लोके व्यवहार एव बलवानिति साम्प्रतं द्रव्य-दीक्षा दीयते'' इति ।ततः स्वसूनवे राज्यं दत्त्वा, सप्तक्षेत्र्यां वित्तमुप्त्वा, मदनमञ्जरी-कुलन्धरादिबहुभव्य-जनान्वितेन मया श्री निर्मलसूरिकेवलि-समीपे दीक्षा दीयते स्म ।ततः क्रमेणैकादशा-ङ्गान्यधीत्य यथाविधि संयमं प्रापाल्याऽन्ते संलेखनां कृत्वा तद्भववेद्यगुटिकाक्षये पुनरन्यगुटिका प्रयोगेण गतोऽहं प्रथमग्रैवेयके ।तत्र त्रयोविंशति-सागराणि यावत् सुखमनुभूयाऽऽयुः-क्षये च्युत्वा सिंहपुरे महेन्द्रनृपस्य वीणाराज्ञ्याः पुत्रत्वेनोत्पन्नः, तारुण्ये जातिस्मृतिवशात् सुघोषा-चार्यान्तिके दीक्षामादाय यथाविधि पालयित्वा द्वितीय-ग्रैवेयके देवो जातः ।इत्थं पंच कृत्वा ग्रैवेयकेषु गमनागमनानि कृत्वा तदनंतरं धातकीखंडस्य भरतक्षेत्रे शंखनाभिपुरे महागिरिनृपस्य भद्राराज्ञ्याः पुत्रत्वेनोत्पन्नः कृतं च सिंह इति मन्नाम, यौवने धर्मबन्धुसूरिदेशनया संयमं प्रपन्नस्तत्र स्वल्पेनैव कालेन मया चतुर्दशाऽपि पूर्वाणि

अधीतानि, जातश्चोग्रक्रियापात्रं, ततो गुरुभिर्योग्यतां वीक्ष्य मह्यं सूरिपदं दत्तं, ततः प्रसृता सर्वत्राऽपि मत्-कीर्तिः, स्थाने स्थाने च मां बहुश्रुतं मत्वा लोकाः स्तुवन्ति पूजयन्ति नाना-प्रकारैः पर्युपासते, वस्त्र-पात्राहारादिभक्तिं च विदधते । चतुर्विधोऽपि सङ्घो मद्गुणे रञ्जितोऽहो ! अज्ञानतिमिर-हरणदिनकरोऽयं सकलसाधुगणरत्न-रत्नाकरोऽयमित्यादि-स्तुतिभिर्मां स्तौति । ततो निराकृता मया निःशेषकुवादि-दर्पाः, प्रबोधिता-श्चाऽनेके महर्द्धिका विहिता चाऽनेकधा शासनोन्नतिः ।

## मिथ्यात्वपरावशता संसारभ्रमणम् ।

अथाऽत्राऽन्तरे शृणु अगृहीतसङ्केते ! मदुन्नतिमसहमानया भवितव्यतया मोहादीन् प्रत्युक्तं "यत् प्रस्तावोऽस्ति अयं वो यदि किमपि पराक्रमं कुर्वीध्वं, तर्हि नो चेद् भवजन्तुर्युष्मान् सपरिकरान् उन्मूलयिष्यतीत्यादि ।" ततस्ते मोहादयः प्रवृद्धोत्साहाः पापोदयं पुरस्कृत्य मदभिमुखं प्रचलिताः, चारित्रधर्मादयस्तु विपक्षान् सोत्साहान् विलोक्य विलक्षा जाताः। अथ विषयाभिलाषादिष्टा मिथ्यात्व-ज्ञानावरण-शैलराजार्द्धिगारव-सातगारवाद्या मोहसैनिकाः प्रथमं मदन्तिकमायाता तदनु आर्त्तरौद्रध्यानाख्यौ द्वौ भटावा-यातौ, तदनु तयोस्तिस्रः परिचारिकाः कृष्ण-नील-कापोतलेश्याख्यास्तत्रागताः । इत्थं शनैः शनैः समस्तमपि मोहसैन्यं मां निरुध्य स्थितं, ततः प्रमत्तता तटिन्यपि जाता पूर-दुस्तरा । ततो विषयाभिलाषेण पुनः सज्जीकृतानि चित्तव्याक्षेपमण्डपादीनि । ततो हे भद्रे ! शैलराज-वशादहो ! मे पाण्डित्यमहो ! मे गुणाधारत्वं, युगप्रधानोऽहं, सर्वेऽपि गुण-ज्ञान-विद्याद्यतिशया मामेवाऽऽश्रिताः । प्रागपि विश्वोत्तरसौभाग्यो नृपोऽभूवं, तथेदानीमपि माहात्म्यस्य परमां कोटिं प्राप्तोऽस्मीत्याद्यात्म-स्तुतिं कर्त्तुं प्रवृत्तस्ततो ज्ञानावरणाधिष्ठितो गर्वेणाऽन्यदेव भणामि, तदर्थमन्यमेव कथयामि, यथा तथा विरुद्धमेव प्ररूपयामि । इत्थं प्रवर्त्तमानस्य मे मिथ्यात्व-सान्निध्यादुपरितनानि सार्द्धानि चत्वारि पूर्वाणि मूलतो विस्मृतानि, ततः प्रमत्ततापूरमग्नो व्यचिन्तयं- 'यदहो ! कीदृशा मे शिष्याः ? कीदृशाश्च भक्तिमन्तो मे श्राद्धास्तथा ऋद्ध्यादिगारववशाद् वस्त्र-पात्रोपधि-शिष्याद्यासनादि-गर्वमकार्षम् । तथाऽऽहार-लोलता-वशादाधाकर्मादि-दोषानुदपा-दयम् एवंविधं मां वीक्ष्य चारित्रधर्मादयस्तु दूरं गतास्ततो यतिलिङ्गं दधन्नपि जातोऽहं मिथ्यादृष्टिस्ततः कुपितैः कर्मपरिणामादिभिः पापोदयं पुरस्सरं दत्त्वा गुटिका-क्षये प्रेषितः पुनरेकेन्द्रियपुरे । तत्र पुनर्मिलितौ मेऽत्यन्ताऽबोध-तीव्रमोहोदयौ । ततोऽनन्तं कालं सूक्ष्मवनस्पतिकायादिषु भवितव्यतया विडम्बितः । पुनः क्रमेणाऽन्यान्यगुटिका वितीर्याऽऽनीतः पञ्चेन्द्रिय-पशुसंस्थानपुरे । ततो व्यन्तरादिषु, ततो नरभवं लब्ध्वा स-

सम्यक्त्व-गृहिधर्ममाराध्य सौधर्मादिषु गतस्ततः कदाचित् कर्मभूमौ नरत्वेन, कदाचिच्चाऽकर्मभूमौ युगलत्वेन पुनः कर्मभूमि-मनुष्यत्वेनोत्पन्नस्तत्राऽज्ञानवशाद् विषभक्षण-पर्वतपात-करपत्रग्रहण-माघस्नानादिकष्टमनुभूय किल्बिषिको जातः । पुनर्नरत्वं प्राप्य तापसाद्यवस्थामासेव्य ज्योतिषो जातः पुनर्नरत्वे द्रव्यसाधुत्वं गृहीत्वा केवल-क्रिया-पालनात् नवम-ग्रैवेयकं यावद् गतः । इत्थं हे भद्रे ! सिंहाचार्यभवेऽहङ्कारकरणात् क्रिया-शैथिल्यादनन्तं संसारं भ्रान्तोऽहम्, नाना-दुःखपरम्पराश्चाऽनुभूतास्ततो यदि तत्र भवे ज्ञान-मदं नाऽकरिष्यं तदा तद्भव एव सिद्धिमगमिष्यमित्यादि श्रुत्वाऽगृहीतसङ्केतोचे-"यदि तात! सिंहाचार्यभवे त्वया विशुद्धा सुस्थितराजस्यऽऽज्ञा-पालिताऽभविष्यत् तदैतावत्यः कष्टपरम्परास्ते नाऽभविष्यन् । यत् त्वया तद्-भवे ज्ञानमदेन तदाज्ञा-विराधनं कृतं, तत् त्वया न सुन्दरं कृतमिति ।" ततः संसारिजीवः प्राह-साधु साधु भद्रे ! कथितं त्वया अतः पूर्वं तु त्वं नामतः परमार्थोऽपि चाऽगृहीतसङ्केतैवाऽभूः । साम्प्रतं तु परमार्थोऽवधारितस्त्वया ततो नामत एवाऽगृहीतसङ्केता परमार्थततस्तु विचक्षणासीति" एवं सर्वज्ञाऽऽज्ञोल्लङ्घनजं दुर्विपाकमालोक्य सुविशुद्धाज्ञा-पालनयत्नः कार्यस्ततो विबुधैः

इत्युपमिति-कथोद्धारे आज्ञा-विराधन
श्रुतमदादि-विपाक-दर्शनाख्यः
षष्ठोऽधिकारः ॥ ६ ॥

# अथ सप्तमोऽधिकारः

## अनुसुन्दरचक्रिणः षट्खण्डविजयः

संसारिजीवः प्राह- अथाऽऽकर्णयाऽगृहीतसङ्केते ! मम तस्करावस्था-स्वरूपं तथाहि नवमग्रैवेयकात् तद्भववेद्यगुटिका-प्रदानेन भवितव्यतया प्रेषितोऽहं मानवावास-पत्तने, तत्र महाविदेहरूप-चतुष्पथे सुकच्छा-नाम्नि विजये क्षेमपुरे युगन्धरनृपस्तद्राज्ञी नलिनी, तस्याः कुक्षौ पुत्रत्वेनाऽवतीर्णः तस्यामेव निशि नलिन्या गज-वृषभाद्याश्चतुर्दश स्वप्ना दृष्टा, माता-पितृभ्यां तत्-फलप्रश्ने कृते स्वप्नपाठकै-श्चक्रवर्त्ती पुत्रो भविष्यतीत्यादि फलमूचे। तच्छ्रुत्वा नन्दितौ माता-पितरौ, समये जातोऽहं पुण्योदयाऽन्वितः । पित्रा जन्म-महोत्सवं कृत्वाऽनुसुन्दर इति मदभिधा चक्रे । क्रमेण पञ्चधात्रीभिर्लाल्यमानो जातो विद्याभ्यास-योग्यस्ततः कलाचार्योपान्ते स्वल्पकालेन शिक्षितः सकलकलाः क्रमेण यौवनं प्राप्तोऽ-त्राऽन्तरे मत्-पिता युगन्धरनृपः पञ्चत्वं प्राप्तस्तस्योर्ध्वदैहिकं कृत्वा स्वपितृपदे स्थितोऽहं, सामन्तकैः प्रारब्धो मे राज्योत्सवस्तदाऽऽयुधशालायां चक्ररत्नं प्रकटीबभूव ।

अथ चक्रोत्पत्तिनिमित्तं अष्टाहिकामहोत्सवं विधाय निर्गतोऽहं दिग्विजयार्थं, साधितानि षडपि खण्डानि, क्रमेण जातश्चतुर्दश-रत्न-नवनिधानाधिप-स्ततः खेचर-भूचरैः सर्वैर्नृपैः सम्भूय द्वादश-वर्षाणि यावच्चक्रिपदमहोत्सवश्चक्रे । इत्थमखण्ड-षड्-खण्डाधिपत्यवैभवमनुभवतो मे व्यतीतानि चतुरशीतिपूर्वलक्षाणि । साम्प्रतं वार्धक्ये पूर्व साधितानां देशानां पुनरपि दिदृक्षया निर्गतोऽहं ससैन्यः । क्रमेण नाना-देशानवलोकयन् शङ्खपुरं प्राप्तस्ततः सैन्यं पृष्ठे मुक्त्वा स्वल्पपरिच्छदोऽत्र चित्तरमोद्याने कौतुकावलोका-र्थमागत ।

अथ शृणु भद्रे ! पूर्वं गुणधारणभवे मम धर्माचार्यः कन्दमुनिर्योऽभूत्, यच्च कुलन्धरो मे मित्रं, या च मदनमञ्जरी मम प्रिया तेषां त्रयाणामपि वृत्तान्तमाकर्णय ।

तत्र कन्दमुनिर्भवितव्यता-वशाद् भवचक्रे भ्रमन् क्वापि स्त्रीवेदमर्जयित्वाऽत्रैव सुकच्छविजये हरिपुरे भीमरथनृप-सुभद्राराज्योः पुत्रीत्वेनाऽवतीर्णः । पितृभ्यां महाभद्रेति नाम कृतम् ।

अथ महाभद्राया समन्तभद्राभिधो ज्येष्ठभ्राताऽस्ति । सोऽन्यदा सुघोषसूरिदेशनां श्रुत्वा प्राप्तवैराग्यःसन् मातृपित्रनुज्ञाप्य व्रतं जग्राह । क्रमेणाऽसौ चतुर्दशाऽपि पूर्वाण्यधीत्य गीतार्थो जातस्ततो योग्यतां वीक्ष्य गुरुभिः सूरिपदं दत्तम् । ततोऽनेकसाधु-परिवृतोऽसौ समन्तभद्रसूरिः नैकसत्त्व-चित्ताऽवनौ बोधिबीजं वपन् वसुधातले विजहार ।

अथ महाभद्रा तु प्राप्त-तारुण्या सती पित्रा गन्धपुरे दिवाकरनृपाय परिणायिता । भवितव्यता-वशात् स नृपो मृत्युमापन्नस्तद्दुखात् महाभद्रा महाशोकसङ्कुला जाताऽत्राऽन्तरे समन्तभद्रसूरयस्तत्राऽऽगताः । स्वभगिनीं शोकार्त्तां विज्ञाय देशनाभिः प्रबोध्य दीक्ष-यामासुः । क्रमेणैकादशाङ्गाधीतिजाता, ततो गुरुभिः प्रवर्त्तिनी-पदे स्थापिता ।

एकदाऽनेक-साध्वीगणवृता विहरन्ती रत्नपुरं गता । अथ तत्र पुरे मगधसेनो नृपः सुमङ्गला तद्-राज्ञी, भवितव्यता-वशाद् मदनमञ्जर्या जीवस्तस्याः कुक्षौ पुत्रीत्वेनोत्पन्नः । पितृभ्यां सुललितेति नामदत्तं, क्रमेण सा यौवनं प्राप्ताऽपि पाणिग्रहणं नाऽभिलषति । केवलं पुरुषद्वेषिणी जाता । ततस्तन्माता-पितरौ चिन्तार्त्तौ जातौ, तदवसरे महाभद्राऽऽ-गमनं श्रुत्वा, तौ दम्पती सपरिच्छदौ सुललिता-सहितौ वन्दनार्थं गतौ । महाभद्रया देशना दत्ता । अथ सुललिता देशना-भावार्थमजानानाऽपि महाभद्रादर्शनादेव समुद्भूत-स्नेहाति-रेका सुचिरं तन्मुखन्यस्तलोचना तस्थौ ततः सा पितरौ प्रत्युवाच- "हे माता-पितरौ ! भवदनुज्ञाता सती अहं प्रवर्त्तिन्याश्चरणोपासनां करिष्यामीति तदाकर्ण्य सुमङ्गला-राज्ञी तद्विरहाऽसहा रोदितुं लग्ना ततो मगधसेना-नृपो राज्ञीं समाश्वास्य सुतां महाभद्रास्नेहासक्तां मत्वा गृहस्थवेषामेव तदन्तिकेऽ मुचत् ।

अथ महाभद्रा सुललितां नानोपदेशयुक्तिभिर्धर्मोपदेशं धर्मस्वरूपं बोधयति, तथापि सा भावार्थं नाऽवधारयति । इत्थं क्रमेण महाभदया सह नाना-ग्राम-नगराणि पश्यन्ती शङ्खपुरमायाता ।

## भव्यजन्तोः सदागमपार्श्वे पठनम्

अथ शृणु भद्रे ! शङ्खपुराधीशो मम मातुलः श्रीगर्भनृपः, तत्पत्नी कमलिनी नाम्नी सा च महाभद्राया मातृष्वसा, ताभ्यां दम्पतीभ्यां सन्तानप्राप्त्यर्थम् अनकेश उपायाः कृताः । एतदवसरे कुलन्धरजीवो बहुभवभ्रमणं कृत्वाऽनुकूल भवितव्यता-वशात् कम-लिन्याः कुक्षौ पुत्रत्वेन अवातरत् । तस्यामेव निशि कमलिनी स्वप्नमपश्यत् - यत् कश्चित् सुन्दराकृतिः पुमान् मन्मुखेन प्रविश्योदरमध्ये भूत्वा निर्गतस्ततः केनचित् सह यथोचितस्य स्वप्नस्य भावार्थं पृष्टो नृपः प्राह- "देवि ! ते पुत्रो भविष्यति परं स बाल्य एव कस्यचिद्

गुरोरुपदेशात् प्रव्रजिष्यति'' इति श्रुत्वा कमलिनी हृष्टाऽभूत् । क्रमेण गर्भे प्रवर्धमाने तृतीयमासादारभ्य कमलिन्या मनसि यानि यानि गर्भानुभावाद् उत्तम-दोहदानि जज्ञिरे तानि तानि नृपः पूरयामास । क्रमेण पूर्णे गर्भकाले सुदिवसे सुमुहूर्त्ते प्रसूतः पुत्रो जन्मोत्सवं विधाय पित्रा पुण्डरीक इति नाम कृतम् ।

अत्रावसरे समुत्पन्न-केवलज्ञान-श्रीसमन्तभद्रसूरिश्चित्तरमोद्याने समवसृतस्तदा कथञ्चित् सुललितयाऽविज्ञाता-महाभद्रा-प्रवर्त्तिनी वन्दितुमागता । तदवसरे केनचित् सदसि राजपुत्रजन्मोत्सवादि वृत्तान्तः कथितस्तदा गुरुभिरुक्तं- ''लघुकर्माऽसौ राजपुत्रः स्वल्पेनैव कालेन व्रतमादाय सदागममाराधयिष्यति'' इत्यादि श्रुत्वा गुरुं नत्वा महाभद्रा पुनरुपाश्रयमागता । अन्यदा सुललिताऽपि चित्तरमोद्याने कौतुकपरागता दृष्टास्तत्र संघ-समक्षं गुरवो राजपुत्रस्य गुणान् वर्ण्यमानाः पुनरुक्तं च मनुष्यगतिनगरे शुभकर्मपरि-णामा-ऽनुकुल-कालपरिणतिभ्यां प्रसूतोऽसौ भव्यपुरुषः सुमतिरित्यपरनामा महागुणवान् भावीत्यादि श्रुत्वा प्रमुदितः सर्वसङ्घः सुललिता तु भावार्थमनाप्नुवन्ती व्यचिन्तयत्- 'अहो! एतत् तु शङ्खपुरं, तदनेन मनुष्यगतिनगरं किमुक्तं ? तथा कमलिनी-श्रीगर्भयोः स्थाने कालपरिणति-कर्मपरिणामौ जनक-जननीत्वेनोक्तौ राजपुत्रस्याऽपि भव्यपुरुषः सुमति-रित्यन्यथा नाम कृतं, कथं चैष भाविगुणजातं वेत्ति ? किमेतदिति सन्देहाकुला महा-भद्रान्तिकमागत्य तत्-कारणमपृच्छत् । ततस्तामत्यन्तमुग्धामवेत्य महाभद्रया चिन्ति-तमयमेवाऽस्याः प्रतिबोधनोपाय इति समर्थितं युक्त्या तत्सर्वमपि उक्तं च- ''भद्रे ! यस्त्वया सभा-मध्ये व्याख्यां कुर्वाणः सदागमोऽवलोकितः स भगवान् भूत-भवद्-भविष्य-भावानशेषान् जानात्येव । तत् प्रसादादेवाऽहमपि जानामि, त्वमपि विधेहि तत्-सेवां यतो गुणवृद्धिः स्यादित्यादि वचोभिस्तां सदागमरागिणीं कृत्वा महाभद्रा गुर्वन्तिके समानयत्, तत् प्रभृति प्रारब्धा ताभ्यां समन्तभद्रसूरेः पर्युपासना ।

अथ पूर्णे मासकल्पे गुरवो महाभद्रामूचुः- ''भद्रे ! त्वं क्षीणजङ्घा-बलाऽसि तत स्त्वयात्रैव स्थातव्यं, प्रायः साध्व्याश्रितक्षेत्रे साधूनां स्थातुं नोचितमप्रीत्यादि-दोषसम्भवादिति विहरिष्यामः पुनः समये लाभं विज्ञायाऽऽगमिष्यामः । किञ्च येन तेनोपायेन त्वया राजपुत्रः परिचितव्य'' इत्याद्युक्त्वा सूरयो विजहुः ।

अथ महाभद्रा राज-पुत्रं पुण्डरीकं सस्नेहमाभाषयति, सोऽपि महाभद्रां वीक्ष्य मुदितो भवति। इत्थं कतिपयदिनैः स बालः सम्यक्-परिचितो जातः । पुनः समयमवेक्ष्य श्रीगुरवोऽत्रा-ऽऽगताः । महाभद्रा राजपुत्रं सार्थे गृहीत्वा वन्दितुमागता, उक्तं च- वत्स! अयं सदागम-गुरुरिति ।'' ततः पुण्डरीकेनोक्तं- ''मातः ! सदागममेनं विलोक्य मम

महान् प्रमोदोदयो भवति, ततोऽस्य गुरोः समीपेऽहं श्रित्वाऽभ्यासं करिष्ये" इत्युक्त्वा तदा च प्रभृति पुण्डरीकः सामायिकादि-श्रुतं पठितुं लग्नः ।

इत्थं हे भद्रे ! येयं महाभद्रा कन्दमुनेः जीवः प्रज्ञाविशालेत्यपरनाम्ना गुरुभिरभिधीयते, त्वं च सुललिता मदनमञ्जर्या जीवः परमार्थानभिज्ञत्वादगृहीतसङ्केतेत्युच्यते, अयं च पुण्डरीको राजपुत्रः कुलन्धरजीवो भव्यपुरुषः सुमतिरिति चोच्यते ।

## भव्यजन्तोः तस्करावस्थादिवृत्तान्तम्

अथाऽऽकर्णय मे तस्करावस्था-वृत्तान्तम्- अद्याऽत्र चित्तरमोद्याने प्रासादाग्रे सङ्घसमक्षं श्रीगुरवो यावद्धर्ममुपदिशन्ति तावदहं वनावलोकनार्थमागतो जातश्च मत्-सैन्यकोलाहलस्ततो गुरुभिस्तव पुण्डरीकस्य च प्रतिबोधार्थं महाभद्रां सम्बोध्य प्रोक्तं- अहो ! प्रज्ञाविशाले ! असौ संसारि-जीवश्चौरः सलोप्त्रो दुष्टाशयादिकैः राजपुरुषै-र्बद्ध्वा सर्वेषां जनानां पश्यतां मनुष्यगतिनगर्या महाविदेहरूप-चतुष्पथे भ्रमयित्वा कर्मपरिणाम-राजाज्ञया पाप-पञ्जरे क्षेप्तुं वध्यभूमिं नीयते । सोऽयं कोलाहलो जायते" इति । तदाऽऽ-कर्ण्य त्वयोक्तं- "भगवन् ! नैषा मनुष्यगतिनगरी एतत् तु शङ्खपुरं, न चैतत् चतुष्पथं किञ्च चित्तरमोद्यानं, तथाऽत्र तु श्रीगर्भो नृपो न च कर्मपरिणामस्तत्-किमेवं कथ्यते भवद्भिरिति ?" तदा गुरुभिरुक्तं- "हे अगृहीतसङ्केते ! त्वं परमार्थं नाऽवधारयसीति।" ततः पुनस्त्वया ध्यातं यदहो ! भगवता तु ममाऽप्यन्यन्नाम कृतमिति विस्मयमापन्ना तदा महाभद्रया विमृष्टं-यदुत कस्यचित् नरकगामिनो महापापिष्टस्येत्थं स्वरूपं भगवता प्रकाशितमिति ततो गुर्वादेशं गृहीत्वा मत्-प्रतिबोधार्थं मदन्तिकमायाता । उक्तं च मां प्रति- "अहो भद्र ! त्वं सदागमं शरणीकुरु येन ते चौर्यापराधसम्भवा-विडम्बना न स्यु" रित्युक्त्वाऽत्राऽऽनीतोऽहं ततो भगवन्तं दृष्ट्वाऽनिर्वाच्याऽऽनन्दोद्रेकात् मूर्च्छां प्राप्तः। पुनर्लब्धचेतनो "मा भैषीः महाभाग !" इत्यादि-वाक्यैर्गुरुभिः समाश्वासितस्ततो दुष्टा-शयाद्या विडम्बका मां त्यक्त्वा दूरे स्थिताः, स्वस्थीभूतश्चाऽहम् । तदा त्वया मत्-स्वरूपं दृष्टं, ततो यद्यपि सदागमः प्रज्ञाविशाला चैतौ द्वावपि मत्-स्वरूपं जानीतस्तथापि त्वां पुण्डरीकं च प्रतिबोधयितुं मया मूलतः स्ववृत्तान्तं कथितः ।

## भव्यजन्तोः अन्तरङ्गतस्कररूपम्

पुनः शृणु मुग्धे ! ममाऽन्तरङ्गतस्करत्वस्वरूपं, तथाहि- नवम-ग्रैवेयकात् सुकच्छविजये क्षेमपुर्यां युगन्धर-नलिन्योः पुत्रत्वेन यदाऽहं जातस्तदा भवितव्यतया मोहादिभ्यो ज्ञापितं-यत्- "संसारिजीवः साम्प्रतं सम्यक्त्वात् पृथग् भूतोऽस्ति, तदवसरो-ऽस्ति युष्माकं बलस्फोरणाये" त्याकर्ण्य मोहादिभिर्बाल्यत एव मांसादि व्यसनेषु अहं

प्रवर्तितः, पुनः तारुण्ये प्राप्तचक्रिपदो महारम्भ-महापरिग्रहाभ्यामाश्लेषितस्ततोऽहं हिंसा-वैश्वानरादिभिर्मृगयादिव्यसनीकृतः इत्थं च जाता मे चित्तवृत्त्यटवी मलिना, जाता च सुदुस्तरा प्रमत्तता-नदी, आगतं च क्रमेण सर्वमपि मोहसैन्यं मदन्तिके, चारित्रधर्म-सैन्यं तु सर्वमपि दूरीभूतम् । मोहराजेन पुनर्वासितानि राजसचित्त-तामसचित्तादिपुराणि मोहराजस्याऽविद्यामयं शरीरं पुष्टीभूतं, ततो मोहराजेन स्वपरिवारं प्रत्युक्तं- अहो वीरा ! अस्माकं भाग्यबलाद् भूयसा कालेन भव-जन्तुः पुनरस्मद्-वशे आगतोऽस्ति । प्राग् वयमनेन बहुशो हतवीर्याः कृताः स्मः तदद्याऽपि न विस्मरति, ततो भवद्भिस्तथा दृढोद्यमैर्भाव्यं यथाऽयं कदापि चारित्रधर्मादीन् स्वप्नेऽपि नेक्षते'' इति, ततो मोहराजाज्ञया रागकेशरि-प्रमुखैः कर्मपरिणामराजसत्कमकुशलकर्मव-र्गणारूपं द्रव्यजातं ग्राहितोऽहम्। पुनस्तैरेव दुष्टभावादिकैश्च सलोप्त्रो गृहीत्वाऽहं कर्मपरिणामनृपाय दर्शितस्ततः क्रुद्धः कर्मपरिणामोऽवदत्- ''हंहो ! अद्य यावदेतस्य पक्षपातं कुर्वन्नभूवं, ममैव चेदनेन-चौर्यमुनिष्ठतं तर्हि विडम्बना-पूर्वकमेनं वध्यभूमौ नीत्वा पापिपञ्जरे क्षेपयते'' त्यादि-नृपादेशं प्राप्य हृष्टैर्दुष्टाशयादिभटैः कर्मरूप मलभस्मोद्धूलिताङ्गो दत्तराजस-गुणरूपगैरिकहस्तः, कृततामसगुणरूपमषीतिलकः रागपरम्परारूप-करवीर-मालाऽवलम्बितगलः कुविकल्प-शरावमाला-विडम्बितोरःस्थल इत्थं कृतव-ध्यमण्डनोऽहं असदाचाररूप-रासभपृष्ठमारोपितस्ततः पापोद्वेगरूपपिठर-कतलं मस्तके दत्त्वा, अकुशलकर्मरूप-लोप्त्रं गले बद्ध्वा शब्दादि-विषयरूपेषु विस्वरपटहकाहलादिषु वाद्यमानेषु बहिरङ्गजनेषु पश्यत्सु विवेकिलोकैर्निन्द्यमानः, साधुजनैश्चाऽनुकम्प्यमानो दुष्टाशयादिराजपुरुषवेष्टितः कषायरूप-बालकैर्हस्यमानः स्वदेश-दर्शनापदेशात् महाविदेहरूपविपणिश्रेणिमध्ये भ्रमयित्वा तैर्वध्यभूमिसम्मुखं नीयमानोऽभूवम् ।

## महाभद्रा-जातिस्मरणम्

यावच्चाऽत्राऽऽगत्य हस्तिस्कन्धादवरुह्य रक्ताशोकतले स्थितो वनशोभां पश्यन्नस्मि, तावन्महाभद्रा मे दृष्टिपथमागता, अनयाऽपि पूर्वस्नेहात् सस्नेहमवलोकितोऽहं, ततो मया प्रणामः कृतो महाभद्रयाऽपि धर्मलाभाशीर्दत्ता उक्तं च- ''राजन् ! एते दुष्टाशयाद्या राजपुरुषाः कर्मपरिणामादेशात् कृतवध्यमण्डनं त्वां वध्यभूमिं नयन्ति, कथं तन्न जानासि-इति ?'' तदाकार्ण्य यावदहं तदुक्तभावार्थं विचारयामि तावत् पुनः सम्यग् मद्-विलोकनात् महाभद्रा जातिस्मृतिं प्राप । ततो दृष्टो तया कन्दमुनि-भवादारभ्य समस्तो वृत्तान्तः । पुनस्तदेव शुभाध्यवसाय-प्राबल्यादवधिज्ञानं समुत्पेदे । तद्-बलाद्-गुणधारणभवावधि ममाऽपि भवचरितमनया दृष्टं, ततो मां प्रत्युक्तं- ''राजन् ! स्मरसि

निर्मलसूरिवचांसि ? क्षान्त्यादि-पाणिग्रहणसौख्यं ग्रैवेयकादिसुखं चेत्यादि ।'' तद् वाक्यैर्मे पण्डितवीर्योल्लासः समजनि, तदनुभावात् मोहादीन् पराभूय सम्यक्त्व-सदागमौ मदन्तिकमागतौ, ततश्चित्तवृत्त्यटव्यामुभयोः सेन्ययोर्युद्धं जातं, परं मत्-प्राबल्यात् मोहसैन्यं हतवीर्यं कृत्वा चारित्रधर्मेण जयश्रीवृता ।

ततो गुणधारण-भवावधि-जातिस्मरणं मे प्रादुरासीत्, पुनर्विशेषशुभाध्यवसाय-योगादसङ्ख्यद्वीप-समुद्रविषयमवधिज्ञानं समुत्पन्नं, दृष्टस्तदाऽसङ्ख्येय-भवप्रपञ्चः, स्मृतं च सिंहाचार्यभवाभ्यस्तं पूर्वश्रुतं, स्मृतश्च आनिगोदाद् भवविस्तारः, निर्मलसूरिकथित-स्ततः सञ्जातपरमनिर्वेदोऽहं गुरूक्त-तस्करावस्था सत्यापनाय वैक्रियशक्त्या तस्कर-स्वरूपं विधाय प्रज्ञाविशालया सहाऽत्राऽऽगतस्ततस्तव पुण्डरीकस्य च प्रतिबोधार्थं गुरुभिर्मन्मुखेनैव मद्वृत्तान्तः ख्यापितः । षण्मासवाचोऽप्ययं वृत्तान्तोऽस्य भगवत एव प्रसादात् मया त्रिभिः प्रहरैस्त्वदग्रे कथितस्तदेवं हे भद्रे ! ममाऽन्तरङ्गचौर्यस्वरूपं तथैव च प्रायः सर्व-संसारि-सत्त्वेष्वपि पश्याम्यहमिति संसारिजीवोक्तं वृत्तान्तमाकर्ण्य सुललिता भावितचित्ता जाता, तथा राजपुत्रः पुण्डरीकोऽपि प्रमुदितः सन् पुनः पप्रच्छ''-हे आर्य! साम्प्रतं त्वच्चित्तवृत्त्यटव्यां को व्यतिकरोऽस्ति ? अनुसुन्दरः प्राह- ''श्रृणु सुमते ! यदाऽहं सदागमं शरणीकृत्य संवेगपूरितः स्ववृत्तान्तं कथयितुं प्रवृत्तस्तदैव चारित्रधर्मः स्वावसरं विज्ञाय ससैन्यो मदभिमुखमागन्तुं प्रवृत्तस्तत आनन्दितं सात्त्विकमानसपुरं विशदीभूतो विवेकगिरिः पुनर्वासितं जैनपुरं प्रगुणितानि चित्तसमाधान-मण्डपादि-स्थानानि । मयि पश्यत्येव जातं चारित्रधर्म-मोहराजयोर्महद्युद्धं, परं मम वीर्यानुभावाच्चारित्रधर्मनृपेण ससैन्यो मोहः प्रहतवीर्यः कृतः साम्प्रप्तं सर्वसैन्यान्वितश्चारित्रधर्मो मदन्तिके स्थितोऽस्ति। अतः परं जैनलिङ्गमादाय तत्पोषणं करिष्ये ''इत्याद्युक्त्वाऽनुसुन्दरस्तस्करस्वरूप-मुपसंहृत्य दिव्यकान्तिमयं मूलरूपं प्रकटीचकार । तावदागतं सैन्यमपि सर्वं तद्विलोक्य अहो ! पूर्वमस्माभिरयं तस्कर एवं बुध्यते स्म, पुनरयं तु महर्द्धिविस्तर-सार्वभौम इति विस्मिताः पुण्डरीकादयः ।

## अनुसुन्दरस्य प्रतिबोधः

अथाऽनुसुन्दरः स्वसुनवे पुरन्दराय राज्यं राज्यचिह्नानि च दत्त्वा श्री जिनपूजां विधाय संयमं जिघृक्षुः पुनः सुललितां प्रति प्रतिबोधार्थमाह- ''हे सुललिते ! अद्याऽपि किं शून्यचित्तेऽवलक्ष्यसे ? असंव्यवहारपुरादारभ्यैकेन्द्रिय-विकलेन्द्रिय-तिर्यग्भवादिभवा मदनुभूता विडम्बनाः श्रुत्वाऽपि कथं न संवेगमाप्नोषि, तथा नन्दिवर्द्धनादिभवेषु हिंसा-क्रोध-मान-माया-स्तेय-लोभ-मैथुन-मोह-परिग्रहादि संगोत्थानि मया नानाकष्टान्यनु-

भूतानि श्रुत्वाऽपि यदि नाऽवबुध्यसे तत् त्वमगृहीतसङ्केतेति यथार्थाभिधाऽसि, तथा बाल-मन्द-जडा-ऽधम-बालिशानां स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्रेन्द्रियपरवशानामधमोदर्कं, तथा मनीषिणश्चरित्रं, तथा विचक्षणसूरि-बुधसूरि-कोविदसूरीणां चरित्राणि देशनाश्च श्रुत्वाऽपि यदि तत्त्वार्थविकलाऽसि तर्हि मनुजत्वेऽपि पशुदेश्याऽसि, तथा चित्तवृत्त्यटव्यादिस्वरूपं मम सैन्यस्वरूपं भवचक्रस्वरूपं, तथा सात्त्विकमानसपुर-विवेकशैल-जैनपुर-चारित्रसैन्यादि-स्वरूपमाकर्ण्याऽपि यदि ते चित्तं नाऽर्द्रीभूतं, तत् त्वं गण्डोपलकल्पाऽसि, तथा च कनकशेखर-नरवाहन-विमल-हरराजाऽकलङ्क-प्रमुखाणां सौजन्यं षण्णां कोविदसूरिशिष्याणां च वैराग्यकारणं श्रुत्वाऽपि यदि संसारात् नोद्विजसे? तत् त्वं सर्वथा कङ्कटुकप्रायाऽसि, तथा यत् मया पुण्योदय-पापोदय-साहाय्यात् सुखाऽसुखे लब्धे, यच्चाऽहं सिंहसूरिभवे श्रुतमदादिना सुस्थितराजाज्ञां विराध्याऽनन्तं भवभ्रमणकष्टं प्राप्तस्तदाकर्ण्याऽपि यदि न प्रतिबुध्यसे तर्हि तदधिकः कस्तव प्रतिबोधोपायः? ।

## पुण्डरीकस्य जातिस्मरणम्

हे सुललिते ! पूर्वं मदनमञ्जर्या भवे या त्वया श्री निर्मलसूरि-देशना शुश्रुवे, या च तद्भवे दीक्षाराधिता तामपि कथं न स्मरसीत्यादि प्रचोदना वचोभिरनुसुन्दरे पुनः पुनः सुललिता-प्रतिबोधयति (सती) पूर्वानुभूतवृत्तान्तस्य पुनः पुनः श्रावणात् पुण्डरीककुमारः सञ्जातजातिस्मरणो मूर्च्छामाप्तस्ततो दुःखव्यग्रैः श्रीगर्भराजादिभिः शिशिरोपचारादिना सावधानीकृतः स- प्राह "तात ! सत्यमेतत् सर्वं यतस्त्वत्प्रसादा-दवाप्तजातिस्मरणेन दृष्टं मयाऽपि प्रागहं कुलन्धरनामा-गुणधारणस्य सखाऽभूवम् । तत्र निर्मलसूरिवचांस्याकर्ण्य व्रतं जगृहे मया, तदद्यापि संसारमसारं हित्वा व्रतमेवाऽनुष्ठेयमिति श्रुत्वा पुण्डरीकस्य माता नलिनी रोदितुं लग्ना, तदा श्रीगर्भस्तामाह- "प्रिये ! किमकारणं रोदिषि ? प्रथमत एव स्वप्नानुसारेणाऽस्माभिरिदं ज्ञातमस्ति तत्-किं न स्मरसि ? तं स्वप्नमिति," तत आवयोरपि संयम एव श्रेय इत्युक्त्वा तावपि दम्पती संयमैकचित्ताव-भूताम् ! अथ सुललिता साश्रुलोचना गुरुं प्रति प्राह- "भगवन् ! मया पूर्वं किं दुष्कर्म-कृतं भवष्यिति ? यदुपदेश-शतेनाऽपि मे ज्ञानोदयो न भवति ? न च वैराग्य-संवेगौ प्रबलौ भवतः ? ततोऽनुसुन्दर एवाह- "भद्रे ! पूर्वं त्वया मदनमञ्जर्या भवे दीक्षामादाय ज्ञानाभ्यासे शैथिल्यं चक्रे, तद्-विपाकेन चैवं दुर्बोधा जाताऽसि, तथा च तत्र भवे पुरुष-द्वेषिण्यभूस्तथाऽत्राऽपि भवे पुरुषसङ्गं नेच्छसीति" श्रुत्वा सुललिता सखेदं नेत्राऽश्रूणि सृजती गुरुन् प्रति अज्ञाननाशोपायं पप्रच्छ ततोऽनुसुन्दरेणोक्तं- "राजपुत्रि ! मुञ्च

अतिविषादं, क्षीणप्रायमिदानीं ते तत्कर्म, कुरुष्व सदागमभक्तिम्, एतद्भक्तिरेव प्रायः सर्वदेहिनां तत्त्वज्ञानहेतुरि" त्यादिवचोभिः प्रवृद्धसंवेगा सा सदागमोऽयमेवेति बुद्ध्या पतिता भगवत्-समन्तभद्रसूरिपादयोः प्राह च- "समुद्धर उद्धर नाथ ! इदानीं मामज्ञानपङ्कमग्नामित्यादि।

## सुललितादीनां दीक्षा, अनुसुन्दरस्य सर्वार्थसिद्धे गमनम्

ततोऽतिभक्ति प्राग्-भार-वश-क्षपित-भूरिकर्मजालायास्तस्या बालाया गुरुपादपतिताया एव जातिस्मरणमुत्पेदे । दृष्टः साक्षादिव मदनमञ्जर्यादिको वृत्तान्तः, ततोऽतिमुदिताऽनु-सुन्दरपादयोर्निपत्य प्राह- "तात ! जातः त्वद्वचसि मे प्रत्ययो यतो जातजातिस्मृत्या साक्षादवलोकितो मया सर्वस्त्वदुक्तवृत्तान्तः, विरताऽस्मि साम्प्रतं संसारकारागृहात्, मूढाऽप्यहमनुगृहीताऽनेन भगवता भवता च ।"

अत्राऽन्तरे समागतौ सुमङ्गला-मगधसेनौ सुललितायाः पितरौ सपरिच्छदौ सुता-मिलनोत्सुकौ, ततः सुललिता तौ प्रति व्रतानुज्ञामयाचत, तदाकर्णनोद्भूतशोकव्याकुलौ तौ दम्पती पुनः सुललितया नानोपदेशभङ्गिभिः प्रतिबोधितौ स्वयमपि व्रतादानोन्मुखौ बभूवतुः, ततः श्रीगर्भराजेन मगधसेननृपेण च स्वं स्वं राज्यमनु-सुन्दरचक्रिसुनवे पुरन्दरायाऽदीयत ततोऽनुसुन्दरादीनि तानि सप्ताऽपि महामह-पूर्वकं विधिना दीक्षितानि । श्रीसमन्तभद्रसूरिभिर्दत्ता च संवेग-वौराग्य-प्रवर्द्धनी देशना, तदनु गुरुप्रमुखांस्तान् सर्वमुनीन् नत्वा यथागतं गताः सर्वेऽपि नरामरादयः । जातः प्रदोषस्ततो विहिताऽऽवश्यकादिकृत्येषु सर्वसाधुषु स्वाध्यायध्यानपरेषु अनुसुन्दरमुनिरपि ध्यानासक्तमनास्तस्यामेव निशि उपशमश्रेणिमारुह्योपशान्तमोहः स्वायुः समाप्यौदा-रिकदेहपञ्जरं विहाय सर्वार्थसिद्धौ त्रयस्त्रिंशत्-सागरायुः सुरः समभवत्, ततः प्रगे विज्ञात-तद्व्यतिकरेण श्रमणसङ्घेन विहितस्तद्देहसंस्कारः, कृतो नरामरैरुत्सवः।

अथ धर्माचार्य-स्नेहेन सुललिता-साध्वी शोकपीडिता गुरुभिर्बभाषे- "आर्ये ! न शोचनीयो महात्माऽसौ यदनेनैकदिनमात्रेण नरकगमनोचितं पापं क्षपयित्वा सर्वार्थसिद्धि-सुखमर्जितम्, अन्यच्च ततश्च्युत्वा पुष्करार्धभरते गन्धारनृपपद्मिन्योः पुत्रोऽमृतसारनामा भूत्वा यौवने विपुलाशयसूरिवचसा सदागम-सम्यक्त्वादीनुपलक्ष्य पितरावनुज्ञाप्य गुणधारणभवोक्तनीत्या क्षान्त्यादि-पाणिग्रहण-पूर्विकां भागवती-दीक्षां प्रपद्याऽनिदा-नतपः-संयमनिर्द्धूतसकल-कश्मलः केवलं लब्ध्वा शिवमाप्स्यति, ततः प्रमोदकारण-मेवाऽस्य कृतकृत्यस्य पञ्चत्वमित्यादि वचोभिः शोकं त्याजिता सुललिता स्वात्मशुद्ध्यर्थं षष्टा-ऽष्टम-दशम-द्वादश-रत्नावली-कनकावली मुक्तावली-लघुसिंहनिष्क्रीडित-

महासिंहनिष्क्रीडित-भद्रादिप्रतिमा-चान्द्रायण-यवमध्य-वज्रमाध्यादीनि भूयांसि दुस्तप-तपांसि विचचार ।

## ध्यानमहिमादि

अथ पुण्डरीकमुनिर्ज्ञानाभ्यासं कुर्वाणः क्रमेण गीतार्थो जज्ञे । तत एकदा सकलागमार्थसारं जिज्ञासुर्गुरुं विनयेन नत्वा पप्रच्छ- "भगवन्! आगमार्णवस्य किं सारमिति ?" समन्तभद्रसूरिराह- "आर्य ! ध्यानयोग एव सर्वागमसारः । यतः सर्वेऽपि मूलोत्तरगुणाः साधूनां श्रावकाणां च सर्वा बहिःक्रिया ध्यानयोग-फला एवाऽतस्तैरङ्गभूतैश्चेतः शुद्धिं विधाय ध्यानयोगः साध्यो मुमुक्षुणेति ।" पुण्डरीकः प्राह- "भदन्त! प्राग्बालकालेऽपि मोक्षमार्ग-कौतुकिना मया बहवः कुतीर्थिकाः पृष्टास्तैर्यथायथं स्वमतमालम्ब्य तत्त्वं निवेदितमभूत्, तथा ह्येके प्राहुः

"यस्य बुद्धिःर्न लिप्येत, हत्वा सर्वमिदं जगत् । आकाशमिव पङ्केन नाऽसौपापेन लिप्यते ॥ १ ॥" इति केचिच्च-"छित्वा मित्त्वा च भूतानि, कृत्वा पापशतानि च। स्मेरेदेकं विरूपाक्षं सर्वपापैः प्रमुच्यते ॥ २ ॥" इति, अपरे तु "अपवित्रः पवित्रो वा, सर्वावस्थं गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं, स बाह्याऽभ्यन्तरे शुचिः ॥ ३ ॥ इत्याहुः अन्ये तु पापशमनं मन्त्रमेव, पाप-निबर्हणमाहुः, अपरे वायुजयं, अन्ये तु हृदि स्थितस्य पुण्डरीकस्य चिन्तनं, तथाऽन्ये रेचक-कुम्भकादीन् वायून्, इत्थमपरे नाद-बिन्दु-कला-ज्योति-र्नाडी-प्रणवं-शून्यादीनि ध्येयतया प्रचक्षते । तदेवं तेऽपि नाना-प्रकारैर्ध्यानयोगमेव सारं व्याचक्षते, परमेकत्र मोक्ष एव साध्येऽपरापरयोगिनां कोऽयं ध्येय-नानात्वभेद इति मे महान् संशयः ।" सूरिराह- "भद्र ! त्वं तु सामान्यगीतार्थस्ततो न जानासि विशेषतो जिनागमस्यैदम्पर्यं, यत एते सर्वेऽपि तीर्थिकाः कूटवैद्यप्राया जिनसद्वैद्यस्य केवलं पल्लवग्राहिणः सन्ति ।

## वैद्यकथा

तथा ह्येकस्मिन् पुरे रोगाग्रस्त-समस्तजने एको महावैद्योऽस्ति, स चोत्पन्न-दिव्यज्ञानः समस्तवैद्यसंहितानां स्रष्टा, निःशेषरोगहर्त्ता, उपकारकृत् सर्वलोकानां, तथापि तत्रत्य-जना अधन्यतया नाऽङ्गीकुर्वन्ति तद्वचः । केचिद् भावि-कल्याणास्तु प्रतिपद्यन्तेऽपि। स च सततं स्वशिष्यान् पाठयति, ततः प्रसङ्गात् तत्रागतैः कैश्चिद्-धूर्त्तैः किञ्चित् तद्-व्याख्यानलेशं श्रुत्वा, तल्लवमात्रतुष्टैः पण्डितम्मन्यैस्तैः स्वपूजार्थं तल्लवप्रक्षेपेण विरचिता निज-निज संहिताः, तत्र कैश्चिद् ग्रथितानि तदनुसाराणि कानिचित् स्वकल्पितान्यन्य-वाक्यानि, कैश्चिच्च स्वल्पान्येव सद्वैद्य-वचांस्युपजीव्य ग्रथितान्यन्यापि भूयांसि

विरुद्धवाक्यानि, अन्यैस्त्वतिपण्डितमानिभिः सद्वैद्यवचसां विपरीतान्येव वचांसि ग्रथितानि । इत्थं तेषु चिकित्सां कुर्वाणेषु नाना-रुचयस्ते पौरास्तेषामपि कूटवैद्यानां मध्यात् कश्चिदेव केषाञ्चित् चित्ते प्रतिभाति नाऽपरः । ततः प्रसिद्धिं गतास्ताः सर्व-वैद्यशालाः पाठिताश्च तैः स्वशिष्याः निज-निज-संहिताः । तेऽपि चाटुतया प्राप्ता लोके महावैद्यख्यातिम् । ततो न लक्षयति कोऽपि पौरस्तं मौल-महावैद्यं, एवं सत्यपि स मौलः सद्वैद्यस्तत्-संहितास्तदध्येतारो विनेयास्तत्-परम्पराश्च ते सर्वेऽप्याश्रितजनानां रोगोच्छेदायैव बभूवुः तथा ये च कूटवैद्या याश्च तत्संहिता ये च तदध्येतारो विनेयास्तत्परम्पराश्च ते सर्वेप्यसत्-कल्पना मूलत्वादाश्रितलोकानां प्रत्युत रोगवृद्धये बभूवुः । अथ कदापि केषाञ्चित् तदाश्रितानामपि रोगातानवं रोगमोक्षो वा स्यात् तत् तु तत्-संहिता-मध्यग्रथितानां सद्वैद्यवचसामे-वाऽनुभावो न पुनस्तत् कल्पितानां विरुद्धवचसामिति । यैश्च दुर्बुद्धिभिः सर्वथा सद्वैद्य-वचोविपरीता एव संहिता रचितास्तदाश्रितरोगिणस्तु सर्वथा रोगवृद्धिमेव लभेयुरिति ।

## वैद्यकथाया उपनयः

अत्रापनयोऽयं संसारो नगरं, रोगिणो भवजन्तवः , सर्वज्ञः सद्वैद्यः, सिद्धान्तस्तत् संहिता कर्मरोगापहन्त्री, कुतीर्थिकाः कूटवैद्याः, तच्छास्त्राणि कूटसंहिताः । एवं सति स्वल्पा एव ये केऽपि भाविभद्रा भव्या सर्वज्ञसद्वैद्यवचःप्रतिपद्यन्ते तेषां कर्मरोगात् मोक्षो निश्चित एव । ये चाऽधन्यतया कुतीर्थिक-कूटवैद्यसेवा-परा, न तेषां रोगमुक्तिः, किन्तु विपरीताचरणात् प्रत्युत रोगवृद्धिः स्यात् । यच्चाऽन्यतीर्थिकेष्वपि कदाचित् क्वाऽपि साङ्ख्यादिष्वास्तिकेषु कर्मतानवं मुक्तिर्वा दृश्यते, तत् तु तन्मतग्रन्थग्रथितानां सत्य-सन्तोष-क्षमा-धृत्यार्वजादीनां सर्वज्ञ-वचसामेव माहात्म्यं न पुनस्तत्-कल्पितानां यज्ञ-होम-पशुवधाद्युपदेश-पराणां कूटवचसामिति परमार्थतो जिनशासनमेव कर्ममोक्षहेतुः ।

## जिनशासनम् अन्यमताश्च

अथ ये च केवलं सर्वज्ञ-सद्वैद्यवचो-विपरीता एव चार्वाकादयो नास्तिकास्तदा-श्रितानां त्वेकान्ततः कर्मवृद्धिरेवेति, तदेवं महाभाग ! शेषाणि सर्वाण्यपि शासनानि जिनभाषितादेव निर्गतानि तेनेदं जिनशासनं सर्वव्यापकमुच्यते, एवं च सति यत्-किञ्चिदपि सत्या-ऽहिंसा-ब्रह्म-शौचेन्द्रियनिग्रहा-ऽऽकिञ्चिन्य-नैराश्य-तपो-ज्ञान-ध्यान देवगुरु-भक्त्यादिकं स्वभावसुन्दरं परतीर्थिकेषु दृश्यते, तद् याचितकमण्डनमिव कण्टकितरुषु कल्पतरुरिव, यत् कल्पितेषु याग-होमाद्युपदेशकरेषु वाक्येषु मिश्रितं

सन्नंसङ्गतिं लभते, किन्तु पृथगेव दृश्यते, ततो यत्र तत्राऽपि दर्शने भावतः सर्वज्ञवचोऽनुगमादेव मुक्तिर्नान्यथा, परं तत्र लिङ्गस्य न किञ्चित् कारणं, ये च सर्वज्ञोक्तज्ञानविकला दुष्टशीला वयं ध्यानिन इति मन्यन्ते, तत् तु वचोमात्रमेव, न च विवेकिनामास्थाकारीति विदितसर्वज्ञवचसां तु ये केचन मनोनिरोधहेतवो ध्यानोपायास्ते सर्वेऽपि स्वार्थसाधका एव स्युः। यदाह स्वयं सिद्धर्षिः, यतो

"यस्तीर्थिकैः प्रोक्तो यश्चोक्तो जिनशासने।
भावतीर्थे स्थितस्याऽयं ध्येयभेदो न दुष्यतीति ।

अत एव- सव्वप्पवायमूलं दुवालसंगं जओ समक्खायं।
रयणायरतुल्लं खलु तो सव्वं सुंदरं तम्मि ॥ १ ॥

पुनः पुण्डरीक आह- "भदन्त! यथा वयं जिनशासनं सर्वव्यापकं स्तुमः, तथाऽपरेऽपि तीर्थिकाः स्वस्वदर्शनानि सर्वव्यापीनि स्तुवते । किमेत-दिति ?" ततो गुरुराह- "आर्य्र ! सम्यग्दृष्टिभिरेव भावतो जैनदर्शनमवबुध्यते, ज्ञाते चाऽस्मिन् मोहमलोद्भवा-ऽभेदबुद्धयः स्वयमेव विलीयन्ते, यतो निःशेष कल्मषो-ज्झितोऽष्टादशदोषरहितः सर्वज्ञः सर्वदर्शी परमात्मा एक एव प्रभुरित्येवं मत्वा यः कोऽपि ब्रह्म-विष्णु-शिव-बुद्ध-जिनादिनाना-नामसु येन कोनाऽपि नाम्ना तं ध्यायति तस्य तेनैव नाम्नाऽसौ सिद्धिकृद् भवति । अविदित-परमात्मस्वरूपाणां कदाग्रहाभिनिविष्टानां तु न केनाऽपि नाम्ना कदाप्यर्थसिद्धिः स्यात् । तथा क्षान्ति-मार्दव-शौच-तपः-संयम-मुक्ति-सत्य-ब्रह्मा-ऽऽर्जवा-ऽऽकिञ्चन्यलक्षणो दशविधधर्म एक एव, नाऽयं कस्यचित् पितृसत्को न वाऽत्र कस्याऽपि न सम्बन्धः, केवलं य एनं जानाति सेवते च तस्यैवाऽयं यल्लोकोक्तिः 'जाह्नवी कस्य पितृसत्केति ?' इत्थं भावार्थे च बुद्धे स धर्मो जैनो वा, वैष्णवो वा, बौद्धो वा, ब्राह्मणो वा, माहेश्वरो वा निगद्यतां, यतः सत्यार्थेनैव प्रसीदन्ति सुधियो, न शब्दमात्रेण । ततश्चेदन्यतीर्थिका अप्येवं देवस्वरूपं धर्मस्वरूपं च विदित्वा स्वदर्शनं सर्वव्यापि वदेयुस्तर्हि कोऽस्ति तत्र विरोधः। अथ चेदन्य थैव ते प्रलपन्ति तर्हि कुग्रहग्रस्त बुद्धिभिर्जात्यन्ध-कल्पैस्तैर्विवाद एवाऽनर्थ-हेतुस्तदुपेक्षैव वरं तेषां, यदि वा सत्यां शक्तौ यथाकथञ्चित् तत्त्वबोधनीयास्ते सद्भिर्यतो नाऽस्त्यपरः कोऽपि तत्त्वज्ञानदानात् महोपकारः । अन्यच्च महाभाग ! यदा दृष्टिवादाऽङ्गे नय-सागरे सर्वा अपि नयदृष्टिसरितः पतन्तीति द्रक्ष्यसि तदा सर्वेऽपि ते सन्देहाः स्वयमेवाऽपयास्यन्ति ज्ञास्यसि च सर्वोत्तमं सर्वज्ञ-शासन-मित्यादिभिः श्रीगुरूक्तवचोभिः परित्यक्त-सन्देहसन्दोहः श्रीपुण्डरीकमुनिर्विशेषादा-गमाभ्यास-प्रवणः क्रमेण द्वादशाङ्ग-पारगः

परमगीतार्थो जातः । ततस्तं सर्वागमविशारदं योग्यं विज्ञाय गच्छाधिपं विधाय समन्तभद्रसूरिः स्वयं संलेखनां समादृत्य देहपञ्जरमुन्मुच्य शिवसौधमलञ्चकार ।

## पूण्डरीकसूरेः पादपोगमनानशनम्

अथ पुण्डरीकसूरिरवाप्ताऽवधिज्ञानः क्रमेण च सञ्जातमनःपर्यवज्ञानो रविरिव शासनाम्बरं भासयन् ग्रामा-ऽऽकर-पुरादिषु विजहार । इत्थं चाऽसौ बहुकालं यावत् लोकोपकारं कृत्वा जगति मोहध्वान्तध्वंसं विधाय क्रमेण शिष्यगणं गुणाधिकं निष्पाद्य स्वल्पशेषे स्वायुषि धनेश्वरनामानं साधुं स्वपदे न्यवीविशत् । इति चाऽनुशिष्टं ददौ यत्- "महाभाग ! धन्यस्त्वं येन विज्ञात-जिनागमः प्राप्योत्तमं सूरिपदं धन्येभ्य एवैतद् दीयते, धन्या एव चैतत् पारगास्ततस्त्वया भाववैद्यकल्पेनाश्रितश्रमणसङ्घोऽसौ सम्यक् सम्भावनीय इत्यादि ।"

तथा शिष्येभ्योऽपि "भद्राः ! संसारोदधियानप्रायः सूरिरेषः कदापि न मोक्तव्यो भवद्भिः कुलवधून्यायात् निर्भर्त्सना-शतैरपि नाऽस्य पदमूलं त्याज्यं कदापीत्यादि-शिक्षां वितीर्य श्रीपुण्डरीक-सूरिर्गिरिकन्दरायां शुद्धशिलातले स्थित्वा चतुःशरणादिपूर्वकं पादपोगममादृत्य सद्ध्यानधाराधौतनिःशेषमलपटलः क्षपक-श्रेणिमारुह्य केवलमुत्पाद्य शैलेशीकरणकरवालेन निःशेष-कर्म-प्रकृतीः निष्कृत्य परमपदं प्राप ।

तथा च महाभद्रा प्रवर्त्तनी सुललिता साध्वी ते उभावपि तपस्तप्त्वा कर्मक्षयं विधाय शिवपदं भेजतुः, अन्येऽपि श्रीगर्भ-राजाद्याः साधवः सुमङ्गलाद्याः साध्व्य-श्चारित्रमाराध्य सुरलोकं ययुः । किं बहुना तत्र चित्तरमोद्याने यावद्भिर्भव्यसत्त्वैरे-तदनुसुन्दरचरितं कौतुकेनाऽप्याकर्णितं तेषां सर्वेषामपि मनः संसाराद् विरज्यन्त एव स्म । ततः कैश्चित् सर्वविरतिः कैश्चिच्च देशविरतिर्वा जगृहे, केचित् सम्यक्त्वं, केचिच्च संवेगं लेभिरे ।

## उपसंहार

तदेवं भो भव्याः ! भवद्भिरपि यथाशक्ति धर्मोद्यमकरणेन सफलीकर्त्तव्योऽयमुप-देशश्रमो यतस्तुल्य एव प्रायः सर्वसंसारिणां वृत्तान्तः । तथाहि यथाऽसौ पुण्डरीको भावि-कल्याणतया गुरुभिर्भव्यपुरुषः सुमतिरित्यभिदधे तथाऽन्येऽपि भाविभद्रा भवजन्तवो नाना-नामका अपि भव्यपुरुषत्वं न व्यभिचरन्तीति सदागमः ख्यापयत्येव । तथा च सा महाभद्रा समन्तभद्रसूरिवचनेनाऽऽदित एतत् तत्त्वमवबुध्य ततः प्रज्ञाविशालेत्याख्याता। तथाऽन्येऽप्युत्तम-सत्त्वा जिनागमं श्रुत्वाऽवगत-तत्त्वा प्रथममेव भवविरताः स्युस्ते तत्त्वतः प्रज्ञाविशाला एव । यथा च सुललितायां महाभद्रया पूर्वाभ्यास-स्नेहवशोद्भवः सम्बन्धो गुणायाऽभवत् तथाऽ परेषामपि गुरुकर्मणामपि भावि-भद्रणां सत्सङ्गो भवत्येव

गुणलाभाय । यथा च महाभद्रया सुललितायाः पुण्डरीकस्य च समन्तभद्रसूरि-द्वारा सदागमे भक्तिरुत्पादिता तथाऽद्यापि सुसाधवः पर-हितैकनिरताः सन्तो लघुकर्मणां गुरुकर्मणां वाऽपि सत्त्वानां येन केनोपायेन जनयन्त्येव जिनागमे भक्तिम् ।

यच्चाऽनुसुन्दरेण सुललिता-पुण्डरीकयोः संवेग-जननार्थं सप्रपञ्चं स्वभव-भ्रमण-स्वरूपमाख्यातं, तत् प्रायः सर्वेषामपि संसारि-सत्त्वानां सममेव । यथा च सुललिता गुरु-कर्मतया पूर्वं तत्त्वमनवबुध्यमानाऽगृहीतसङ्केतेत्युक्ता, यदि पुनस्तया सदागमः शुश्रूषा न शिथिलीकृता, ततो जाता सर्वसिद्धिः तथाऽन्योऽपि भव्यसत्त्वो गुरुकर्मतया गुरुवचसा तत्त्वमविन्दन्नगृहीतसङ्केत एवोच्यते चेत्पुनरसौ तथापि श्रुतश्रवणादरं न मुञ्चति, तर्हि लभेतैव तत्त्वज्ञानमिति।

तदेवं भो भव्या ! लोकस्थिति-कालपरिणति-कर्मपरिणाम-स्वभाव-भवितव्यता-निजभव्यताद्यन्योन्य-सापेक्षकारणसमुदयजनितं भवप्रपञ्चं तत् परिपाक-लभ्यं, तदुच्छेदकं च परमेश्वरानुग्रहं विज्ञाय, तथा वस्तुतो जिनाज्ञाऽऽराधन-विराधनजौ मोक्ष-भवौ सम्यग् विभाव्य जिनाज्ञा-पालन एव यतितव्यं भवद्भिर्वर्जनीयं चाऽऽज्ञा-विराधनं, विजेतव्याश्च विषयकषाया-ऽऽद्यऽन्तरङ्गरिपवो, रोधव्यान्याश्रवद्वराणि निग्राह्य इन्द्रियग्रामो, यथाऽपयाति सकलं मलपटलं, प्रादुर्भवति सद्गुणकदम्बकं, शीघ्रं च भवदुःखक्षयं विधायाऽनन्तसुखसदनं शिवपदं लभेध्वमिति ।

इत्येवं निपुणं विभाव्य भविकाः संसारदुःखक्षयो-
पायं तात्त्विकमव्यपायि परमानन्दैकसंसाधनम् ।
मुक्त्वाऽऽलस्यमपास्य कुग्रहमयो हित्वा कदाशां तथा
कुर्वीध्वं दृढमुद्यमं यदचिरात् सर्वार्थसिद्धिर्भवेत् ॥ १ ॥ [शार्दूलविक्रीडितवृत्तम्-]
इत्ययं हंसरत्नेन स्वल्पबुद्धिहितेच्छया ।
उपमित्याः कथोद्धारो लिलिखे लेशमात्रतः ॥ २ ॥

इत्युपमिति भवप्रपञ्चा-कथोद्धारे सप्तमोऽधिकारः । सम्पूर्णोऽयं प्रबन्धः । इति श्री स्वस्त्यस्तु श्रमणसङ्घायेत्याशीर्वचः ॥

संवत १७९० वर्षे महासुदी १५ पूर्णमासी-दिने सम्पूर्णीकृतोऽयं ग्रन्थः श्री अर्गलापुरमध्ये वामया चन्द्रेण ॥ श्रीरस्तु ॥ श्लोकः ३२२० ॥

॥ कल्याणमस्तु ॥

# ... संपूर्ण ...



: જન્મ :
વિ.સં.૧૯૩૦
વૈ. સુ. ૬, રાધનપુર

: દીક્ષા :
વિ.સં.૧૯૫૮
વૈ. સુ. ૧૫, રાધનપુર

: સ્વર્ગવાસ :
વિ.સં.૨૦૩૩ જે. સુ. ૮, જુનાડીસા

સંઘસ્થવિર યુગમહર્ષિ આચાર્ય ભગવંત
શ્રીમદ્‌વિજય **ભદ્રસૂરીશ્વરજી** મ.સા.ની
દીક્ષા શતાબ્દીના મંગલ અવસરે
સૂરતના આંગણે
પૂ.આ.ભ. શ્રી ૐકારસૂરીશ્વરજી મ.સા.ના સમુદાયના
**પૂ. આ. ભ. શ્રી અરવિંદસૂરિ મ.સા.**
**પૂ. આ. ભ. શ્રી યશોવિજયસૂરિ મ.સા.**
**પૂ. આ. ભ. શ્રી મુનિચન્દ્રસૂરિ મ.સા.**
પૂ. પ્રવર્તક શ્રી જયાનંદવિજયજી મ.સા. આદિના
સાન્નિધ્યમાં ઉજવાતા મંગલ પ્રસંગે
આ ગ્રન્થ પ્રકાશન કરતાં આનંદ અનુભવીએ છીએ.

: પ્રકાશક :
આ. ૐકારસૂરિ જ્ઞાનમંદિર ગ્રંથાવલિ - સૂરત.

# ગુરુ સ્તુતિ

(રાગ : સમરો મંત્ર ભલો નવકાર)

પ્રણમો વિજયભદ્રસૂરિરાય, જેહના નામે મંગલ થાય;
જેહને સમરે સંકટ જાય, જેહને પ્રણમે પાપ પલાય... પ્ર. ૧

નગર રાધનપુર કેરા વાસી, મસાલિયા મનોહાર;
શેઠ ઉગરચંદ નામે સોહે, સૂરજબેન ગૃહનાર... પ્ર. ૨

ઓગણીસસોત્રીસે ગુરુ જનમ્યા, જન ગણ મંગળ ગાય;
સૂરજબહેનના સૂર્યસમા એ, ભોગીલાલ કહેવાય... પ્ર. ૩

બાલ્યકાળથી જિનભક્તિમાં, ચિત્ત પ્રફુલ્લિત થાય;
ભવ વૈરાગી ભોગીલાલ મન, સંસારે ન ઠરાય... પ્ર. ૪

યૌવન વયમાં સ્વજન સંબંધી લગ્ન કરી હરખાય;
ધર્મપત્ની પ્રતિબોધ કરીને, ગુરુવર મન મલકાય... પ્ર. ૫

અઠ્ઠાવીસ વરસની વયમાં, ઉભય સંયમી થાય;
સંઘ ચતુર્વિધ આશિષ આપે, જયજય શબ્દ સુણાય... પ્ર. ૬

વિજયસિદ્ધિસૂરીશ્વરજી કેરા, વિનયવિજય મુનિરાય;
તાસ શિષ્ય ગુરુભક્તિ સવાયા, પ્રણમુ તેહના પાય... પ્ર. ૭

અનુપમ ત્યાગી ગુરુ વૈરાગી, ક્રિયાનિષ્ઠ કહેવાય;
શાસન દીપક મહાપ્રભાવક, સૂરિવર પદે સોહાય... પ્ર. ૮

પ્રભાવક એ પુણ્યપુરુષના, પગલાં જ્યાં જ્યાં થાય;
સંઘ પ્રતિષ્ઠા ઉધાપનની, સુવાસ ત્યાં પસરાય... પ્ર. ૯

દીર્ઘ સંયમી દીર્ઘ તપસ્વી, પ્રણુ ગુરુના પાય;
ભવો ભવ ગુરુવર શરણું મળતા ૐકાર ભવદુઃખ જાય... પ્ર. ૧૦

**સંઘસ્થવિર યુગમહર્ષિ પ.પૂ.આ. શ્રી ભદ્રસૂરીશ્વરજી મ.સા.ના**

**દીક્ષા શતાબ્દિના મંગલ અવસરે....**

**કોટિ કોટિ વંદના**

॥ समाप्त ॥

: मुद्रक :
किरीट ग्राफीक्स
२०८, आनंद शोपींग सेन्टर, रतनपोल, अहमदाबाद १.
फोन : (O) ५३५२६०२ (R) ६६२२८०६